PG SK S1 01 (DSE)

द्विवर्षीयस्नातकोत्तरः पाठ्यक्रमः

(चि. बि. चि. एच. एन. इ. पि. २०२० अनुसारम्)

प्रथमषाण्मासिकः

संस्कृतमहाकाव्यम् काव्यम् च

संस्कृतम्

पद्मनाथ-गोहाञिबरुवा-मानविकी-विद्या-अध्ययन-सत्रम्
कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

विषयविशेषज्ञाः

१) आचार्य प्रह्लादः रा. जोशी, कुलपतिः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी

२) अध्यापिका सुदेष्णा भट्टाचार्या, अध्यक्षा, संस्कृतविभागः, गुवाहाटीविश्वविद्यालयः

३) प्रो. जगदीश शर्मा, अध्यापकः, संस्कृतविभागः, गुवाहाटीविश्वविद्यालयः

पाठ्यक्रम-समन्वयकाः : डॉ. इन्द्रानी डेका, सहायकाचार्या, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः
लीना ओजाँ, शैक्षिक परामर्शदाता, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

पाठ्यक्रम- प्रस्तुतकर्तारः

अध्यायाः	**प्रस्तुतकर्तारः**
१-३	राजीव शर्मा, सहयोगी अध्यापकः, संस्कृत विभागः जाँजी-हेमनाथ-शर्मा-महाविद्यालय, शिवसागर।
४	हियाश्री राय, शोधच्छात्रा (NFOBC), संस्कृत-विभागः गुवाहाटी-विश्वविद्यालयः, गुवाहाटी।
५-९	अमित् कुमार दास, शोधच्छात्रा (NFSC), संस्कृत-विभागः गुवाहाटी-विश्वविद्यालयः, गुवाहाटी।
१०-११	बरषा पाटगिरिः, शोधच्छात्रा, संस्कृत-विभागः गुवाहाटी-विश्वविद्यालयः, गुवाहाटी।
१२-१५	राजीव शर्मा, सहयोगी अध्यापकः, संस्कृत विभागः जाँजी-हेमनाथ-शर्मा-महाविद्यालय, शिवसागर।

सम्पादनसमितिः

विषयवस्तु-सम्पादना : डॉ. उदिताभट्टाचार्या, सहायकाचार्या, संस्कृतविभागः, गौहाटीविश्वविद्यालयः (१, ४)
डॉ. भारती गोस्वामी, अवसरप्राप्तम सहयोगी अध्यापिका (५-११)
संस्कृतः विभागः विभाग : वि. बरुवा महाविद्यालयः गुवाहाटी
डॉ. उदिताभट्टाचार्या, सहायकाचार्या, संस्कृतविभागः, गौहाटीविश्वविद्यालयः (१२-१४)

प्रारूप-सम्पादना : लीना ओजाँ, शैक्षिक-परामर्शदाता, कृष्णकांत-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

प्रथमप्रकाशः - मार्च, २०२५

ISBN :978-93-7839-683-0

This Self Learning Material (SLM) of the Krishna Kanta Handiqui State University is made available under a Creative Commons Attribution-Non Commercial-Share Alike 4.0 License (International) : http.//creativecommons.org/licenses/by-nc-sa/4.0

Printed and published by Registrar on behalf of the Krishna Kanta Handiqui State Open University.

Headquarters : Patgaon, Rani Gate, Guwahati-781017
City Office : NH 37, Resham Nagar, Khanapara, Guwahati-781022 Web : www.kkhsou.in

विषयपरिकल्पनम्

पृष्ठासंख्या

अध्यायः १: रामायणम् (बालकाण्डः, प्रथमकाण्डम्, सामान्याध्ययनम्) ७-२३

रामायणस्य कथावस्तुः, रामायणस्य कर्ता (वाल्मीकि), रामायणस्य क्रमविकाशः, रामायणस्य उपजीव्यत्वम्, रामायणकालीनसमाजः, रामायणस्य काव्यिकसौन्दर्यम्, रामायणस्य बालकाण्डस्य प्रथमसर्गः, बालकाण्डस्य कथावस्तुः, प्रक्षिप्तरूपेण बालकाण्डम् एकम् अवलोकनम्, रामायणस्य बालकाण्डे वर्णितं रामचरितम्।

अध्यायः २: रामायणम् (बालकाण्डः, प्रथमकाण्डम्, पाठ्याध्ययनम्) २४-५९

रामायणम्, बालकाण्डम् (प्रथमसर्गः), व्याकरणगत टोका।

अध्यायः ३: महाभारतम् (शान्तिपर्वणि, एकनवतिः शततमः अध्याय, सामान्याध्ययनम्) ६०-८३

महाभारतस्य प्रणेता, उत्पत्ति क्रमविकासञ्च, महाभारतस्य प्रतिपाद्यम्, महाभारतस्थ उपजीव्यत्वम, महाभारतस्य उपाख्यानानि, महाभारतकालीन समाजः, महत्वाद् भारत्त्वाच्च महाभारतमुच्यते, महाभारतस्य टीका / भाष्य, महाभारतस्य रचनाकालः, शान्तिपर्वस्य कथावस्तु, मोक्षधर्मपर्व।

अध्यायः ४: कुमारसम्भवम् (परिचयः) ८४-१०१

महाकविकालिदासस्य परिचयः, कुमारसम्भवमहाकाव्यस्य कथावस्तु, कुमारसम्भवमहाकाव्यस्य स्रोतः, कुमारसम्भवस्य अष्टसर्गाणां सारः, कुमारसम्भवमहाकाव्यस्य नामकरणस्य तात्पर्यम्, कुमारसम्भवमहाकाव्यस्य टीकायाः विवेचनम्, चरित्रचित्रणम्, समीक्षणम्।

अध्यायः ५: कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः १-१५) १०२-१२१

तृतीयसर्गस्य सारांशः, तृतीयसर्गस्य नामकरणस्य महत्वम्, तृतीयसर्गस्य (१-१५) श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयपाठः, श्लोकानां शब्दार्थः, श्लोकानाम् असमीयानुवादः, व्याकरणगतटिप्पणी, विशेषश्लोकानां भावार्थः।

अध्यायः ६: कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः १६-३०) १२२-१३८

तृतीयसर्गस्य (१६-३०) श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयपाठः, श्लोकानां शब्दार्थः, श्लोकानाम् असमीयानुवादः, व्याकरणगतटिप्पणी।

अध्यायः ७: कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः ३१-४५) १३९-१५४

तृतीयसर्गस्य (३१-४५) श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयपाठः, श्लोकानां शब्दार्थः, श्लोकानां असमीयानुवादः, व्याकरणगतटिप्पणी, विशेषश्लोकानां भावार्थः।

अध्यायः ८: कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः ४६-६०) १५५-१७१

तृतीयसर्गस्य (४६-६०) श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयपाठः, श्लोकानां शब्दार्थः, श्लोकानाम् असमीयानुवादः, व्याकरणगतटिप्पणी, विशेषश्लोकानां व्याख्या।

अध्यायः ९: कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः ६१-७६) १७२-१८९

तृतीयसर्गस्य (६१-७६) श्लोकानां संस्कृतपाठः, श्लोकानां अन्वयपाठः, श्लोकानां शब्दार्थः, श्लोकानां असमीयानुवादः, व्याकरणगतटिप्पणी।

अध्यायः १०: कुमारसम्भवम् (चतुर्थः सर्गः, श्लोकाः १-२३) १९०-२०५

चतुर्थसर्गस्य सारांशः, चतुर्थसर्गस्य (१-२३) श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयः, श्लोकानाम् अनुवादः, श्लोकानां व्याकरणटिप्पणी, श्लोकानां व्याख्या भावार्थश्च।

अध्यायः ११: कुमारसम्भवम् (चतुर्थः सर्गः श्लोकाः २४-४६) २०६-२१९

चतुर्थसर्गस्य सारांशः, चतुर्थसर्गस्य श्लोकानां संस्कृतपाठः, श्लोकानाम् अन्वयः, श्लोकानाम् अनुवादः, श्लोकानां व्याकरणटिप्पणी, श्लोकानां व्याख्या भावार्थश्च।

अध्यायः १२: शिशुपालवधम् (सामान्याध्ययनम्) २२०-२३७

शिशुपालवधस्य कर्ता, माघस्य शिशुपालवधकाव्यम्, शिशुपालवधमहाकाव्यस्य प्रतिसर्गकथासारः, शिशुपालवधमहाकाव्ये रसाभिव्यक्तिः, शिशुपालवधे अलङ्कारछन्दांसिः च, माघकाव्ये चरित्र-चित्रणम् भाषाशैली च / माघे सन्ति त्रयो गुणाः, शिशुपालवधमहाकाव्ये श्रीकृष्णनारदयोः संवादः, शिशुपालवधे श्रीकृष्णं प्रति बलरामस्य मन्त्रवर्णनम्, शिशुपालवधमहाकाव्ये रैवतकपर्वतस्य वर्णनम्, शिशुपालवधमहाकाव्ये वर्णितराजसूययज्ञे इष्टिवर्णना, शिशुपालवधमहाकाव्ये शिशुपालकृता कृष्णनिन्दा, शिशुपालवधे श्रीकृष्णं प्रति शिशुपालप्रेरितस्य दूतस्य संवादः, श्रीकृष्णस्य सैन्येन सह शिशुपालसैन्यस्य मेलनम्।

अध्यायः १३: नैषधचरितम् (सामान्याध्ययनम्) २३८-२५०

नैषधचरितस्य कर्ता, नैषधचरितस्य कथावस्तुः, नैषधं विद्वदौषधम् / नैषधेपदलालित्यम्, नैषधे रसाभिव्यक्तिः, नैषधचरितस्य टीका / भाष्यः, नैषधचरिते नलचरितम, नैषधचरितस्य प्रथमसर्गस्य कथावस्तुः, नैषधचरिते दमयन्तीं प्रति नलस्य उक्तिम्, नैषधचरिते नलस्य अवदान्यत्वम्, नैषधमहाकाव्ये उपवनवर्णनम्।

अध्यायः १४: मेघदूतम् (सामान्याध्ययनम्) २५१-२६४

गीतिकाव्यम्, मेघदूतम्, कालिदासः, कालिदासस्यसमयः, मेघदूतस्य उपजीव्यत्वम्, मेघदूतस्य काव्यिकसौन्दर्यम्, मेघदूतेप्रकृतिचित्रणम्, मेघदूते रसयोजना, मेघदूते अर्थान्तरन्यासः, माघेमेघेगतंवयः।

पाठ्यविषयस्य परिचयः : संस्कृतमहाकाव्यम् काव्यम् च

कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयेन गृहीतस्य स्नातकोत्तरपर्यायगतसंस्कृतविषयस्य द्वितीयषाण्मासिके प्रथमपत्ररूपेण 'संस्कृतमहाकाव्यम् काव्यम् च' इति पाठ्यविषयः प्रस्तूयते। अस्मिन् पाठ्यविषयेसंस्कृतमहाकाव्यम् च काव्यम्पन्दर्भे आलोच्यते। तस्मादेव अस्य पाठ्यविषयस्य नामकरणं वर्तते 'संस्कृतमहाकाव्यम् काव्यम् च' इति। पाठ्यविषयेऽस्मिन् चतुर्दशोऽध्यायाः सन्ति। ते अध्यायाः क्रमपूर्वकं यथा -

अध्यायः १ : रामायणम् (बालकाण्डः, प्रथमकाण्डम्, सामान्याध्ययनम्)
अध्यायः २ : रामायणम् (बालकाण्डः, प्रथमकाण्डम्, पाठ्याध्ययनम्)
अध्यायः ३ : महाभारतम् (शान्तिपर्वणि, एकनवतिः शततमः अध्याय, सामान्याध्ययनम्)
अध्यायः ४ : कुमारसम्भवम् (परिचयः)
अध्यायः ५ : कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः १-१५)
अध्यायः ६ : कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः १६-३०)
अध्यायः ७ : कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः ३१-४५)
अध्यायः ८ : कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः ४६-६०)
अध्यायः ९ : कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः ६१-७६)
ध्यायः १० : कुमारसम्भवम् (चतुर्थः सर्गः, श्लोकाः १-२३)
अध्यायः ११ : कुमारसम्भवम् (चतुर्थः सर्गः श्लोकाः २४-४६)
अध्यायः १२ : शिशुपालवधम् (सामान्याध्ययनम्)
अध्यायः १३ : नैषधचरितम् (सामान्याध्ययनम्)
अध्यायः १४ : मेघदूतम् (सामान्याध्ययनम्)

पाठ्यविषयस्यास्य अध्ययनसमये मूलपाठेन सह वामपार्श्वे तथा दक्षिणपार्श्वे केचन चतुर्भुजाकृतिषु मञ्जुषासु विषयाः परिलक्ष्यन्ते। ते विषयाः मूलपाठेषु उल्लिखिताः महत्त्वपूर्णाः धारणाः सरलरूपेण अवबोधने सहायकं भविष्यन्ति। 'ज्ञातव्यम्' इत्यस्मिन् अंशे पाठेन सह सम्बद्धानां महत्त्वपूर्णानां तथ्यानां वर्णनं प्राप्यते। प्रत्येकं शाखाया अध्ययनान्ते 'अग्रगत्याः निरीक्षणम्' इत्यंशे प्रदीयमानाः प्रश्ना अध्ययनस्य प्रगतये सुविधां प्रदास्यन्ति। अध्ययनात्परं उद्धृतानां प्रश्नानाम् उत्तराणि विलिख्य पाठस्यान्तिमे प्रदीयमानः 'अग्रगत्याः निरुपणम्' इत्यस्मिन् अंशेन सह यदि सुमेलयिष्यन्ति तर्हि शिक्षार्थीनां कृते लाभप्रदायकं भविष्यन्ति। अध्यायेऽस्मिन् आलोचितानां विषयाणां विस्तृतरूपेण अध्ययनाय 'अधिकं ज्ञातुम्' इत्यस्मिन् अंशे उल्लिखिताः ग्रन्थाः सहायकाः भविष्यन्ति। अध्यायस्यान्तिमे केचन 'अभ्यासप्रश्नाः' प्रदीयन्ते। अन्तिमाध्यायस्यान्ते केषाञ्चन सहायकग्रन्थानां नामानि उल्लिख्यन्ते। तेषां ग्रन्थानां सहायेन अस्मिन् पाठ्यविषये उद्धृता अध्यायाः प्रस्तूयन्ते। यदि भवन्तो विस्तृतरूपेण कमपि विषयं ज्ञातुमिच्छन्ति तर्हि तान् ग्रन्थान् अध्ययनं कर्तुं शक्नुवन्ति।

अध्यायः १ : रामायणम् (बालकाण्डः, प्रथमकाण्डम्, सामान्याध्ययनम्)

अध्यायस्य संरचना

१.१ उद्देश्यम्

१.२ परिचयः

१.३ रामायणस्य कथावस्तुः

१.४ रामायणस्य कर्ता (वाल्मीकि)

१.५ रामायणस्य क्रमविकाशः

१.६ रामायणस्य उपजीव्यत्वम्

१.७ रामायणकालीनसमाजः

१.८ रामायणस्य काव्यिकसौन्दर्यम्

१.९ रामायणस्य बालकाण्डस्य प्रथमसर्गः

१.१० बालकाण्डस्य कथावस्तुः

१.११ प्रक्षिप्तरूपेण बालकाण्डम् एकम् अवलोकनम्

१.१२ रामायणस्य बालकाण्डे वर्णितं रामचरितम्

१.१३ अध्यायस्य असमीया भाषायां सारांशः

१.१४ अध्यायात् किमवगतम्

१.१५ ज्ञानाधिक्यम्

१.१६ अभ्यासप्रश्नाः

१.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् –

- अनेन अध्यायेन समग्ररामायणस्य वृत्तान्तसम्बन्धे ज्ञातुं शक्यते।
- रामायणस्य प्रणेतुः वाल्मीके जीवनचरितविषये अपि ज्ञातुं शक्यते।
- रामायणस्य उद्भव-विकाशयोः विषये अनेन अध्यायेन अवबोधनं भवति।
- परवर्तीकालीन संस्कृतसाहित्ये रामायणस्य उपजीव्यत्वम् इति विषये ज्ञातुं शक्यते।
- रामायणकालीन समाज-संस्कृतेः आभासं लभ्यते।
- रामायणस्य काव्यिकसौन्दर्यविषये अपि अनेन अध्यायेन ज्ञातुं शक्यते।

१.२ परिचयः

बालकाण्डः रामायणस्य प्रथमः काण्डः अस्ति। अस्मिन् काण्डे महर्षिः वाल्मीकिः श्रीरामस्य जन्मकथां विस्तरेण वर्णयति। अयोध्यानगरे दशरथराज्ञः पुत्रकामेष्टियज्ञस्य विधानं,

श्रीरामलक्ष्मणयोः विश्वामित्रमुनिना आश्रमगमनं, तस्य मार्गे ताडकावधः, महर्षिणा प्रदत्तानि दिव्यानि अस्त्राणि, अहल्याशापमोक्षणं च अत्र प्रमुखानि प्रसङ्गाः दृश्यन्ते। बालकाण्डे एव जनकनृपतेः यज्ञभूमौ श्रीरामस्य शिवधनुर्भङ्गः, ततः सीतायाः विवाहः, परशुरामसंवादश्च घटन्ते। एते सर्वे प्रसङ्गाः रामस्य दिव्यस्वरूपं तथा धर्मपरायणतां प्रकटयन्ति।

अतः बालकाण्डः रामायणस्य मूलाधारः इत्यपि कथ्यते, यतोहि अत्र रामचरितस्य आरम्भः अस्ति।

१.३ रामायणस्य कथावस्तुः

रामायणमादिकाव्यरूपेण गण्यते। भारतीयाः रामायणेनात्यन्तं परिचिता सन्ति। रामायणस्य प्रणेता महर्षि वाल्मीकिरस्ति। अस्मिन् ग्रन्थे चतुर्विंशतिसहस्रसंखकाः श्लोकाः सन्ति। अत एव एतत् 'चतुर्विंशतिसाहस्रीसंहिता' पदेन अभिधीयते। एतत् क्रमशः बालकाण्डम्, अयोध्याकाण्डम्, अरण्यकाण्डम्, किष्किन्धाकाण्डम्, सुन्दरकाण्डम्, युद्धकाण्डम्, उत्तरकाण्डञ्चेति। सप्तसु काण्डेषु विभक्तमस्ति। बालकाण्डे रामजन्मतः रामविवाहपर्यन्तं; अयोध्याकाण्डे, रामराज्याभिषेकप्रसङ्गाद् आरभ्यः तस्याकस्मात् वनगमनपर्यन्तं वर्णनम्; आरण्यकाण्डे पञ्चवट्याः वर्णनं, खरदूषणवधं, हनूमानस्य समुद्रसन्तरणम्; सुन्दरकाण्डे लङ्कावर्णनम्, हनुमानेन अशोकवाटिकायां सीतादर्शनम्, रावणस्य सभायां हनुमत्प्राप्तिः, किष्किन्धायां पुनरावर्त्य रामेण सह सम्मिलनं च युद्धकाण्डे सेतुनिर्माणम्, युद्धे रावणहननम्, तत्पश्चात् सीतासम्प्राप्तिः, तस्याः अग्निपरीक्षा च, अयोध्यापुनरावर्तनम्, भरतेन सह मेलनम् राज्याभिषेकश्च। इत्यादीनां वर्णनां प्राप्यते । उत्तरकाण्डे सीतापरित्यागः, लवकुशयोः रामेण सह सम्मिलनम्, सीतायाः पृथिव्यां प्रवेशः च वर्णितः विलसन्ति।

अस्मिन् रामायणे महाकाव्ये विष्णुरवतारभूतस्य श्रीरामचन्द्रस्य चरितम् वर्णितम् । सीताहरणान्तरं राम- रावणयोः युद्धमवलम्व्यमेव वाल्मीकिः रामायणं रचितवान्। अयोध्या नृपति दशरथस्य तिस्रः महिष्यापि च चत्वारः पुत्रा आसन्। तेषु रामचन्द्रः ज्येष्ठमासीत्। दशरथस्य वृद्धावस्थायां सः रामचन्द्रस्य राज्याभिषेकस्यायोजनं कृतवान् तदैव कैकेयी तस्याः पुत्रं भरतं नृपतिरूपेणाधिष्ठितकरणार्थम् उपायमेकं चिन्तितम्। पूर्वप्रतिज्ञानुसारेण दशरथेन कैकेयीं वरद्वयं दातव्यमासीत्। प्रथमवरानुसारेण चतुर्दशं वर्षं यावत् रामचन्द्रस्य वनवासः अपरश्च भरतं प्रति राज्यभारप्रदानम्। तदा पित्राज्ञानुसारेण रामचन्द्रः वनागच्छत् लक्षणेन सीतया च सहैव। तदैव, दशरथस्य मृत्युरभूत्। भरतः तदा रामचन्द्रस्य पादुकामेव गृहीत्वा तदेव सिंहासने स्थापनं कृत्वा राज्यशासनमकरोत्।

वनवासे रामचन्द्रस्य सीतालक्षणाभ्यां सह महानविपदः सन्मुखोऽभूत्। लङ्काधिपतिना रावणेनः सीता अपहृता। परन्तु सुग्रीव-हनुमान-लक्षण-इत्यादिभिः सहायेन रामः सीतां पुनरुद्धारं कर्तुं शक्नोति स्म। परन्तु रामचन्द्रस्य सीतायाः सतीत्वविषये सन्देहो जायते स्म। तद् कारणादेव सीतां पुनरपि वनं प्रेषितवान्। तत्र वाल्मीकिमुनेराश्रमे तस्या लवकुशौ नाम कौ द्वौ पुत्रौ उपजायतः। लवकुशौ धनुर्विद्यायां निपुणो आस्ताम्। राज्ञः रामचन्द्रस्य अश्वमेधयज्ञस्य अश्वः लवकुशाभ्यां

वाधितोऽभूत्। तदैव पित्रा च पुत्राभ्यां युद्धोऽभूत्। ततः च तैः मिलितवन्तः।

एतत् वृत्तान्तमेव रामायणे अतीव माधुर्मतया वाल्मीकिना उपस्थापितम्। अनेन घटनायाः वर्णनेनैव कविः तत्कालीनार्य्यसमाजस्य आदर्शी तत्राङ्कनं करोति। तत्र रामचन्द्रस्य पितृशक्तिः, भ्रातुः लक्ष्मणस्य ज्येष्ठभ्राता रामं प्रति स्नेह अपि च पति-पत्न्योः प्रेमस्य स्वरूपम् इत्यादयः ये विषयाः अङ्किताः भवन्ति, ते सर्वेषां कृते अनुकरणीयाः प्रजापालकरूपेण रामचन्द्रस्य या भूमिका साऽपि अतीव महीयसी। रामचन्द्रस्य चरित्रस्य महत्वं सौकर्य्यश्च तत्र प्रकाशितो भवति इति।

१.४ रामायणस्य कर्ता (वाल्मीकि)

भारतीयैः ग्रन्थकारैः तावद् रामायणम् आदिकाव्यम्, अस्य प्रणेता वाल्मीकिश्च आदिकविः आख्यायते। वाल्मीकेः जीवनचरितविषये अधिकं विस्तृतं वितरणं न प्राप्यते। वाल्मीकेः स्थितिकालविषये साम्प्रत्यपीदमित्यन्तया वक्तुं तु नैव शक्यते, तथापि एतदनुमीयते यत् सः महर्षेर्व्यासादपि पूर्ववर्तीति। महाभारते हि वाल्मीकेस्तावद्धरामायणस्य च चर्चा दृश्यते। लौकिकच्छन्दसाम् आदिप्रयोक्ता वाल्मीकि इति परम्परया सर्वैः स्वीक्रियते। तदित्थं वाल्मीकितः एव लौकिककाव्यस्योद्भवं इति स्पष्टमस्ति।

वाल्मीकिविषये किम्वदन्ती विद्यते यदयं पूर्वे वयसि ब्राह्मणोऽपि सन् लुण्ठको जातः। पथिकाननुलुष्ट्य द्रव्योपार्जनं करोति स्म। परञ्च तत्पश्चात् कस्यचित्पिद्धतापसोपदेशेन तत्कार्यं त्यक्त्वा तपसि तल्लीनाः जातः। अभीष्टसिद्ध्यनन्तरं वल्मीकनिर्गतत्वादयं वाल्मीकि नाम्ना ख्यातोऽभवत्।

श्रुयते यद्, एकदा कदाचिद् महर्षिः वाल्मीकिः माध्यन्दिनसवानाय स्वाश्रमस्य समीपस्थितां तमसानदीं प्राप। तत्र रमणीयकं स्वच्छप्रसन्नसलिलं संवीक्ष्य विचरितुमारेभे। तत्रैव केनापि क्रूरहृदयेन निषादेन निपातितं रक्तरञ्जिताङ्गं भूतले इतस्ततः चेष्टमानं क्रौञ्चाख्यं शकुनिविशेषं ददर्श। भार्या चास्य पक्षिणः भूमौ निपतितं स्वामिनं विलोक्य करुणाकलितहृदया सती रूरोद। परमधार्मिकस्वभावो वाल्मीकिः रूदतीं क्रौञ्चीं समवलोक्य तां च सान्त्ववचनानि श्रावयन् सहसा वचनमिदमुवाच -

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रोञ्चमिथुनादेकमवधीः काममोहितम्॥

तस्य मुखादिदं वचनं श्लोकरूपैव निःसृतम्। तं श्रुत्वा स मुनिपुङ्गवोऽचिन्तयत् -

पादबद्धोऽक्षरसमः तन्त्रोलमसमन्वितः।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा॥

तदनन्तरं तस्य समीपे जगत्स्रष्टा ब्रह्मा समुपस्थितः अभूत्, वाल्मीकिं चोवाच। भो महर्षे! त्वं रामस्य चरितं लिख। तवैतत् काव्यं जगत्स्वस्तिकरं भविष्यति, प्रसिद्धिञ्चाधिगमिष्यति। प्रजापतिना ब्रह्मणा प्रेरितः स महामुनिः रामचरितलेखने संलग्नोऽभवत् रामायणाख्यमहाकाव्यञ्च लिलेख। अस्य महाकवेर्जन्मविषये इदमपि श्रुतिपथमायाति यत् पूर्वम् असौ महाकविः क्रुरकर्मा पापकर्मनिरतश्चासीत्। सप्तर्षिभिः प्रेरितः सः रामनामजपितुं प्रारभत्। पश्चात् भगवद्भक्तिनोदितः सः रामस्य जीवनमाश्रित्य रामायणाख्यस्य महाकाव्यस्य रचनायां तत्परोऽभवत्।

१.५ रामायणस्य क्रमविकाशः

रामायणमादिकाव्यम्। आदिकाव्यत्वमिति शब्दस्य आदिशब्देन श्रेष्ठं बुध्यते। रामायणं महाकाव्येषु श्रेष्ठं प्रथमञ्च। रामायणं सप्तकाण्डात्मकम्। रामायणे ५०० सर्गाः तथा २४००० श्लोकाः सन्ति। रामायणे चतुर्विंशति सहस्राणि श्लोकानि विद्यमानत्वात् 'चतुर्विंशतिसाहस्रीसंहिता' पदेनाभिधीयते।

रामायणस्य अस्तित्वं अतीव प्राचीनमिति। भारतीयसाहित्यस्य प्राचीन ग्रन्थः वेद- ब्राह्मण- आरण्यक- उपनिषत्सु च रामकथायाः विस्तृत वितरणम् अस्ति। रामायणस्य प्राचीनावस्थायां विषये पण्डितानां मध्ये मतभेदाः सन्ति। रामायणगीतानि रामायणस्य उत्पत्तेः प्रागेव प्रचारितान्यासन्। रामकथायाः बीजम् वाल्मीकेः पूर्वम्। सुतानां च कुशीलवानां मुखेषु रामकथां बहुकालं पर्यन्तं गीतरूपेण प्रचलितं आसीत्। अर्थगतभावेन कुशीलवशब्देन लवकुशं बोध्यते। प्रथमतः लवकुशौ रामकथां गायतः स्म। पश्चात् ये रामकथां गीतरूपेण प्रचारं कृतवन्तः ते 'कुशीलव' इत्याख्यायते। हरिवंशपुराणे उल्लेखम् अस्ति यत् रामायणस्य रचनायाः पूर्वे रामकथां चारणाः सुताः च कुशीलवैरपि गायन्ति स्म।

इक्षाकु वंशानां लोकाः रामसम्बन्धीय गाथां उद्भवन्ति स्म। प्रथमतः, वाल्मीकेः मुनेः रचितं रामकथां सुता अपि च कुशीलवानां मुखात् श्रुत्वा कोऽपि मुनिः काव्यरूपेण प्रस्तुतम् अकरोत्। सम्भवतः सः मुनिः आसीत् च्यवनः। किम्वदन्तीमनुसारेण स च्यवनः रामकथायाः रचनायां सफलता न लब्धवान्। तत्पश्चात् वाल्मीकिः रामकथां सम्पूर्णं कृतवान्। वाल्मीकेः पूर्वतः च्यवनः रामकथां काव्यरूपेण अरचयत् इति यदि वयं स्वोकृतिप्रदानं कुर्म्मः, तदा तत् काव्यम् 'आदिरामायणम्' इति वक्तुं शक्नुमः। पश्चात् वाल्मीकिमुनि रामकथां स्वकीयमाहात्म्येन काव्यरूपं ददातिस्म।

वाल्मीकिः रामायणं बहुकालपर्यन्तं लवकुशायोः माध्यमेन प्रचलितमासीत्। लवकुश मुख मुखात् प्रचारितः रामकथा रामायणेऽयि विद्यते। रामायणस्य अध्ययनात् वयं वक्तुं शक्नुमः यत् वाल्मीकिः स्वयं रामायणं प्रणीतवान्। बहुकालपर्यन्तं वाल्मीकेः रामायणं लोकानां मुखेषु प्रचलिताः। ततः रामायणस्य विभिन्नानि संस्कराणि उपलभ्यन्ते।

पण्डितानां गते रामायणस्य आदि अथवा बालकाण्डञ्च, सप्तमकाण्डम् अथवा उत्तरकाण्डं प्रक्षिप्तौ। द्वाभ्यां कथाभागाभ्यां सह अवशिष्टानां काण्डानां कथा अनेकानां विषयेषु विसङ्गतिपूर्णाः। एतत् विषये पण्डितानां मध्ये मतभेदाः सन्ति। तथापि अद्यावधि सप्तकाण्डरामायणस्य रचकः आदिकवि वाल्मीकीति प्रसिद्धम् इति शम्।

१.६ रामायणस्य उपजीव्यत्वम्

वाल्मीकेः रामायणं संस्कृतकाव्यसाहित्यस्य नेतृत्वं करोति। रामायणमहाकाव्यमनुकरणं कृत्वा संस्कृतसाहित्य बहुनि काव्यानि विरचितानि अभवन्। तेषु कानिचन् महाकाव्यानि, कानिचन्

वा दूतकाव्यानि, कानिचन् वा चम्पूकाव्यानि भवन्ति। रामायणकथामाश्रित्य महान्ति काव्यानि संस्कृतसाहित्ये विरचितानि भूत्वा संस्कृत साहित्यस्य प्राचुर्यं वर्द्धयन्ति। तानि यथा-

क) महाभारते तथा पुराणसाहित्य रामायणस्य प्रभावः -

रामायणाश्रितेषु काव्येषु प्रथमतः महर्षि व्यासदेवस्य महाभारतस्य नाम उल्लेखयोग्यं भवति। महाभारतस्य वनपर्वेषु, शान्तिपर्वेषु च रामकथायाः विस्तृतविवरणम् अस्ति। पुराणग्रन्थेषु अपि रामायणस्य प्रभावः सुस्पष्टं दृश्यन्ते। हरिवंशे, पुराणेषु चापि रामायणी कथां प्राप्यते। अग्नि- विष्णु- गारुड- भागवत- ब्रह्माण्ड- स्कन्दादिपुराणेष्वपि रामायणस्य नायकः रामचन्द्रस्य वीर्यकर्माणि प्रशंसितानि।

ख) रामायणस्य कथामवलम्ब्य विरचिताः ग्रन्था -

रामायणस्य रामकथामाश्रित्य परवर्तीकाले अनेकाः ग्रन्थाः विरचिताः। नामानि यथा -

(१) अध्यात्मरामायणम्

(२) अद्भुतरामायणम्

(३) अगस्त्यरामायणम्

(४) आनन्दरामायणम्

(५) मयन्दरामायणम्

(६) भुसुण्डिरामायणम्

ग) संस्कृतकाव्यग्रन्थे रामायणस्य प्रभावः -

महाकवि कालिदासः रामायणं पठित्वा एतावत् अभिभूतः अभवत् यत् रघुवंशाख्यं काव्यमेव विरचितवान्। सः स्वयमेव वदति-

अथवा कृतवाग्द्वारे वंशेरस्मिन् पूर्वसूरिभिः।

मणौ वज्रसमुत्कीर्णे सूत्रसेवास्ति मे मतिः॥ (रघुवंशम, १/४)

रघुवंशम् उनविंशतिः सर्गात्मकं महाकाव्यम्। अत्र रघुवंशस्य कथानिबद्धाः। दशमसर्गदारभ्यः पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिताऽस्ति। तदुत्तरं रामवंशानां तन्नृपानां चरितान्युपन्यस्तानि। अन्तिमसर्गः गर्भान्धस्य अग्निवर्णस्याभिषेकेण समाप्यते।

कविभट्टिः रामायणकथामाधारीकृत्य भट्टिकाव्यं विरचितवान्। द्वाविंशतिसर्गात्मकं महाकाव्यमेतद् प्रकीर्ण- अधिकार- प्रसन्न- तिङन्ता इति चतुर्षु काण्डेषु विभक्तमस्ति। तत्र सर्गपञ्चकाऽन्विते प्रकीर्णकाण्डे व्यामिश्ररूपाणि सामान्यविशेषकार्यप्रदर्शनपराणि तिङ्न्तरूपाणि प्रदर्शितानि। सर्गचतुष्टययुतेऽधिकारकाण्डे पाणिनीयाऽष्टकस्या अधिकारसूत्रानुसारेण बहुप्रकाराणि लक्ष्यरूपाणि लोचनगोचरीकृतानि। सर्गचतुष्टयाऽलंकृते प्रसन्नकाण्डे समीचिनया विधया गुणाऽलंकारप्रदर्शनं विहितम्। एवं सर्गनवकविलसिते तिङन्तकाण्डे चतुर्थे लडादीनां नवानामपि लकाराणां विशिष्टरूपाणि प्रकृष्टमतिवैभवेन निदर्शितानि। इदं काव्यं रावणवधनाम्नाऽपि प्रथते। कविः काव्यच्छलेन अत्र रामायणस्य प्रसिद्धः रावणवधकथां वर्णयति। मर्यादा-पुरुषोत्तमस्याऽनुपशमदमादिविलसितस्य रघुकुलचन्द्रस्य भगवतः श्रीरामचन्द्रस्य जन्मतः प्रभृति

रावणवधं यावदनुष्ठीयमानस्य लोकोत्तरचरितस्यात्र निबध्यमानत्त्वादस्य महाकाव्यस्यादौ रावणवधम् इत्येवाऽभिधाकं स्यादिति संभाव्यते।

कुमारदासस्य जानकीहरणं भारतीयवांमयस्य उल्लेखयोग्यं काव्यम्। ग्रन्थेऽस्मिन् रामायणीकथां चमत्कारितया निबद्धाऽस्ति। काव्यमिदं पञ्चविंशतिसर्गेषु विभक्तमस्ति। काव्यस्य प्रथमसर्गे दशरथवृत्तान्तम्, द्वितीये रावणपराजितानामिन्द्रादि देवानां नागलोके विष्णुसमीपोपसदनम्, तृतीये ऋतुवर्णनम्, चतुर्थे पुत्रेष्टियागो, रामस्य जन्म-शिक्षाग्रहणं, वसिष्ठाया राक्षसवधोद्योगश्च पञ्चमे वसिष्ठाधिष्ठिततपोवनवर्णनम्, षष्ठे मिथिलाप्रस्थानम्, सप्तमे विवाहः, अष्टमे रामसीतयोर्मधुयामिनीवर्णनम्, नवमे वरवध्वोः, अयोध्याप्रत्यावर्त्तनम्, दशमे रामवनवासः भरतकृतं तत्प्रार्थनं, सीताहरणञ्च, प्रकादशे गरुडरावणर्योयुद्धं, गरूडवधः, सुग्रीवसख्यादिकञ्च वर्णनम्, द्वादशे शरद्वर्णनम्, त्रयोदशे सीतावियोगे रामस्य विलापितम्, चतुर्दशे सेतुवन्धनम्, पञ्चदशे रामेण रावणं प्रति सन्देशप्रेषणञ्च, शेषभागे रामायणकथैवानुसृता।

महाकवि क्षेमेन्द्रः रामायणकथामाधारीकृत्य रामायणमञ्जरी नाम्ना एकं काव्यं विरचितवान्। अस्य भाषा मधुराः, सरसा सुबोधा चास्ति। कवि धनञ्जयस्य राघवपाण्डवीयम् काव्येऽपि रामायणस्य प्रभावः सुष्पष्टः। अत्र अष्टादशेषु सर्गेषु रामायणमहाभारतयोः कथां महता चातुर्येण निबद्धे। कविराज माधवभट्टः अपि द्वादशशतकान्तभागे राघवपाण्डवीयम् नाम अन्यम् एकं काव्यं विरचितम्। रामचरितम् काव्यस्य प्रणेता आसीत् अभिनन्दः। तस्य कृतिः रामचरितं नाम महाकाव्यं ३६ सर्गेषु विभक्तमासीत्। माधवभट्टविरचितं राघवपाण्डवीयं काव्यमपि रामायणकथामाधारीकृत्य विरचितं भवति। वामनभट्टवाणः त्रिंशत्पर्गात्मकं रघुनाथचरिताख्यं महाकाव्यं प्रणीतवान्। अस्मिन् काव्ये रामस्य चरित्रं निपुणतया चित्रितमस्ति।

घ) संस्कृत नाट्यसाहित्ये रामायणस्य प्रभावः -

रामायणाश्रितेषु नाटकेषु प्रथमतः भासस्य नाटकानां नामानि उल्लेखयोग्यानि।भासस्य नाटकत्रयोदशेषु प्रतिमानाटकम्, अभिषेकनाटकञ्च रामायणे मूले भवतः। प्रतिमानाटके रामायणप्रोक्त रामस्य पूर्वचरितमुपनिबद्धम्। अभिषेकनाटकं प्रतिमानाटकस्योत्तरार्द्धम्। अत्र हि रामायणस्य किष्किन्धा-सुन्दरयुद्धकाण्डगता कथा संक्षिप्योवर्णिताऽस्ति। कविः भवभूतिरपि रामायणकथामाश्रित्य महावीरचरितम्, उत्तररामचरितं चेति द्वे प्रसिद्धे रूपके विरचितवान्। महावीरचरितं वीररसप्रधाननाटकम्, यत्र सन्ति सप्ताङ्काः। नाटकमिदं रामायणीयां रावणवधान्तां कथामाश्रित्य विरचितम्। उत्तररामचरिते च रामायणोत्तरकाण्डगतां कथां भवभूतिः नाट्यरूपं दोयते।

कवि राजशेखरोऽपि बालरामायणं नाम एकं नाटकं रामायणकथामश्रित्य विरचितवान्। कविः मुरारिः रामायणकथामाधारीकृत्य अनर्घराघवं नामकं नाटकं रचयित्वा तस्य पाण्डित्यं प्रकाशयति। प्रसन्नराघवः इति नाम्मा नाटकस्य रचनाकारः कविः जयदेवः आसीत्। अस्मिन् नाटके रामायणस्य कथोपनिबद्धाऽस्ति। कवि दिङ्नागः कुन्दमाला नामकमेकं रूपकं विरचितवान्। इयं हि कुन्दमाला रामायणोत्तरकाण्डगतां सीतापरित्यागकथामाधारीकृत्य लिखिता। रामायण कथामनुसृत्य हनुमन्नाटकनाम्नाऽपि अपरं काव्यं लभ्यते। कथ्यते हि अस्य काव्यस्य प्रणेता पवनतनयो

हनुमानासीत्।

चम्पूसाहियेऽपि रामायणस्य प्रभावः सुष्पष्टमस्ति। चम्पूसाहित्ये प्रख्यात ग्रन्थाः रामायणचम्पू। अस्य प्रणेता भोजराजः। कथ्यते हि, किस्किन्धाकाण्डपर्यन्तं काव्यमिदं भोजराजेन विरचितम्, शिष्टं काव्यत्रयं तस्य पुत्रेण लक्ष्मणभट्टेन कृतम्।

दूतकाव्यमपि रामायणमाश्रित्य रचितं भवति। मेघदूतं कालिदासेन रामायणमनुसृत्य कथनं नासत्यम्। कालिदासः स्वयमपि तथ्यमिदं गोपयितुं नैच्छत्। स स्वयमेव मेघदूतेउल्लेखं क्रियते - 'इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा' इति। धोयी कवेः पवनदूतमपि रामायणमनुसृत्य रचितमासीत्।

अश्वघोषस्य रचनासु एव रामायणस्य प्रभावो दृश्यते। जैनकवेः विमलसुरिणः पउमचरितम् इति काव्येऽपि रामायणय्य प्रभावः सुस्पष्टः। आधुनिकभारतीयभाषासु रामायणस्यानुवादग्रन्थाः, तथा रामायणस्य कथामाधारीकृत्य विरचिता अन्ये ग्रन्याः च भारतीयवाङ्मयस्य गौरवं वर्धयन्ति। आधुनिकभारतीयभाषासु रामायणं सर्वप्रथमं तामिल भाषायाम् इशवीय एकादशशतके अनुदितम्। पश्चात् त्रयोदशशतके माधवकन्दली नाम्ना पण्डितः असमीयाभाषायां रामायणं अनुदितम्। तुलसीदासकृत रामचरितमानसं नामकं ग्रन्थो वाल्मीकिरामायणमेवाश्रितम्। किमधिकं मैथिली भाषायां विरचितम् अयं ग्रन्थः रामायणादपि अधिकतरं प्रसिद्धिं अलभत्। अधुना भारतस्य काऽपि भाषा नास्ति, यत्र रामायणस्य अनुवादो न जातः स्यात्। न केवलं भारतीयभाषा, परन्तु वैदेशिकीभाषायामपि रामायणस्य अनुवादेन आत्मानं धन्यं मन्यते। अतः उच्यते-

'यावत् स्थास्यति गिरयोः सरितश्च महीतले।
तावत् रामायणीकथा लोकेषु प्रचरिष्यति'॥ इति॥

१.७ रामायणकालीन समाजः

रामायणकालीन समाजे जनानां प्रमुखाजीवाः आसन् - कृषिकर्मणि, पशुपालनं, वाणिज्यं अपि च कुटीरशिल्पम् आदयः विशालानां शस्यक्षेत्राणां मध्ये ग्राममेकं प्रतिष्ठितम्। कृषिकर्मणां निमित्तं हलं मूलयन्त्रम् आसीत्। धान्यं, यवधान्यं, गोधूमं, तिलं, मांसं इत्यदयाः शस्यबीजानि आसन्। उत्पादितां कृषिफलानां (शस्यानां) एक षष्ठांशः शुल्करुपेण दातव्यम्। पशुपालनवृत्तिनिर्मितं गो-महिष-गर्दभप्रभृतयः जन्तवः व्यवहियते स्म। कुटीर-शिल्पानां मध्ये स्वर्ण-रजतैः प्रस्तुतानि अलङ्काराणि तथा कांस्य पीत्तलैः प्रस्तुतपात्राणि अपरं वस्त्रशिल्पं अपि तस्मिन् काले प्रचलितम् आसन्। अपरं तन्त्रमन्त्रविद्यानि, सूत्रधारम्, चारणं, वास्तुविद्या, वैद्यादिवृत्तयः प्रचलितं आसन्।

तस्मिन् काले जनाः विभिन्नानां पशुनां मांसानि भक्षितवन्तः तथापि गोवधं, ब्रह्महत्याः, शिशुवधं, स्त्रीवधं, अपरं स्वर्णादि द्रव्याणाम् अपहरणं पापम् इति मन्यते स्म। मृगमांसं तस्मिन् काले अतीव प्रियखाद्यम् आसीत्। मत्स्यव्यवसायोऽपि सम्प्रदायविशेषे प्रचलितं आसीत्। यौनसम्भोगे अपि च युद्धक्षेत्रे उत्तेजनासृष्टिं हेतु सुरापानस्य रीतिं यद्यपि प्रचलितं आसीत् तथापि विद्वान् समाजे सुरापानं निषिद्धरूपेण परिगणितं आसीत्।

रामायणे तत्कालीनसमाजस्य धर्मीय विश्वासस्य च संस्कारस्य चित्रणोऽपि चित्रितं अस्ति। रामायणे सतीदाहप्रथायाः उल्लेखं नास्ति। समाजे केषाम् अन्धविश्वासाणां प्रचलिनमासीत्। यथा- उद्दोयमानां वायसानां कर्कशानि शब्दानि च उल्कापात- दर्शनम् इत्यादयाः अशुभानि चिह्नानि इति परिगण्यते। रामायणे पारिवारिक नीतिविधानोऽपि उल्लेखो अस्ति। बालोः सुग्रीवस्य पत्नोग्रहणस्य अपराधप्रसङ्गे रामस्य यानि वचनानि तानि तदानीन्तन समाजस्य इतिहासः-

औरसीं भगिनीं वापि भार्या वाप्यनुजस्य यः।
प्रचरेत् नरं कामार्तस्य दण्डो वधः स्मृतः।।

समाजे ब्राह्मणस्य स्थानमासीत्, सर्वोच्च। ब्राह्मणाः अध्ययन-अध्यापना, यजमानि इत्यादयः वृत्तिरूपेण ग्रहणं अकुर्व्वन्। रामायणकालीन अस्त्रसम्प्रदायाः अशिक्षितः इति प्रतीयन्ते। रामायणे वृक्ष-शिलाभिश्च प्रहृयन्ते। अत्याधिकरूपेण कायिकबलस्य प्रयोगं दृश्यते। रामायणमहाकाव्ये वयं आर्य अनार्य उभययोः समाजयोः रूपं स्पष्टंरूपेण पश्यामः। यत्र रामः आर्यसमाजस्य तथा च रावणः अनार्यसमाजस्य प्रतिनिधिः आसीत्। रावणः भोगवादी च रामः त्यागवादी आसीत्।

रामायणकाले राजनैतिक व्यवस्थाऽपि उन्नतः आसीत्। जेष्ठपुत्रः उत्तराधिकारीरूपेण राज्यस्य शासनदण्डं गृह्णातिस्म। राजाः प्रजानां पुत्रवत् पालयन्तिस्म। प्रजानां मध्ये राजा आदर्शवान् पुरुषः आसीत्। रामः प्रजानां प्रियभाजनं आसीत्। प्रजारुञ्जनं हेतुः सः पुनर्वारं सीतां वने विसर्जयति स्म। तदानीन्तन समाजः आसीत् सुपरिकल्पिताः। पितृवाक्य पालनाय पुत्रस्य वनवासग्रहणम्, भातृस्नेहवशात् अनुजस्य आनुगत्यः, भारतीयरमणेः पतिभक्तिः इत्यादीनां दृष्ट्वा सत्यनिष्ठा एवं दायित्वबोधमं एव तदानीन्तन समाजस्य मूलम् इति वक्तुं शक्नुमः।

रामायणे जातीयतावादं एवं सूचयति -

इयं स्वर्णलङ्का न मे रोचते लक्ष्मणः।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥

रामायणकालीन समाजे दान-यज्ञ-याग तपस्या इत्यादयाः समाजस्य प्रधानंगाः आसन्। अपि च रामायणकालीन समाजे नास्तिकतावादी आदर्शोऽपि प्रचलितम् आसीत्। यदा रामः वनवासग्रहणं अकरोत् तदा जावालिः रामं आदर्शहीनं तथा भोगवादीवचनम् अवदत् -

दानसंवनना ह्येते ग्रन्था मेधाविभिः कृता।
यजस्व देहि दोक्षस्व तापस्तप्यस्व सन्त्यज॥
स नास्ति परिमित्येतत् कुरु वृद्धिं महामते।
प्रत्यक्ष यत यदा तिष्ठ परोक्षं पृष्ठतः कुरु॥

रामायणकालीन समाजे वेदवर्णितस्य परब्रह्मणः इन्द्रादि देवगणस्य च प्राधान्यं अवलुप्य देवत्रयाणां ब्रह्मा-विष्णु-महेश्वराणां अपि च गणेश-कुवेर-दुर्गादीनां प्राधान्यं दृश्यन्ते॥

१.८ रामायणस्य काव्यिकसौन्दर्यम्

रामायणमादिकाव्यम्। आदिकाव्यत्वमिति शब्दस्य आदिशब्देन श्रेष्ठं प्रथमं वा बुध्यते। रामायणं महाकार्व्येषु श्रेष्ठं प्रथमञ्च। विश्वसाहित्ये वाल्मीकेः रामायणं आदिकाव्यरूपेण परिगण्यते। वाल्मीकिरपि आदिकविरिति अभिधानेन ज्ञायते। वाल्मीकिरामायणैव लौकिक संस्कृतसाहित्यस्य आदिछन्दः आविष्करोति। सः श्लोको यथा –

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥

अत्र श्लोकछन्दसः अनुष्टुवो वा व्यवहारः सर्वप्रथमं क्रियते कविना। महाकाव्येषु रामायणं हि श्रेष्ठमिति विश्वस्य साहित्यिकानां मतम्। रामायणस्य प्रत्येकस्मिन् शब्दे मानवस्य आदर्शस्य नीतिज्ञानस्य च यानि सुन्द्राणि वर्णनानि सन्ति, तानि विश्वस्य अन्य कुत्रापि ग्रन्थे नास्ति। भारतीयार्यसमाजस्य आदर्शः यथा तत्राडिकतो भवति, न कुत्रापि अन्येषु। पिता– पुत्रयोः सम्बन्धः, पतिपत्योः, प्रेमः, ज्येष्ठ्य – कनिष्ठयोः स्नेहश्च यथा रामायणे वर्णितो भवति,न अन्यस्मिन् काव्ये। रामायणे वर्णित मानवरूपेण रामस्य पत्नोरूपेण सीतायाः, भातृरूपेण लक्ष्मण–भरत–शत्रुघ्ननाम्, भक्तरूपेण हुनुमतः, मातृरूपेण कौशल्यायाः सुमित्रायाः आदर्शाः रामायणं श्रेष्ठं आसनं ददति। प्रजापालकरूपेण रामायणस्य नायकस्य रामस्य या भूमिका सा अतीव विरल। रामस्य चरित्रस्य यत सौकार्यं महत्वञ्च, नान्यत्र कस्मिन्नपि महाकाव्ये। सत्यरक्षणमेव मानवजीवनस्य श्रेष्ठो धर्म इति यत् दृश्यते। रामायणे महाकाव्ये, तदेव सनातन हिन्दुधर्मस्य मुख्य लक्ष्यम्।

रामायणमहाकाव्ये सर्वप्रथमतः गणतन्त्रस्य भावादर्शः विद्यते इत्येपि वक्तुं शक्यते। राज्यादपि प्रजाः श्रेष्ठाः इति वाल्मीकैः मतम्। अतः काव्यमिदं भारतवर्हिभुतेषु राज्येषु अपि अति समादरं लभते। न किमपि काव्यं रामायणं यथा तथा समाहृतं भवति विश्वसाहित्ये। अतः काव्येषु श्रेष्ठं काव्यं रामायणम्। सर्वे रसाः अत्र कविना नैपून्येण व्यवहताः ये खलु मानवहृदयं स्पृशन्ति। रामायणं करुणरसात्मक काव्यम्। परन्तु अन्यान्यो रसाऽपि अत्र वर्तन्ते। यथा– वीररसः प्रधान युद्धकाण्डः। रसः वर्णने वाल्मीकि सिद्धहस्तः आसीत्, अतः वाल्मीकि रससिद्धाः कवीश्वराः इति ख्यातम्। अतः सम्यगुक्तं श्लेगेल (Schlegel) महाभागेन यद् रामायणं हि महाकाव्येषु महत्वमिति (The noblest of the epics)। सर मोनियेर उइलियाम्स (Sir Monier Williams) इति नाम्नां पण्डितेनापि उक्तं यद् रामायणं हि विश्वसाहित्यस्य मधुरतरं काव्यमिति (There are in the whole range of the worlds literature few more charming poem than the Ramayana).

महर्षि वाल्मीकिना रामायणे रामस्य पूर्णमानवरूपं प्रकटं क्रियते। अत्र यादृशः महत् आदर्शाः कविना प्रकाशिता तादृशारूपा कुत्पितारूपमपि प्रकाश्यते। कविना रामेण आत्मानः स्वार्थं परित्यज्यते तथैव कैकेय्या स्वाथान्धतां प्रतिपाद्यते। सीता पातिव्रत्यं रक्षति, अपरञ्च अहल्यायाः स्खलनं च शूर्पनखायाः कामुकता दर्शयते। सीतां प्रति रामस्य विरहं प्रकटयतुं विप्रलम्भशृंगाररसस्य

प्रयोगं अतीव मर्मस्पशी। कविना अग्निपरीक्षाकाले सीतायाः यादृशं धैर्य-गुणं प्रकाश्यते तस्मात् भारतीय पतिव्रता नार्यः सहनशीलताम् प्रदर्शयति।

रामायणस्य भाषा सुरसा सरलाः अपि च विशुद्धाः। यद्यपि रामायणं प्राचीनं ग्रन्थं तथापि काव्यस्य भाषालालित्यं कालिदासादि प्रभृतीनां कविनां कविभ्योः न हीनाः। अलङ्कारणां प्रयोगेऽपि वाल्मीकिः सिद्धहस्तः आसीत्। प्रकृति वर्णनाय प्रसङ्गे अपि रामायणस्य स्थानं अतीव उच्चम्। रामायणे यानि नदीनां अथवा अन्यजलराशिनां, पर्वतानां वर्णना सन्ति तानि परवर्ती कविनां काव्यसर्जनस्य आधारस्वरूपम्।

उपमा अलङ्कारस्य प्रयोगे यद्यपि कालिदासः श्रेष्ठ इति पण्डिताः मन्यते, तथापि सोऽपि उपमा प्रयोगकलायां वाल्मीकेः निकटं ऋणी॥

१.९ रामायणस्य बालकाण्डस्य प्रथमसर्गः

वाल्मीकिरामायणस्य प्रथमकाण्डं बालकाण्डमस्ति। अस्मिन् बालकाण्डे ७७ सर्गा अपि च २२८० श्लोकाः सन्ति।

'बालकाण्डे तु सर्गाणां कथिता सप्तसप्ततिः।
श्लोकानां द्वे सहस्रे च सशीति शतकद्वयम्'।।

बालकाण्डे श्रीरामचन्द्रस्य जन्मः, तस्य बाल्यकालस्य विवरणानि, विश्वामित्राश्रमे यज्ञरक्षाः, तारकासुबाहु आदयः राक्षसानां निधनं, अहल्यायाः अभिशापनं मुक्तिश्च, हरधनुभङ्गं कृत्वा सीतया सह विवाहः इत्यादयः सन्निविष्टाः सन्ति।

बालकाण्दस्य प्रथमसर्गे १०० श्लोकाः सन्ति। सर्गेऽयं 'मूलरामायणम्' इत्यनेन प्रख्यातम्। अस्मिन् सर्गे श्रीरामचन्द्रस्य गुणानुकीर्तनम्, रामराज्यस्य प्रशंसाः, रामचरित्रपाठस्य सुफलानि च वर्णितमस्ति अत्र नारदवाल्मीकयोः कथोपकथनमाध्यमेन संपूर्णः रामकथा संक्षेपेण वर्णितमस्ति।

१.१० बालकाण्डस्य कथावस्तुः

रामयणस्य बालकाण्डस्य प्रारम्भे रामस्य रामस्य गुणानुकीर्तनं प्राप्यते। इक्ष्वाकुवंशोद्भवः रामो नाम नियतात्मा, द्युतिमान्, जितेन्द्रियः एकः सद्पुरुषः आसीत्। सः सर्वगुणैरुपेतः सः पुरुषत्तोमः पितरयो आहल्यादप्रदासकः आसीत्। तस्य सुदर्सनस्य सुवदनस्य प्रियदर्शनस्य च गुणराशिसम्बन्धे एवं प्राप्यते - सः द्युतिमान्, नीतिमान् वाग्मी, श्रीमान्, शत्रुनिर्बहनः, विपुलांशः, महाबाहुः, कम्बुग्रीवः, महाहनुः, महोरस्कः महेष्वासः, अरिन्दम्, आजानुवाहुः, सुशिरः, सुललाट, सुविक्रम, समविभक्ताङ्ग, स्निग्धवर्णः, प्रतापवान् पीनवक्षाः, विशालाक्षः, लक्ष्मीवान्, शुभलक्षणयुक्तः, धर्मज्ञः सत्यसन्धः, प्रजानां हिते रतः, यशस्वी ज्ञानसम्पन्नः, शुचिः, दक्षः, वश्यः समाधिमान्, प्रजापतिसमः, श्रीमान्, धाता, रिपुनिषूदनः, जीवलोकस्य रक्षिता, धर्मस्य परिरक्षिताः, वेदवेदाङ्गतत्वज्ञ, धनुर्वेदे निष्ठितः, सर्वशास्त्रार्थतत्वज्ञः, स्मृतिमान्, प्रतिभानवान्, सर्वलोकप्रियः, साधुः, अदीनात्मा,

विचक्षणः, सिन्धुभिः समुद् प्रव सर्वदा स सद्धि अभिगतः, आर्यः, सर्वसमः, सदैव प्रियदर्शनः, सर्वमुणोपेतः, कौसल्यानन्दवर्धनः, गाम्भीर्ये समुद्र इव, धैर्येण हिमवान् वोर्ये विष्णुना सदृशः, सोमवत् प्रियदर्शनः, क्रोधे कालाग्निसदृशः, क्षमया पृथिवीसमः दाने कुवेरसम च अस्ति।

ज्येष्ठं गुणयुक्तं रामं पिता दशरथः युवराजपदं दातुं इच्छयामासः। परन्तु पूर्व दत्तवरादेवी भार्या कैकैयी तस्य अभिषेकसंभारान् दृष्ट्वा रामस्य निर्वसनं भरतस्य अभिषेचनं च वरं एनं अयाचत्। धर्मपाशेन आबद्धः सः राजा दशरथः प्रियपुत्रं रामं निर्वासनयामसः। सः रामोऽपि पितुः सत्यरक्षार्थ वनं जगाम। रामस्य प्रियभ्राताः सुमित्रानन्दन लक्ष्मणः रामं अनु अनुजगामः। तस्य पत्नीसीतादेवीमपि त्वं अनुगता। यथा रोहिणी शशिनं पौरैः पित्रा दशरथेन च दूरं अनुगतः। सः धर्मात्मा रामचन्द्रः गङ्गाकुले शृङ्गिवेरपुरे प्रियं निषादाधिपतिं गुहं प्राप्य सूतं व्यसर्जयत्। रामचन्द्रः गुहेन, लक्ष्मणेन, सीतया च सहित वनेन वनं गत्वा, बहूदकाः नदीं तीर्त्वा, भरद्वाजस्य शासनात् चित्रकूटम् अनुप्राप्य रम्यम् आवसथं कृत्वा देवगन्धर्वसंकाशः वने रममाणः ते त्रयः सुखं न्यवसन्। रामचन्द्रस्य वनगमनस्य पश्चात् पुत्रशोकातुरः दशरथः सुतं विलपन् दिवंगतवान्। दशरथस्य मृत्योः पश्चात् वसिष्ठप्रमुखैः द्विजैः राजारूपेण भरतं नियुजितवान्। परन्तु भरतः राज्यशासनं कर्तुं न ऐच्छेत्। अतः सः रामस्य प्रसन्नार्थं वनं जगमः। सः भरतः रामसमीपं गत्वा आर्यभावपुरस्कृतः सन् ज्येष्ठभातृः रामं निवेदयत् - 'त्वम एव राजा'। परन्तु पितुः आज्ञा पालनार्थ दृढप्रतिज्ञावद्धः रामः राज्यं न ऐच्छत्। महाबलः भरताग्रजः रामः अस्य राज्याय पादुके न्यासं दत्त्वा पुनः पुनः भरतः ततः निवर्तयामासः च। सः भरतः काममम स्वस्य उद्देश्यम् अनवाप्य रामपादौ वन्दनं कृत्वा रामस्य प्रत्यावर्तनकाङ्क्षया नन्दिशग्रामात् राज्यशासनमकरोत्। भरते गते रामचन्द्रः तु नगरस्य जनस्य पुनः तत्र अगमनं इति चिन्तया दण्डकारण्ये प्रविवेशः। पद्मलोचनः रामः दण्डकारण्ये विराधं नामकं एवं राक्षसं निधनं कृत्वा शरभङ्गमुनिं साक्षातं कृतवान्। तत्पश्चात् सः सुतीक्षणं, अगस्त्यं, अगस्त्यभ्रातरं च ददर्शः। तत्रैव रामः अगस्त्यवचनात् एव ऐन्द्रं शरासनम्, खड्गं च अक्षयसायकौ तूणी जग्राह। वने वनचरैः सह वसतः तस्य रामस्य पार्श्व सर्वे ऋषयः असुररक्षाम् वधाय अभ्यागमन्। तदा रामः वने राक्षसान् वधितुं प्रतिक्षयामासः। तत्रैव सः शूर्पणखानाम्ना एकां कामरूपिणीं राक्षसीं विरूपिता। साः शूर्पणखावाक्याद् उद्युक्तान् खरं त्रिशिरसं च एव दूषणं राक्षसं च एव तेषां पदानुगान् च एव रणे निजधान। तस्मिन् एव वने सः रामः जनस्थाननिवासिनां चतुर्दशसहस्राणि संख्यकाः, राक्षासान् निधनं अकरोत्। राक्षसराजः रावणः तत् ज्ञातिवधं श्रुत्वा क्रोधान्वितं भूत्वा मारीचः इति नाम्ना अन्यमेकं राक्षसं सहायं. वरयामासः। मारीचः रावणं रामेण सह युद्धकर्तुं वारयामासः। परन्तु-

'किं करिष्यन्ति वक्तारः श्रोता यल न विद्यते।
नग्नक्षपणके देशे रजकःकिं करिष्यति'।।

कालचोदितः रावणः तदाक्यम् अनादृत्य मारीचेन सह रामस्य आश्रमपदं जगाम। आश्रमे मायावी मारीचः तौ नृपात्मजौ (राम-लक्ष्मणौ) यदा दूरम अपवाह्य तदा रावणः जटायुषं नामकं गृध्रं हत्वा रामस्य भार्यां अपहृतवान्। यदा रामः आश्रमं प्रत्यावर्तनं अकरोत् तदा गृध्रं निहतं दृष्ट्वा

मैथिलीं च अपहृतां श्रुत्वा अतीव शोकाभिभूतं अभवत्। ततः जटायुषं गृध्रं अग्निसंस्कारं कृत्वा, तेनैव शोकेन वने सीतां मार्गमाणः विकृतरूपं घोरदर्शनं कबन्धं नाम राक्षसं सन्मुखोऽभवत्। रामः कबन्धं निहत्य अग्निसंस्कारं अकरोत्। मृत्युसमये सः कबन्धः गन्धर्वरूपधारणं कृत्वा रामचन्द्रं धर्मचारिणीशवरीसमीपं गन्तुं उपदिदेशः। तदा रामः शबर्या समीपं अगच्छत्। रामचन्द्रः शबर्या सम्यग् पुजयित्वा पम्पातीरे हमुमता वानरेण सह मिलितवन्तः। तद् हनुमद्वचनात् एव रामः सुग्रीवेन सह मैत्रीं कृतवान्। रामचन्द्रः सुग्रीवां तस्य सर्ववृत्तान्तं अकथयत्। वानरः सुग्रीवः अपि रामस्य तत् सर्ववृत्तान्तं श्रुत्वा प्रीतः सन् तेन सह अग्निं साक्षी कृत्वा सव्यं चकारः। तत्पश्चात् रामः सुग्रीवस्य सह वानरराजस्यवाली वैरानुकथनं श्रुत्वा प्रणयाद् वालिवधकर्तुं प्रतिज्ञयामासः। रामस्य शक्तिसम्बन्धे वानरः सुग्रीवः शङ्कित सन् वालिनः वलविक्रमविषये कथयामासः। सुग्रीवः रामप्रत्ययार्थं महापर्वतसन्निभम् उत्तमम् दुन्दुभेः कायं दर्शयामासः। महावलः रामः उत्स्मयित्वा अस्थि प्रेक्ष्य च पादाङ्गुष्ठेन सम्पूर्णं दशयोजनं निक्षेप। तत्पश्चात् पुनः सुग्रीवप्रत्ययार्थं एकेन एव महेषुणा सप्ततालान् गिरिं रसातलं च विभेदः कृतः। तदा प्रीतमनाः सुग्रीवः तेन विश्वस्तः रामसहितः च किष्किन्धां गुहां गत्वा अगर्जत्। तद् गर्जनं श्रुत्वा हरीश्वरः (कपिश्रेष्ठः वाली) निर्जगमः। सुग्रीविण सह युद्धसमये रामः एकेन शरेण वालीवधं अकरोत् द्य वालिनं हत्वा रामः तद्राज्ये सुग्रीवमेव राजारूपेण अभिषिक्तम्। वानरर्षभः सः सर्वान् वानरान् समानीय जनकात्मजां दिदृक्षु दिशः प्रस्थापयामासः। ततः हनुमान् सम्पातिः इति नाम्ना गृधस्य वचनात् शतयोजनविस्तीर्णं लवणसागरं पुप्लुवे द्य तत्रेव सः रावणरक्षितां लङ्कापुरीं प्राप्य अशोकवनिकां गत्वा ध्यायन्तीं सीतां ददर्शः। स्वस्य अभिज्ञानं प्रवृत्तिं च सीतां प्रदाय समाश्वास्य च हनुमान् तोरणं मर्दयामास। सः पञ्च सेनाग्रगान् सप्तमन्त्रीसुतान् च हत्वा वीरम् अक्षं निधनं कृत्वा च ग्रहणं समुपागमत्। हनुमानः पैतामहाद् वराद् अस्त्रेण उन्मुक्तम् आत्मनं ज्ञात्वा तान् यन्त्रिणः राक्षसान् यदृच्छया मर्षयन् आसीत् द्य तत्पश्यात् सः महाकपिः अशोकवनं ते समग्र लङ्कानगरीं दग्ध्वा रामाय सीतावार्तां प्रदातुं तत्स्थानात् जगाम।

सः हनुमानः रामम् अधिगम्य प्रदक्षिणं कृत्वा 'सीता दृष्ट्वा' इति तत्त्वतः न्यवेदयत्। हनुमानस्य वचनं श्रुत्वा रामः सुग्रीवसहितः महोदधेः तीरं गत्वा सूर्यसमः शरैः समुद्रं क्षोभयामास। रामस्य क्रोधं दृष्ट्वा सरित्पतिः समुद्रः अत्मानं दर्शयामास च रामः समुद्रवचनात् एव नलं सेतुम् अकारयत्। रामः तेन सेतुना लंकानगरीं गत्वा समरे रावणं निहत्य सीताम् उद्धारम् अकोरत्। तत्पश्चात् रामवचनानुसारेण सीतादेवी अग्नौ विवेश। ततः अग्निवचनात् सीतां विगतकल्मषां ज्ञात्वा महात्मनः राघवस्य तेन महता कर्मणा सदेवर्षिगणाः, सचराचरं त्रैलोक्यं तुष्टम् अभूत् राजारूपेण लंङ्कायाः विभीषणं अभिषिक्तम्। देवताभ्यः वरां प्राप्य युद्धे मृत्युभूत्वा मृतवानरान् पुणर्जीवनं प्रदाय सः रामः सुहृदवृतः पुष्पकेन अयोध्याभिमुखं यात्रां अकरोत्। सत्यपराक्रमः रामचन्द्रः प्रथमे भरहाजाश्रमं गत्वा भरतस्य समीपं हन्तुमन्तं व्यसर्जयत्। ततः सुग्रीवसहितः तत् पुष्पकम् पुनः समारुह्य आख्यायिकां जल्पन् नन्दिग्रामं ययौ। नन्दिग्रामे भातृभिः सहितः रामचन्द्रः जटां हित्त्वा सीतासहित पुनः राज्यम् गृहीतवान्। रामराज्यसम्बन्धे बालकाण्डे उल्लिखितमस्ति यत् पुष्टः तुष्टः

सुधार्मिकः निरामयः अरोगः, दुर्भिक्षभयरहितः च भविष्यति कोऽपि पुरुषः क्वचित् पुनर्मरणं न दृश्यति, नार्यश्च अविधवाः नित्यं प्रतिव्रताः भविष्यन्ति। अग्निभयं कदापि न, अप्सु जन्तवः न मज्जन्ति च वातजं भयं कदापि न तथा ज्वरकृतमपि कदापि न भविष्यति। महायशा राघवः बहुसुवर्णयुक्तैः अश्वमेधशतैः दृष्ट्वा तथाविद्वद्भ्यः गवां कोट्ययुतं विधिपूर्वकं प्रदाय ब्राह्मणेभ्यः असंख्येयं धनं प्रदाय शतगुणान् राजवंशान् स्थापयिष्यन्ति। चातुवर्णम् अपि स्वे स्वे धर्मे नियोक्ष्यति च। रामः दशवर्षसहस्राणि दशवर्षशतानि च राज्यशासनकृत्वा ब्रह्मलोकप्राप्तं भविष्यति।

यः लोकः प्रतद् आयुष्यम् रामोपाख्यानं पठन् सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते। रामचरितपठनद्वारा ब्राह्मणः शब्दब्रह्मपारंगत्वं प्राप्नुयात् क्षत्रीयः भूमिपतित्वम् ईयात् वैश्यः धनसमृद्धिं प्राप्नुयात् शूद्रः जनः च अपि महत्वम् ईयात् रामकथायाः महत्वं सर्वत्र सर्वकालेषु विद्यते।

१.११ प्रक्षिप्तरूपेण बालकाण्डम् एकम् अवलोकनम्

समग्ररामायणं सप्तकाण्डात्मकम् तद् यथा- बालकाण्डम्,अयोध्याकाण्डम्, अरण्यकाण्डम्, किस्किन्धाकाण्डम् सुन्दरकाण्डम्, युद्धकाण्डम्, उत्तरकाण्डञ्च इति। किन्तु केनचित् कारणेन एतत् प्रतीयते यत्-प्रकृतं रामायण द्वितीयकाण्डात् आरभ्यः षष्ठकाण्डपर्यन्तं एव आसीत्। अर्थात् मौलिकरामायणम् अयोध्याकाण्डदारभ्यः युद्धकाण्डपर्यन्तं लङ्काकाण्डशेषं वा आसीत्। अपरे द्वे काण्डे कालीत्तरे प्रक्षिप्ते इति विदुषां मतम्। उत्तरकाण्डे आख्यानानि अनेकानि दृश्यन्ते, येषां रामायणस्य प्रकृत घटनयासह सम्बन्धो नास्ति उदाहरणं यथा-

उत्तराकाण्डे प्रारम्भिकांशे राक्षसोत्पत्तेवर्णनं रावणेन सह इन्द्रस्य युद्धवर्णनं, हनुमतो यौवनवर्णनम् इति अनेकानि वर्णनानि दृश्यन्ते यानि मूलवर्णनीय विषयस्य गतौ पर्याप्तं वाधां आरोपयन्ति। एवं च बालकाण्डे अपि पर्याप्ताः अंशाः दृश्यन्ते ये वस्तुतः मौलिकरामायणे न सम्मिलिताः भवेयुः। अत एव आद्यन्तं काण्डद्वयं बाल्मीकिभिन्नकविना रचितमिति मन्यते। मतमिदं स्थिरीकरणे निम्नोक्त विषयाः स्मरणीय यया-

(क) भाषाशैलीः = रामायणस्य द्वितीयकाण्डात् आरभ्यः षष्ठकाण्डपर्यन्तं रामायणीभाषा विशुद्धा परिस्कृता च क्वचित् अलङ्कार-मण्डिता भवति। उपमारूपके चास्य परमरमणीये दर्शनीये च भवतः। शब्दार्थयोः प्रसादगुणमयत्वं काव्यस्यास्य प्रणेतुः कोऽपि महान् अन्यकवि-व्यतिरेकी गुणो भवति। परन्तु आद्यन्तकाण्डद्वयस्य (बालकाण्ड-उत्तरकाण्डञ्च) भाषा तथा शैली अवशिष्टेभ्यः पञ्चकाण्डेभ्यः निकृष्टाः इति मन्यते।

(ख) उक्ते काण्डद्वये अनेकानि परस्परविरोधी विवरणानि दृश्यन्ते। बालकाण्डस्य विभिन्नानि आख्यानविवरणानि भिन्नकाण्डानां विवरणेभ्यः विरुद्धानि। उदाहरणार्थं लक्ष्मणकुमारस्य विवाहो दृष्टव्यः।

(ग) द्वितीयकाण्डात् आरभ्यः षष्ठकाण्डपर्यन्तं यद्यपि मौलिकं तथापि प्रक्षिप्ताः श्लोकाः प्राप्यन्ते। किन्तु प्रक्षिप्तम् अंशं वर्जयित्वा अवशिष्टे अंशे रामम् आदर्शवीरपुरुषरूपेण वर्णितमस्ति आदगन्त काण्डद्वये स हि विष्णोरेव अवतारः इति परिगण्यते।

(घ) बालकाण्डे रामोपाख्यानस्य द्वे अनुक्रमणिके प्राप्यते। तयोः प्रथमा प्रथमसर्गे द्वितीया अनुक्रमणिका तु तृतीय सर्गे विद्यते। तयोः अन्यतरानुक्रमणिकायाम् आद्यन्तः काण्डद्वयस्य उल्लेख न विद्यते।

जेकोवि (Hermann Jacobi was a European Indologist and scholar) महोदयस्तु अयोध्याकाण्डदारभ्य युद्धकाण्डन्तं काण्डपञ्चकमेव वाल्मीकेः कृतिमितिमन्यते। लङ्काकाण्डस्य अन्त्ये ग्रन्थस्य समाप्तिः इव प्रतिभाति। उत्तरकाण्डे वर्णिता प्रतिपद्यानां सुचना च प्राक्तनकाण्डेषु नायाति इति जेकोवि महोदयस्य कथनस्यमूलम्। तथापि उत्तरकाण्डस्य रसनम् ईषापूर्व तृतीयशतकात् पूर्वमेव सम्भवति। यतः अत्रोपलब्धः एकः श्लोकः ई.पू. तृतीयशतके विरचिते दशरथजातके पालिभाषयाम् अनुदितरूपेण प्राप्यते।

रामायणस्य मुख्यतया त्रीणि संस्करणानि लभ्यन्ते। तेषु एकस्य संस्कारणस्य श्लोकाः इतराभ्यां भिन्ना अपि प्राप्यन्ते। अतः ते श्लोकाः प्रक्षिप्ता इति बोद्धव्याः। किन्तु प्रधानसंस्करण त्रये कतमं संस्करणं मूलरामायणानुकूलमिति कथयितुं न शक्यते। सर्वजनप्रिय रामोपाख्यानस्य गीतं कालात् कालान्तरं कुशीलवैः कृतम्। अत एव यत्र यत्र एकं वा द्वयं वा श्लोकानां नूतनैः गायकैः संयोजितमिति बोध्यम्। अतः उच्यते यत् मूलरामायणमिदानीन्तनस्य रामायणस्य एकतृतीयांशं केवलमासीदिति शम्।

१.१२ रामायणस्य बालकाण्डे वर्णितं रामचरितम्

महाकविना वाल्मीकिना तेन कृत्यस्य रामायणमहाकाव्यस्य बालकाण्डस्य प्रथमसर्गे श्रीरामचन्द्रस्य चरित्रं मर्यादापुरुषोत्तमरूपेण अङ्कितं भवति। देवर्षिनारदस्य वाल्मीकिना सह भूत्ता कथोपकथनमाध्यमेन रामचरितम् अत्र उपस्थाप्यते। रामः आसीत् इक्ष्वाकुवंशोद्भवः धीरोदात्तः पुरुषः।

सः रामचन्द्रः नियतात्मा, महावीर्य, द्युतिमान्, धृतिमान्, वाग्मी, बुद्धिमान्, नीतिमान्, वशी, श्रीमान् शत्रुनिबर्हणः, विपुलांसः, महाबाहुः कम्बुग्रीवः महाहनुः च अस्ति। सः महोरस्को महेष्वासो गूढजत्रुरिंदम्, आजानुबाहुः, सुशिराः, सुललाटः, सुविक्रमः च अस्ति –

महोरस्को महेष्वासो गूढ़जत्रुरिंदमः।

आजानुबाहुः सुशिराः सुललाटः सुविक्रमः।। (बालकाण्डम्– १/२०)

सः धर्मज्ञः, सत्यसन्धः, प्रजानां हिते रतः, यशस्वी, ज्ञानसम्पन्नः, शुचिः, वश्यः, समाधिमान् च अस्ति। सः प्रजापतिसमः श्रीमान, धाता, रिपुनिषूदनः, जोवलोकस्य रक्षकः, स्वस्य धर्मस्य रक्षकः स्वजनस्य च रक्षकः, वेदवेदाङ्गतत्वज्ञो, धनुर्वेदे निष्ठितः च अस्ति–

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रचिता।

वैदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः।। (बालकाण्ड, १/२४)

सः सर्वशास्त्रर्थतत्वज्ञः, स्मृतिमान्, प्रतिभावान्, सर्वलोकप्रियः, साधुः अदीनात्मा, विचक्षणः च अस्ति। सः सिन्धुभिः समुद्र इव सर्वदा सद्भिः अभिगतः अस्ति। सः आर्यगुणान्वितः, सर्वसमः

এব, সদৈব প্রিয়দর্শনঃ, চ অস্তি। সঃ সর্বগুণোপেতঃ, মাতৃঃ কৌসল্যানন্দবর্ধকঃ, গাম্ভীর্যে সমুদ্র ইব ধৈর্যেণ হিমবান্ ইব চ অস্তি –

স চ সর্বগুণোপেতঃ কৌসল্যানন্দবর্ধনঃ ঘ
সমুদ্র ইব গাম্ভীর্যে ধৈর্যেণ হিমবানিব॥ (বালকাণ্ড, ১/১৭)

সঃ পরাক্রমে বিষ্ণুনা সদৃশঃ, সোমবৎ্ প্রিয়দর্শনঃ, ক্রোধে কালাগ্নিসদৃশঃ, ক্ষমযা পৃথিবীসমঃ চ অস্তি। সঃ দানে কুবেরসমঃ, সত্যে অপরঃ ধর্মরাজইব অস্তি। এবং দশরথনন্দনঃ রামঃ ভিন্নগুণসম্পন্নাবান্ অস্তি।

১.১৩ অধ্যায়স্য অসমীয়া ভাষাযাম্ সারাংশঃ

ৰামায়ণৰ, বালকাণ্ড –

ৰামায়ণৰ ৰচক মহর্ষিবাল্মীকি। ৰামায়ণত মুঠ সাতটা কাণ্ড আৰুপ্রায় শ্লোক আছে। ৰামায়ণৰ সাতটা কাণ্ড হ'ল-

(ক) বালকাণ্ড
(খ) অযোধ্যা কাণ্ড
(গ) অৰণ্য কাণ্ড
(ঘ) কিষ্কিন্ধা কাণ্ড
(ঙ) সুন্দৰ কাণ্ড
(চ) যুদ্ধকাণ্ড
(ছ) উত্তৰ কাণ্ড

ইয়াৰে প্রথম তথা সপ্তম কাণ্ড দুটা প্রক্ষিপ্ত অর্থাৎ মূল ৰামায়ণৰ অংশ নহয় আৰু পৰৱর্তী কালত মূল ৰামায়ণৰ সৈতে সংযোজন কৰা বুলি এচাম পণ্ডিতে ক'ব বিচাৰে। এই দুয়োটা কাণ্ডৰ কথা ভাগ আৰু ৰামায়ণৰ বাকী পাঁচটা কাণ্ডৰ কথাভাগৰ মাজত যথেষ্ট অমিল আৰু ভাষাশৈলীৰ ক্ষেত্রতো বহুতো ভিন্নতা দেখা পাই এই কাণ্ড দুটা পৰৱর্তী সময়ত মূল ৰামায়ণত সংযোজিত হোৱা বুলি কোনো কোনো পণ্ডিতে মত ব্যক্ত কৰিছে। যি কি নহওঁক, আমাৰ আলোচিত বালকাণ্ডৰ প্রথম সর্গত টা শ্লোক আছে। বাল্মীকিয়ে এই সর্গটোৰ দ্বাৰা সমগ্র ৰামায়ণৰ কাহিনীভাগ সংক্ষেপতে দাঙি ধৰিছে। সেয়েহে এই সর্গটোক বহুতে 'সংক্ষেপ ৰামায়ণ' বা 'বাল ৰামায়ণ' বুলিও ক'ব খোজে। বালকাণ্ডত ৰামায়ণৰ সৃষ্টিৰ ইতিহাস, দশৰথৰ ৰামচন্দ্রাদি চাৰিজন পুত্রলাভ, চাৰিপুত্রৰ বাল্যকালাদি বর্ণনা, মিথিলাৰ ৰাজসভাত ৰামচন্দ্রৰ দ্বাৰা হৰধনু ভংগ, ৰামচন্দ্রৰ বিবাহৰ বর্ণনা কৰা হৈছে। বালকাণ্ডৰ আৰম্ভণিত মহামুনি বাল্মীকিয়ে তেওঁৰ সন্মুখত উপস্থিত হোৱা দেৱর্ষি নাৰদক এজন গুণবান, ধর্মং, দৃঢ়, সত্যবাদী পুৰুষৰ বিষয়ে জনাৰ আগ্রহেৰে প্রশ্ন কৰে আৰু নাৰদে তেওঁৰ প্রশ্নৰ উত্তৰত দশৰথৰ পুত্র ৰামচন্দ্রৰ বিষয়ে বাল্মীকিৰ আগত ব্যক্ত কৰে। কৌশল্যানন্দন ৰামৰ গুণৰাশি বর্ণনা কৰাৰ লগতে পিতৃৰ আজ্ঞা মানি ৰামচন্দ্রৰ বনবাস গমন, বনত বিভিন্ন ৰাক্ষসাদি বধ কৰি ঋষিসকলৰ আশ্রম ৰক্ষা, তেওঁৰ পত্নী সীতাদেৱীক অপহৰণ

কৰা ৰাক্ষস ৰাৱণক হত্যা কৰি সীতাক উদ্ধাৰ আৰু তেওঁলোকৰ পুনৰ অযোধ্যালৈ প্রত্যাগমন আদি অনেক বৃত্তান্ত নাৰদ মুনিয়ে বাল্মীকিৰ সন্মুখত বর্ণনা কৰে।

আদিকাব্য হিচাবে আখ্যা পোৱা ৰামায়ণৰ ভাষাশৈলী অতি সুন্দৰ। হিন্দুসকলৰ ই এখন ধর্মগ্রন্থ। ৰামচন্দ্রৰ ত্যাগ-সাহস-ধৈর্য্য, লক্ষ্মণৰ ভাতৃপ্রেম, সীতাদেৱীৰ স্বামীভক্তি আদিয়ে এই কাব্যখনৰ সৌষ্ঠৱ বৃদ্ধি কৰিছে। পৰৱর্তী সময়ত এই কাব্যৰ অনুকৰণত অসংখ্য কাব্য-মহাকাব্য-নাটক আদি ৰচিত হৈছে। পৃথিৱীৰ প্রায় সকলোবোৰ ভাষালৈ এই কাব্যখন ইতিমধ্যে অনুদিতও হৈছে।



१.१४ अध्यायात् किमवगतम्

अध्यायात् वयं निम्नोक्तविषयाः ज्ञातवन्तः -

- समग्ररामायणस्य वृत्तान्तसम्बन्धे ज्ञातवन्तः।
- रामायणस्य प्रणेतुः वाल्मीके जीवनचरितविषये अपि ज्ञातवन्तः।
- रामायणस्य उद्भव-विकाशयोः विषयेज्ञातवन्तः।
- परवर्तीकालीन संस्कृतसाहित्ये रामायणस्य उपजीव्यत्वम् इति विषये ज्ञातवन्तः।
- रामायणकालीन समाज-संस्कृति विषये ज्ञातवन्तः।
- रामायणस्य काव्यिकसौन्दर्यविषये अपि ज्ञातवन्तः।



१.१५ ज्ञानाधिक्यम्

१) Sharma, Dr. Thaneswar (July, 1995), Sanskrit Sahityar Itiivrttva, Chandra Prakash, Panbazar, Guwahati-v.

२) अग्रवालः, आचार्य हंसराजः (१९८६) संस्कृतसाहित्येतिहासः, चौखम्बा सुरभारती प्रकाशन, वाराणसी.

३) दाहालः, आचार्य लोकमणि (१९९९) संस्कृतसांहित्येतिहासः, कृष्णदास अकादमी, वाराणसी.

४) मिश्र, आचार्य रामचन्द्र (२००३) संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन, वाराणसी-२२१००१.

५) पाण्डेय, डा. विजय शंकर, पाठकः, डा. जमुना (२०१३) संस्कृत निबन्ध मकरन्दः (प्रथमो / द्वितीयोभागः), चौखम्बा संस्कृत सीरीज आफिस, वाराणसी.

६) उपाध्याय, रामजी, संस्कृत निबन्धावलिः, चौखम्बा विद्याभवन, वाराणसी.

७) Saikia Bora, Dr. Indira सोमहाल्मीकी यरामायणम् बालकाण्डम्, प्रथमः सर्गः, Bani Prakash Mandir. Panbazar, Guwahati- 781001.

८) वासिष्ठः, प. शिवरामशर्मा, रामायणम् (सम्पा.), Chaukhamba Sanskrit Pratishthan, Jawahar Nagar, Delhi-110007.



१.१६ अभ्यासप्रश्नाः

प्रश्नः १: रामायणमहाकाव्यस्य रचकः कः ?

प्रश्नः २: रामायणे कति संख्यकानि काण्डानि सन्ति ?

प्रश्नः ३: केन श्लोकेन महर्षेः वाल्मीकेः व्याधेन क्रौञ्चहननजन्यः शोकः व्यक्तोऽभवत् ?

प्रश्नः ४: रामायणस्य क्रमविकासस्य विषये नातिदीर्घो निबन्धो विरच्यताम्।

प्रश्नः ५: भारतीयवाङ्मयस्य रामायणाश्रितान्, काव्यान् अधिकृत्य कञ्चन् निबन्धो विरच्यताम्।

प्रश्नः ६: अधोलिखितेषु विषयेषु निबन्धः विरच्यताम्-

(क) रामायणकालीन समाजः

(ख) रामायणस्य काव्यिकसौन्दर्यम्

*** ***** ***

अध्यायः २ : रामायणम् (बालकाण्डः, प्रथमकाण्डम्, पाठ्याध्ययनम्)

अध्यायस्य संरचना

२.१ उद्देश्यम्

२.२ परिचयः

२.३ रामायणम्, बालकाण्डम् (प्रथमसर्गः)

२.४ व्याकरणगत टोका

२.५ अध्यायस्य असमीया भाषायां सारांशः

२.६ अध्यायात् किमवगतम्

२.७ ज्ञानाधिक्यम्

२.८ अभ्यासप्रश्नाः

२.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् –

- अस्मिन् अध्याये महर्षिवाल्मीकिप्रणीतं रामायणस्य बालकाण्डस्य श्लोकानां सरलार्थोऽस्ति। अनेन अध्यायेन बालकाण्डस्य संक्षिप्तं परिचयं ज्ञातुं शक्यते।
- बालकाण्डस्य मूलपाठांशोऽपि अस्मिन् अध्याये अस्ति।

२.२ परिचयः

बालकाण्डः रामायणस्य प्रथमः काण्डः अस्ति। अस्मिन्काण्डे महर्षिः वाल्मीकिः श्रीरामस्य जन्मकथां विस्तरेण वर्णयति। अयोध्यानगरे दशरथराज्ञः पुत्रकामेष्टियज्ञस्य विधानं, श्रीरामलक्ष्मणयोः विश्वामित्रमुनिना आश्रमगमनं, तस्य मार्गे ताडकावधः, महर्षिणा प्रदत्तानि दिव्यानि अस्त्राणि, अहल्याशापमोक्षणं च अत्र प्रमुखानि प्रसङ्गाः दृश्यन्ते। बालकाण्डे एव जनकनृपतेः यज्ञभूमौ श्रीरामस्य शिवधनुर्भङ्गः, ततः सीतायाः विवाहः, परशुरामसंवादश्च घटन्ते। एते सर्वे प्रसङ्गाः रामस्य दिव्यस्वरूपं तथा धर्मपरायणतां प्रकटयन्ति। अतः बालकाण्डः रामायणस्य मूलाधारः इत्यपि कथ्यते, यतोहि अत्र रामचरितस्य आरम्भः अस्ति। अस्मिन् अध्याये भवान् बालकाण्डस्य मूलपाठांशोऽपि पठितुं शक्नोति।

२.३ रामायणम्, बालकाण्डम् (प्रथमसर्गः)

तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥ १ ॥

सरलार्थः - तपः स्वाध्यायनिरतं वाग्विदां वरं मुनिश्रेष्ठं नारदं तपस्वी वाल्मीकिः पुनः पुनः अपृच्छत्।
कोन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥ २॥

सरलार्थः - अस्मिन् भूलोके अधुना को नु अस्ति यः बलवान्, धर्मज्ञः (यो धर्मान् जानाति।)
कृतज्ञश्च सत्यवचने रुचिरस्ति।
चारित्रेण च की युक्तः सर्वभूतेषु को हितः।
विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥ ३॥

सरलार्थः - अस्मिन् लोके कः सद्चरित्रवान् सर्वजीवेषु हितजनकः विद्वान्, सामर्थमान् प्रियदर्शनः चास्ति ?
आत्मवान् को जितक्रोधी द्युतिमान् कोऽनसूयकः।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥ ४॥

सरलार्थः - अस्मिन् जगति को अस्ति यः इन्द्रियाणि वशी कृतवान्, यः तेजसायुक्तः, क्रोधं असूयां च नियन्त्रितवान्, युद्धक्षेत्रे यश्च क्रुद्धाः देवा अपि भयं कुर्वन्ति।
एतदिच्छाम्यहं श्रोतुं परं कौतुहलं हि मे।
महर्षे त्वं समर्थोऽस्ति ज्ञातुमेवंविध नरम्॥ ५॥

सरलार्थः - हे महर्षि नारद, एतद्दिव्यगुणसम्पन्नयुक्तः पुरुषः यदि कोऽस्ति तर्हि अहं श्रोतुमिच्छामि।
श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः।
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत्॥ ६॥
बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रुयतां नरः॥ ७॥

सरलार्थः - वाल्मीकेः एतद् वचनं श्रुत्वा त्रिकालज्ञो मुनि नारदः प्रहृष्टम् अब्रवीत् - हे मुनेः, ये च बहवः गुणाः त्वया कीर्तिता, ते एकत्र पुरुषमात्रे दुर्लभा एव। तथापि अहं बुद्ध्या तेषां पुरुषमेकस्य विषये वक्ष्यामि, श्रूयताम-
इश्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।
नियतात्मा महावीर्यो द्युतिमान्, धृतिमान् वशी ॥ ८॥

सरलार्थः - इक्ष्वाकुवंशात्मना रामनाम्ना एकः पुरुषः अभूवत्, यः महावीर्यवान्, दीप्तमान्, धर्यसम्पन्नः, जितेन्द्रियः च अस्ति अस्ति।
बुद्धिमान् नीतिमान् वाग्मी श्रीमाञ्छत्रुनिबर्हणः।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥ ९॥

सरलार्थः - सः बुद्धिमान्, नीतिज्ञः, प्रज्ञावान्, श्रीयुक्तं, शत्रुघ्नः, विस्तृतस्कन्धयुक्तः, दीर्घबाहुः, कम्बुग्रीवः महाहनुविशिष्टमस्ति।
महोरस्को महेष्वासो गूढ़जत्रुररिन्दमः।

आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ १० ॥

सरलार्थः – सः विस्तृतवक्षस्थलयुक्तः शक्तिशाली धनुर्धरः, स्थुलस्कन्धपहिकायुक्तः शत्रुणांदमनकर्ता, जानुपर्यन्तं बाहुयुक्तः, सुन्दरशिरसा ललितललाटेन च उत्तमशक्त्या च सम्पन्नः।

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान्।

पीनवक्षा विशालाक्षी लक्ष्मीवान् शुभलक्षणः ॥ ११ ॥

सरलार्थः – तस्य शरीरं सममिताङ्गं स्निग्धवर्णं चास्ति। सः पराक्रमी, महोरस्कश्च च अस्ति। विस्तृतनेत्रैः सह मङ्गलै अनुकूलचिह्नैः अभिषिक्तश्च।

धर्मज्ञः सत्यसंधश्च प्रजानां च हिते रतः।

यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥ १२ ॥

सरलार्थः – सः धर्मस्य ज्ञाता, दृढव्रतः, प्रजानां हिताय सदानिरतः, यशस्वी, धीमान्, शुद्धं भक्तं च ज्येष्ठानां आज्ञाकारी समाधिमान् च अस्ति।

प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः।

रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥ १३ ॥

सरलार्थः – सः प्रजापतिसमः अस्ति। अपि च सः कान्तिमान्, प्रजानां धाता, शत्रुनाशकः, शरणागतानां रक्षकः, जगतः परिरक्षकञ्च अस्ति।

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।

वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ १४ ॥

सरलार्थः – सः स्वधर्मस्य रक्षकः, वेदवेदाङ्गादिषु सर्वशास्त्रनिष्णातः, धनुर्विद्यायामपि च सिद्ध अस्ति।

सर्वशास्त्रार्थतत्वज्ञः स्मृतिमान् प्रतिभावान्।

सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥ १५ ॥

सरलार्थः – सः सर्वशास्त्राणाम् अर्थ ज्ञाता, स्मृतिमान्, प्रतिभाशाली, जलप्रियः, शिष्टः, एकाग्रवान्, विवेकवान् चास्ति।

सर्वदाभिगतः सद्भिः समुद्र एव सिन्धुभिः।

आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥ १६ ॥

सरलार्थः – यथा नदीनां आश्रयः समुद्रः तथैव साधुगणस्य आश्रयम् रामः। सः सर्वजनपूज्यः, समभावापन्न अपि च प्रियदर्शनमस्ति।

स च सर्वगुणोपेतः कौशल्यानन्दवर्धनः।

समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ॥ १७ ॥

सरलार्थः – सः सर्वगुणयुक्तः, तस्य मातुः कौशल्यायाः नन्दवर्धकः तस्य विचारे समुद्र इव गाम्भीर्यं विद्यते, हिमालय इव तस्य धैर्य वर्तते।

विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः।

कालाग्निसदृशः क्रोध क्षमया पृथिवीसमः ॥ १८ ॥

सरलार्थः - सः पराक्रमे विष्णुसमः, दर्शने च सोमवत्, क्रोधे कालाग्निवत्, क्षमायां च धरित्रीवत् अस्ति।

धनदेन समस्त्यागे सत्ये धर्म इवापरः।
तमेवंगुणसम्पन्नं रामं सत्यपराक्रमम् ॥ १९ ॥

सरलार्थः - सः दाने कुवेरसमः, सत्यभाषणे धर्मराजसदृशमस्ति। सः रामः विभिन्नैः गुणैः समृद्धैः भूत्वा पराक्रमशाली अस्ति।

ज्येष्ठं ज्येष्ठगुणैर्युक्तं (श्रेष्ठगुणैर्युक्तं) प्रियं दशरथः सुतम्।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया॥ २० ॥

सरलार्थः - नृपति दशरथः तस्य अतीव गुणवान् ज्येष्ठपुत्रं, रामचन्द्रं प्रजानां हितार्थं युवराजपदे अभिषेकं कर्तुम् इच्छयामासः।

यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः।
तस्याभिषेकसम्भारान् दृष्ट्वा भार्याऽथ कैकयी॥ २१ ॥
पूर्वं दत्तवरा देवी वरमेनमयाचत।
विवासनं च रामस्य भरतस्याभिषेचनम्॥ २२ ॥

सरलार्थः - पूर्वस्मिन् काले इन्द्रसाहायार्थं प्रवृत्तस्य दशरथस्य दैत्यैः सह युद्धकाले दशरथेतरप्रयुक्तामासुरोमायां धवलाङ्ग मुनिदतविद्यया निवारयन्ति। दशरथस्य भार्या कैकेय्यीं प्रति तुष्टं भूत्वा दशरथेन वरद्वयौ दत्तौ प्रतिज्ञामासः। रामचन्द्रं युवराजपदे नियुक्तं अर्थात् तस्याभिषेकनिमित्तार्थं सम्भारान् दृष्ट्वा कैकेयी एनं वरं अयाचत्। वरद्वयं यथा - रामस्य निर्वासनम्, स्वपुत्रः भरतस्य अभिषेचनम्।

स सत्यवचनाद् राजा धर्मपाशेन संयतः।
विवासयामास सुतं रामं दशरथः प्रियम्॥ २३ ॥

सरलार्थः - स्वप्रतिज्ञारक्षार्थं राजा दशरथः तस्य प्रियपुत्रं रामचन्द्रं विवसयामासः।

स जगाम वनं वीरः प्रतिज्ञामनुपालयन्।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात्॥ २४ ॥

सरलार्थः - पितुः आज्ञा पालनार्थं अपि च माताकैकेय्याः प्रियकार्यकरणार्थं स वीरः रामचन्द्रः वनोद्देशं जगाम।

तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह।
स्नेहाद् विनयसम्पन्नं सुमित्रानन्दवर्धनः॥ २५ ॥

सरलार्थः - सुमितानन्दनः तथा रामस्य प्रियानुजः लक्ष्मणोऽपि तं वनव्रजन्तं रामम् अनुजगाम।

भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।
रामस्य दयिता भार्या नित्यं प्राणसमा हिता ॥ २६ ॥

सरलार्थः - ज्येष्ठभातृ रामचन्द्रं प्रति लक्ष्मणस्य भातृप्रेम्नः दर्शयति। रामस्य प्राणसमा-दयिता-

भार्या सीतामपि रामेन सह गमनम् अकरोत्।
जनकस्य कुले जाता देवमायै निर्मिता।
सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ॥ २७॥

सरलार्थः - सा सीता राजा जनकस्य कुलोत्पन्ना, नारीणां मध्ये उत्तमा, दैवशक्तिनिर्मिता, सर्वशुभलक्षणगुणसम्पन्ना अस्ति।
सीताप्यनुगता रामं शशिनं रोहिणी यथा।
पौरैरनुगतो दूरं पित्रा दशरथेन च ॥ २८॥

सरलार्थः - समस्त पुरवासिनः राजा दशरथमपि च वहुदूरपर्यन्तं रामचन्द्रम् अनुगमनम् अकुर्वन्।
शृङ्गिवेरपुरे सूतं गंगाकूले व्यसर्जयत्।
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥ २९॥

सरलार्थः - सः रामः गंगातटे तथा शृङ्गवेरपुरे निषादराजः तथा तस्य प्रियमित्रः गुहनामकं निषादराजं प्राप्य सुतं व्यसर्जयत्।
गुहेन सहितो रामो लक्ष्मणेन च सीतया।
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ॥ ३०॥

सरलार्थः - गुहेन, लक्ष्मणेन, सीतया च सहित रामः सुगभोरा नद्यः वनानि च अतिक्रम्य अन्यमेकं वनं प्राप्तः।
चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात्।
रम्यभावसथं कृत्वा रममाणा वने त्रयः ॥ ३१॥

सरलार्थः - तत्रैव मुनि भरद्वाजस्य आदेशानुसारेण ते (राम लक्ष्मण सोता च) चित्रकूट इति नाम्ना पर्वते उपस्थित्य एकं पर्णशालां निर्माणं कृत्वा सुखेन कालं व्यतीतयामासः।
देवगन्धर्वसंकाशास्तत्र ते न्यवसन् सुखम्।
चित्रकूटं गते रामे पुत्रशोकातुरस्तदा॥ ३२॥

सरलार्थः - ते (राम लक्ष्मण सोता च) देवगन्धर्वसदृशः सुखेन कालयापनं अकुर्वन्। रामस्य चित्रकूटे निवाससमये दशरथः पुत्रशोकातुरः भूत्वा दिवंगतः।
राजा दशरथः स्वर्गं जगाम विलपन् सुतम्।
गते तु तस्मिन् भरतो वसिष्ठप्रमुखैद्विजैः॥ ३३॥

सरलार्थः - दशरथस्य मृत्योः पश्चात् वसिष्ठप्रमुखैः द्विजैः राजारूपेण महाबलीं भरतं नियोजितुं इच्छयामासः।
नियुज्यमानो राज्याय नैच्छद् राज्यं महाबलः।
स जगाम वनं वीरो रामपादप्रसादकः॥ ३४॥

सरलार्थः - भरतः राज्यभारग्रहीतुं न इच्छयामासः। अतः स महावलः भरतः रामचन्द्रं प्रसन्नार्थं वनं जगाम।
गत्वा तु स महात्मानं राम सत्यपराक्रमम्।

जयाचद् भ्रातरं राममार्यभावपुरस्कृतः ॥ ३५ ॥
त्वमेव राजा धर्मक्ष इति रामं वचोऽब्रवीत्।
रामोऽपि परमोदारः सुमुखः सुमहायशाः ॥ ३६ ॥
न चैच्छत् पितारादेशाद् राज्यं रामो महाबलः।
पादुके चास्य राज्याय व्यासं दत्त्वा पुनः पुनः ॥ ३७ ॥

सरलार्थः - सः भरतः पूज्यरामचन्द्रं समीपं गत्वा विनीतभावेन प्रार्थयामासः - 'त्वमेको हयस्य सर्वस्य राजा' इति। परन्तु परमोदारः यशस्वी रामो पितृवाक्यपालनार्थं राज्यं न ऐच्छत्। सः भरताग्रजः अस्य राज्याय पादुके न्यासं दत्त्वा पुनः पुनः भरतं ततः निवर्तयामासः च।

निवर्तयामास ततो भरतं भरताग्रजः।
स काममनवाप्यैव रामपादावृपस्पृशन्॥ ३८ ॥
नन्दिग्रामेऽकरोद् राज्यं रामागमनकाङ्क्ष्या।
गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः ॥ ३९ ॥

सरलार्थः - रामचन्द्रः भरतं निवर्तयामासः। भरतः तस्य इच्छां अनवाप्तः रामपादौ उपस्पृशन्। अपि च भरतः रामप्रत्यागमनकाङ्क्ष्या नन्दिग्रामे राज्यशासनमकरोत्।

रामस्तु पुनरालक्ष्य नागरस्य जनस्य च।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह॥ ४० ॥

सरलार्थः - भरते गते सः सत्यसन्धः जितेन्द्रियः रामचन्द्रः अयोध्यानगरवासी चित्रकूटं पुनरागमनम् आलक्ष्य चित्रकूटं त्यक्ताः दण्डकारण्ये प्रविवेशः।

प्रविश्य तु महारण्यं रामो राजीवलोचनः।
विराधं राक्षसं हत्वा शरमङ्गं ददर्श ह ॥ ४१ ॥
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा।।

सरलार्थः - सः पङ्कजलोचनः रामचन्द्रः दण्डकारण्यं प्रविश्य विराधनाम्नं राक्षसं जघानः। तत्पश्चात् स शरभङ्गं सुतीक्ष्णं अगस्त्यम् अगस्त्यभ्रातरम् अपि च ददर्शः।

अगस्त्यवचनाच्चैव जग्राहेन्द्रं शरासनम्॥ ४२ ॥
खड्गं च परमप्रीतस्तूणी चाक्षयसायकौ।
वसतस्तस्य रामस्य वने वनचरैः सह॥ ४३ ॥
ऋषयोऽभ्यागमन्सर्वे वधायासुरक्षसाम्।
स तेषां प्रतिशुश्राव राक्षसानां तदा वने॥ ४४ ॥

सरलार्थः - सः रामचन्द्रः अगस्त्यवचनेन एव इन्द्रस्य शरासनं, खड्गं अक्षयसायको तूणीं च जग्राहः। दण्डकारण्ये वनेचरैः तथा च मुनिभिः सहः वसतेः समये सः परमप्रीत आसीत्। तदा सर्वे ऋषयः राक्षसानां विनाशं याचयान्तः रामम् उपदिशताम्। सोऽपि राक्षसां बधाय प्रतिशुश्रावः।

प्रतिज्ञातश्च रामेण वधः संयति राक्षसाम्।
ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम् ॥ ४५ ॥

सरलार्थः – रामचन्द्रः दण्डकारण्यवासिनां तथा च अग्निसमतेजस्वीऋषिणां समीपे राक्षसान् बधितुं प्रतिक्षयामासः।
तेन तत्रैव वसता जनस्थाननिवासिनी।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥ ४६ ॥

सरलार्थः – तेन रामेण तत्र निवाससमये जनस्थाननिवासिनीं विकृतरूपधारिणीम् अर्थात् नानारूपधारितुं समर्थां शूर्पणखां विरूपिता (कर्णनासाछेदेन वैरूप्यं प्रापिताः)।
ततः शूर्पणखावाक्यादुद्युक्तान्सर्वराक्षसान्।
खरं त्रिशिरसं चैव दूषणं चैव राक्षसम् ॥ ४७ ॥

सरलार्थः – ततः शूर्पणखावाक्यं श्रुत्वा खरत्रशिरदूषणनाम्ना राक्षसत्रयः प्रतिशोधार्थं रामं हन्तुं युद्धार्थं तत्रागतः।
निजघान रणे रामस्तेषां चैव पदानुगान्।
वने तस्मिन्निवसता जनस्थाननिवासिनाम् ॥ ४८ ॥

सरलार्थः – रामचन्द्रः खरदूषणादिनां सहित जनस्थाने निवासिनां तेषां पदानुगतां अपि युद्धे बधं कृतवान्।
रक्षसां निहतान्यासन् सहस्राणि चतुर्दश।
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः ॥ ४९ ॥

सरलार्थः – युद्धे चतुर्दशसहस्राणि राक्षसां निहतानि अभवन्। ततः स्वजनानां मृत्योः वार्तां श्रुत्वा रावणः अतीव क्रोधाभिभूत अभवत्।
सहायं वरयामास मारीचं नाम राक्षसम्।
वार्यमाणः सुबहुशो मारीचेन स रावणः ॥ ५० ॥

सरलार्थः – अतः सः रावणः रामं बधार्थं मारीचनामं राक्षसं प्रार्थयामासः। परन्तु मारीचः रावणं रामसहितुं युद्धकर्तुं निषेधयामासः।
न विरोधी बलवता क्षमो रावण तेन ते।
अनादृत्य तु तद्वाक्यं रावणः कालचोदितः ॥ ५१ ॥

सरलार्थः – मारीचः उक्तवान – 'है रावण, रामचन्द्रः अतीव बलवान् अस्ति। अतः बलवता सह विरोधं तव न उचितम्'। परन्तु मारीचवाक्यं रावणः अग्राह्यमकरोत्।
जगाम सहमारीचस्तास्याश्रमपदं तदा।
तेन मायाविना दूरमपवाह्य नृपात्मजौ ॥ ५२ ॥

सरलार्थः – रावणः मारीचेन सह रामचन्द्रस्य आश्रमे उपस्थितम् अभवत्। ततः तेन मायाविना मारीचेन तौ नृपात्मजौ रामलक्षणौ दूरमपवासह्यापसार्य।
जहार भार्यारामस्य गृध्रं हत्वा जटायुषम्।

गृध्रं च निहतं दृष्ट्वा हतं श्रुत्वा च मैथिलीम् ॥ ५३ ॥

सरलार्थः – तदा रावणः जटायुषं निधनं कृत्वा रामस्य भार्यासीतादेवीम् अपहारः। रामचन्द्रः गृध्रं जटायुषं मृतवत् इति दृश्यते अपि च सीतापहरणस्य विषये अवगतवान्।

राघवः शोकसन्तप्तो विललापाकुलेन्द्रियः।
ततस्तेनैव शोकेन गृध्रं दग्धा जटायुषनौम् ॥ ५४ ॥

सरलार्थः – सः रामचन्द्रः तद् वार्ता श्रुत्वा अतीव शोकाभिभुतं अभवत् , अपि च विलापितवान्। शोकाभिभुतः अवस्थायामेव सः जटायोः अग्निसंस्कारं कृतवान्।

मार्गमाणो वने सीतां राक्षसं संददर्श ह।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥ ५५ ॥

सरलार्थः – वने रामचन्द्रः सीताम् अन्वेषणसमये कबन्धनामं एकं कुत्सिताकारं राक्षसं ददर्शः। तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः।

स चास्य कथयामास शबरीं धर्मचारिणीम् ॥ ५६ ॥

सरलार्थः – सः महाबाहुः रामचन्द्रः तं हत्वा तस्य दाहसंस्कारम् अकरोत्। सः कबन्धः स्वीयं गन्धर्वरूपं प्राप्य स्वर्गगामी अभवत्। सः मृत्योसमये रामचन्द्रं धर्मचारिणीशबरीविषये कथयामासः –

श्रमणीं धर्मेनिपुणामभिगच्छेति राघव।
सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसूदन ॥ ५७ ॥
शबर्या पूजितः सम्यग् रामो दशरथात्मजः।
पम्पातीरे हुनुमता सङ्गतो वानरेण ह ॥ ५८ ॥
हनुमहचनाच्चैव सुग्रीवेण समागतः।
सुग्रीवाय च तत्पर्वं शंसदामो महाबलः ॥ ५९ ॥

सरलार्थः – है राधवः, श्रमणीं धर्मचारिणीं च तापसीं शबरीं समीपे गच्छ। तदा सः शत्रुहन्ता महारतेजस्वी दशरथस्य पुत्रः रामचन्द्रः शबरीं समीपे अगच्छत्। सा शबरी रामचन्द्रं विधिवत् अपूजयत्। तत्पश्रात् पम्पातीरे हनुमता वानरेण सह मिलितमभवत्। हनुमानस्य उपदेशानुसारेण रामचन्द्रः सुग्रीवं साक्षातम् अकरोत्, अपि च सुग्रीवं सर्ववृत्तान्तं निवेदयामासः।

आदितस्तद्यथावृत्तं सीतायाश्च विशेषतः।
सुग्रीश्चापि तत्पर्वं श्रुत्वा रामस्य वानरः ॥ ६० ॥
चकारः सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम्।

सरलार्थः – वानरः सुग्रीवः रामचन्द्रस्य सर्ववृत्तान्तं श्रुत्वा विशेषतः सीतायाः वृत्तान्तं श्रुत्वा अग्निंसाक्षीकृत्वा रामेण सह सख्यं चकारः।

ततो वानरराजेन वैरानुकथनं प्रति ॥ ६१ ॥
रागायावेदितं सर्वं प्रणयाद् दुःखितेन च

प्रतिज्ञातं च रामेण तदा वालिवधं प्रति ॥ ६२ ॥

सरलार्थः – तत्पश्चात् वालिवानरराजेन सहित सुग्रीवस्य वैरानुकानं श्रुत्वा रामः बालिं वधितुं प्रतिज्ञयामासः।

वालिनश्च बलं तत्र कथयामास वानरः।

सुग्रीव शङ्कितश्चासीन्नित्यं वीर्येण राघवे॥ ६३ ॥

सरलार्थः – सुग्रीवः रामचन्द्रस्य शक्तिसम्बन्धे शंङ्कितं भूत्वा वालिनः शक्तिसम्बन्धे रामचन्द्रं कथयामासः।

राघवप्रत्ययार्थं तु दुन्दुभेः कायमुत्तमम्।

दर्शमामास सुग्रीवो सहापर्वतसन्निभम्॥ ६४॥

सरलार्थः – वालिनः शक्तिसम्बन्धे राघवं प्रत्ययार्थं सुग्रीवः रामं बालिना हत्वा दुन्दुभेः महापर्वतसदृशं वृहदाकारकायं दर्शयामासः।

उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्ति महाबलः।

पादाङ्गुष्ठेन चिक्षेप सम्पूर्णं दशयोजनम् ॥ ६५ ॥

सरलार्थः – महाबाहुः महाबलः च रामचन्द्रः इषत् स्मित्वा तद् वृहदाकारकायं पादाङ्गुष्ठेन दशयोजनं दूरं निक्षिप्तवान्।

बिभेद् च पुनस्तालान् सप्तैकेन महेषुणा।

गिरिं रसातलं चैव जनयन् प्रत्ययं तदा ॥ ६६ ॥

सरलार्थः – तत्पश्चात् सुग्रीवं प्रत्ययार्थं रामचन्द्रः एकेन एव महेषुणा सप्ततालवृक्षैः सह तत् समीपस्थं पर्वतं रसातलं च विभेदं कृतवान्।

ततः प्रीतमनास्तेन विश्वस्तः सः महाकविः।

किष्किन्धां रामसहितो जगाम च गुहां तदा ॥ ६७॥

सरलार्थः – रामस्य एतानि वोर्यकर्माणि दृष्ट्वा सुग्रीवः रामस्य शक्तिसम्बन्धे सन्तुष्टं भूत्वा किष्किन्धाख्यं गुहां रामसहितौ गतवान्।

ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः।

तेन नादेन महता निर्जगाम हरीश्वरः ॥ ६८॥

अनुमान्य तदा तारां सुग्रीवेण समागतः।

निजघान च तत्रैनं शरेणैकेन राघवः ॥ ६९॥

सरलार्थः – ततः हेमपिङ्गलवर्णः कपिश्रेष्ठः सुग्रीवः सिंहनादं कृतवान्। तदा हरीश्वरः वालीः तद् सिंहनादं श्रुत्वा निर्जगामः। तदा बालीः तारायाः अनुमतिं प्राप्य सुग्रीवेन सह युद्धे प्रवृत्तवान्। युद्धरत अवस्थायामेव रामचन्द्रः एकेन शरेण बालिवधं अकरोत्।

ततः सुग्रीववचनाद्धत्वा वालिनमाहवे।

सुग्रीवमेव तद्राज्ये राघवः प्रत्यपाद्यत् ॥ ७० ॥

सरलार्थः – रामचन्द्रः सुग्रीवस्य वचनानुसारेण बालिवधं कृत्वा तद् राज्ये सुग्रीवं राजारूपेण

अधिष्ठितम् अकरोत।
स च सर्वान् समानीय वानरान् वानरर्षभः।
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ॥ ७१ ॥

सरलार्थः - स सुग्रीवः जनकात्मजां सीतां अन्वेषयितुं सर्वान् वानरान् समानीय चतुर्दिशं प्रस्थापितवान्।
ततो गृध्रस्य वचनात् सम्पातेर्हनुमान् बली।
शतयोजनविस्तीर्णां पुप्लुवे लवणार्णवम् ॥ ७२ ॥

सरलार्थः - ततः अतिबलवान् हनुमानः सम्पाति इति नामकस्य गृध्रस्य वचनं श्रुत्वा शतयोजनविस्तीर्णम् लवणार्णवं लङ्घितवान्।
तत्र लङ्कां समासाद्य पुरीं रावणपालिताम्।
ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम् ॥ ७३ ॥

सरलार्थः - ततः हनुमानः रावणपालितां लङ्कापुरीम् उपस्थितं भूत्वा तत्र अशोकवननामप्रमोदवने ध्यायन्तीं सीतादेवीं ददर्शः।
निवेदयित्वाभिज्ञानं प्रवृत्तिं विनिवेद्य च।
समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥ ७४ ॥

सरलार्थः - तदा हनुमानः सीतां स्वपरिचयं दत्वा रामेण प्रदत्तम् अभिज्ञानमङ्गुलीयकं प्रदर्शितवान्। तत्पश्चात् रामस्य सर्वप्रवृतिं वैदेहीं विनिवेद्य समाश्वास्य च अशोकवनस्य वहिर्द्वारं मर्दयामासः।
पञ्च सेनाग्रगान् हत्वा सप्त मन्त्रिसुतानपि।
शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥ ७६ ॥

सरलार्थः - तत्पश्चात् हनुमानः पञ्चसेनाग्रगान्, सप्तान् मन्त्रीपुत्रान् हत्वा इन्द्रजित् प्रयुक्तः ब्रह्मास्तद्वारा आवद्धो अभवत्।
अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरान्।
मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया ॥ ७६ ॥

सरलार्थः - यद्यपि हनुमानः पितामहात्, वरात् आत्मानं अस्त्रेण उन्मुक्तकर्तुं सक्षमं आसीत् तथापि सः स्व-इच्छानुसारेण तथा रावणदर्शनापेक्षया तद् बन्धनग्रहणं अकरोत्।
ततो दग्ध्वा पुरीं लङ्कामृते सीतां तु मैथिलीम्।
रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥ ७७ ॥

सरलार्थः - ततः रावणदर्शनादि व्यापारानन्तरं सीतावासस्थानम् अर्थात् अशोकवनं ऋते लङ्कापुरीं दग्ध्वा रामाय प्रियं सीतादर्शनरूपप्रियवार्तामाख्यातुं पुनर्रामान्तिकं महाकपिहनुमानामादागतः।
सोऽधगम्य महात्मानं कृत्वा रामं प्रदक्षिणम्।
न्यवेदयदमेयात्मा दृष्ट्वा सोतेति तत्त्वतः ॥ ७८ ॥

सरलार्थः – सः हनुमानः रामचन्द्रं प्रदक्षिणं कृत्वा 'सीता दृष्ट्वा' इति न्यवेदयत्।
ततः सुग्रीवसहितो गत्वा तीरं महोदधेः।
समुद्रं क्षोभयामास शरैरादित्यसन्निभैः॥ ७९॥

सरलार्थः – ततः रामः सुग्रीवसहित महोदधेः तीरं गत्व अग्निसमैः तथा सूर्यसमशरैः समुद्रं निक्षेप्य समुद्रं क्षोभयामासः।
दर्शयामास चात्मानं समुद्रः सरितां पतिः।
समुद्रवचनाच्चैव नलं सेतुमकारयत्॥ ८०॥

सरलार्थः – सरित्पतिः रामस्य क्रोधं दृष्ट्वा अत्मानं दर्शयामासः। समुद्रवचनात् एव रामः नलनामकेन वानरेण सेतुम् अकारयत्।
तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे।
रामः सीतानुप्राप्य परां व्रीडामुपागतम् ॥ ८१॥

सरलार्थः – तेन सेतुना रामचन्द्रः लङ्कापुरीं गत्वा युद्धे रावणं निहत्य सीताम् अनुप्राप्य अत्यन्तं व्रीडामुपागतम्।
तामुवाच ततो रामः परुषं जनसंसदि।
अमृष्यमाणा सा सोता विवेश ज्वलनं सती ॥ ८२॥

सरलार्थः – तत्पश्चात् रामः सीतां जनसंसदि मर्मस्पृक् वचनमुवाच। सा पतिव्रता सीता रामस्य कठोरवचनं श्रुत्वा अग्निप्रवेशम् अकरोत्।
ततोऽग्निवचनात् सीतां ज्ञात्वा विगतकल्मषाम्।
कर्मणा तेन महता त्रैलोक्यं सचराचरम् ॥ ८३॥
सदेवर्षिगणं तुष्टं राघवस्य महात्मनः।
बभौ रामः सम्प्रहृष्टः पूजितः सर्वदैवतैः॥ ८४॥

सरलार्थः – अग्निवचनात् रामः सीता निष्पापा इति ज्ञात्वा (विशुभावां निष्पापां प्रतिगृह्णोष्वराघवं) सीतां ग्रहणम् अकरोत्। राघवस्य तेन महता कर्मणा सचराचरं सदेवर्षिगणं त्रैलोक्यं तुष्टम्।
अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम्।
कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ ८५॥

सरलार्थः – लङ्कायां राक्षसेन्द्रं विभीषणं राजारूपेण अधिषिच्य रामचन्द्रः आनन्दितो अभूत्।
देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान्।
अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृदव्रतः ॥ ८६॥

सरलार्थः – रामचन्द्रः देवताभ्यः वरं प्राप्य मृतवानरान् पुनर्जीवितमकरोत्। तत्पश्चात् सुग्रीवादि वानरैः सह पुष्पकेनायोध्यामुद्दिश्य प्रस्थितो जगाम।
भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः।
भरतस्यान्तिके रामो हनूमन्तं व्यसर्जयत् ॥ ८७॥

सरलार्थः - सत्यपराक्रमः रामचन्द्रः शरद्वाजस्य आश्रमं गत्वा स्वागमनं प्रवोधनाय भरतस्य समीचे हनुमानं प्रेषयामासः।
पुनराख्यायिकां जल्पन् सुग्रीवसहितस्तदा।
पुष्पकं तत्पमारुह्य नन्दिग्रामं ययौ तदा ॥ ८८॥

सरलार्थः - भरद्वाजाश्रमे ऋषिं प्रणिपात्य सुग्रीवसहित पुनस्तत् पुष्पकादवतीर्ण पूर्वविषयां कयां जल्पन् नन्द्रिग्रामं ययौ।
नन्दिग्रामे जटाः हित्वा भातृभिः सहितोऽनघः।
रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥ ८९॥

सरलार्थः - नन्द्रिग्रामे भातृभिः सह सः पुण्यात्मा रामः मिलित्वा व्रतप्रयुक्तां जटां त्यक्ता सीताम् अनुप्राप्य पुनः राज्यम् अवाप्तवान्।
प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः।
निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥ ९०॥

सरलार्थः - रामस्य राजत्वकाले सर्वप्रजाः प्रहृष्टमुदिताः, तुष्टाः, पुष्टाः, सुधार्मिकाः, रोगहीनाः, निरामयाः दुर्भिक्षभयवर्जिताः च भविष्यन्ति।
न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित्।
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ॥ ९१॥

सरलार्थः - रामस्य शासनकाले कदापि पिता पुत्रमरणं न द्रक्ष्यन्ति, नार्यस्तु अविधवाः पतिव्रताः च भविष्यन्ति॥
न चाग्निजं भयं किञ्चिन्नाप्सु मज्जन्ति जन्तवः।
न वातजं भयं किञ्चिन्नापि ज्वरकृतं तथा ॥ ९२॥
न चापि क्षुद्भयं तत्र न तस्करभयं तथा।
नगराणि च राष्ट्राणि धनधान्ययुतानि च ॥ ९३॥

सरलार्थः - रामस्य शासनकाले कुत्रापि दुःखत्रयस्य (आध्यात्मिकम् आधिभौतिकम् आधिदैविकञ्च) भयं न भविष्यन्ति। नगराणि राष्ट्राणि च धनधान्ययुतानि भविष्यन्ति।
नित्यं प्रमुद्रिताः सर्वे यथा कृतयुगे तथा।
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥ ९४॥
गवां कोट्ययुतं दत्त्वा विद्वद्भ्यो विधिपूर्वकम्।
असंख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः ॥ ९५॥
राजवंशाञ्छतगुणान् स्थापयिष्यति राघवः।
चातुर्वर्ण्यं च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति ॥ ९६॥

सरलार्थः - रामराज्ये सर्वे प्रजागणः सर्वसमये सत्ययुगवत् प्रमुदिता। रामचन्द्रः बहुसुवर्णदक्षिणायुक्तै अश्वमेधशतै अनुष्ठितयिष्यन्ति। रामचन्द्रः शतगुणसमन्वितान् राजवंशान् स्थापयिष्यन्ति। तस्य शासनकाले चातुर्वण्यं च (ब्रह्मणः, क्षत्रियः, वैश्यः,

शूद्रः च) स्वे स्वे धर्मे निरतः भविष्यन्ति।
दशवर्षसहस्राणि दशवर्षशतानि च।
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ॥ ९७॥

सरलार्थः – रामचन्द्रः दशवर्षसहस्राणि दशवर्षशतानि च राज्यशासनं कृत्वा ब्रह्मलोकं प्रयास्यति।

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम्।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥ ९८॥

सरलार्थः – पवित्रं चित्रशोधनं पुण्यं वेदतुल्यं च यः इदं रामचरितं पठिष्यति सः सर्वपापात् विमुक्तं भविष्यति।

एतदाख्यानमायुष्यं पठन् रामायणं नरः।
सपुत्रपौत्रः सगणः प्रेत्य खर्गे मदायते ॥ ९९॥

सरलार्थः – यः नरः एतद् रामचरितं पठिष्यति, तस्य स्वपुत्र-पौत्र-सगणसहित सुखभोगं भविष्यति अपि च मृत्यो पश्चात् स्वर्गलाभं भविष्यति।

पठन् द्विजो वागृषभत्वमीयात्
स्यात्क्षत्रियो भूमिपतित्वमीयात्।
वणिग्जनः पुण्यफलत्वमीया
ज्जनश्च शूद्रोऽपि महत्त्वमीयात् ॥ १००॥

सरलार्थः – रामचरितपठनद्वारा ब्राह्मणाः शब्दब्रह्मपारंगताः भविष्यन्ति। क्षत्रियाः भूपतयः भविष्यन्ति, वैश्याः धनधान्ये समृद्धाः भविष्यन्ति। शूद्रोजनाः च अपि स्वकार्ये महत्वम् प्राप्स्यन्ति।

२.४ व्याकरणगत टोका

श्लोकसंख्या -१

१. तपः = क्ली, तपति इति तप् असुन्।
२. स्वाध्याय = स्वाध्यायो जपः इत्योक्त।
३. निरतं = विण., नि रम् क्त।
४. तपः स्वाध्याययोः निरतः = तपश्च स्वाध्यायश्च = तपः स्वाध्यायौ (द्वन्दसमासः) तयोः (तपः स्वाध्याययोः) निरतः = सप्तमी तत्पुरुषसमास।
५. तपस्वी = तपस् + विनि = तपस्विन् (कर्तरि प्रथमा)।
६. वागविदाम् = वाचम् वेत्ति इति = वाग्वित् (उपपदतत्पुरुष) तेषाम्। निर्द्धारणे षष्ठी।
७. मुनिपुङ्गवः = मुनिः = मनुते जानाति यः इति मन् इन् उत्। मुनिषु पुङ्गवः इति (सप्तमीतत्पुरुषः तम् (प्रमांश्चासौ गौश्च पुङ्गव इति) 'गोरतद्धितलुकि' इति टप् समासान्तः।
८. वाल्मीकिः = पु. वल्मीकस्य अपत्यम्, इति इञ्। कर्तरिप्रथमा।
९. नारदम् = पु. नारं परमात्मविषयकं ज्ञानं ददातीति नार दा कः। नारं जलं ददाति पितृभ्यः

इति वा।

नारम् अज्ञानं दयति अर्थात् अज्ञानं खण्डप्रति यः इति नारदः। उपपदतत्पुरुषः।

१०. परिपप्रच्छ = परि – $\sqrt{}$प्रच्छ + लिट् णल्।

श्लोकसंख्या - २

१. न्वस्मिन् = नु + अस्मिन्, नु नुद् वा डुः (प्रश्नवोधकम् अव्ययम्)।

२. अस्मिन् = अधिकरणेसप्तमी।

३. लोके = पु. लोक्यते इति लोक् घञ् = लोकः, अधिकरणे सप्तमी।

४. गुणवान् = गुणः मन्त्रणे घञ्, मतुप् पु. प्रथमा एकवचनम्।

५. वीर्यवान् = वोर्य + (भूमप्रशंसादौ) मतुप् पु. प्रथमा एकवचनम्।

६. कः = कर्तरिप्रथमा।

७. धर्मज्ञः = पु. धरति विश्वम् इति धृ मन्। धर्मं जानाति यः सः इति (उपपदतत्पुरुष) धर्म + ज्ञा + क।

८. सत्यवाक्यः = सत्यं वाक्यं यस्य स इति (बहुव्रीहिसमासः)

९. दृढव्रतः = दृढ = विण., दृह् क्तः, दृढं व्रतं यस्य स इति (बहुव्रीहिसमासः)।

१०. लोकः = त्रिलोकः, स्वर्ग, मर्त्त, पाताल।

श्लोकसंख्या -३

१. कः = सर्वनाम। कर्तरिप्रथमा।

२. चारित्रेण = गुणा 'चरेवृत्ते' इति च + (औणादिक) णिलन्। 'सहार्थेऽप्रधाने' इति तृतीया।

३. युक्तः = विण. युज्यते सा इति युज् क्तः।$\sqrt{}$युज् + क्त।

४. सर्वभूतेषु = सर्वः भूत इति (सुप्सुपा) तेषु निद्वारणे सप्तमी।

५. हितः = विण., हि गतिप्रेरणे अथवा धा धारणे क्तः।

६. विहान् =$\sqrt{}$विद् + क्वसु।

७. समर्थः = विण., सम् अर्थ पचाद्याच्। सम् – अर्थ + अच्।

८. एकप्रियदर्शनः = प्रियं दर्शनं यस्य सः प्रियदर्शन (बहुव्रीहि), एक्श्चासौ प्रियदर्शनश्चेति एकप्रियदर्शनः (कर्मधारयः)।

श्लोकसंख्या -४

१. कः = सर्वनाम, कर्तरि प्रथमा।

२. आत्मवान् = आत्म + मतुप्।

३. जितक्रोधः = जितः क्रोधः येन स = बहुव्रीहिसमासः।

४. द्युतिमान् = द्यु दीप्तौ कित्।

५. अनसूयकः = न असूयक इति नञ् तत्पुरुष।

६. कस्य = सम्बन्ध सामान्ये षष्ठी।

७. विभ्यति = $\sqrt{}$भो + लट् + अन्ति।

८. जातरोषस्य = जात = विण. जन् कर्तरि क्तः। जातः शेषः यस्य इति बहुव्रीहि। तस्य सम्बन्ध सामान्ये षष्ठी।

श्लोकसंख्या -५

१. इच्छामि = इष = वाञ्छे = तुदा प अ इच्छाति, √ईष् + लट् मि।

२. श्रोतुम् = √श्रु + तुमुन्।

३. कौतुहलम् = कूतुहल + अण्।

४. मे = शेषे षष्ठी।

५. महर्षे = महः = क्ली, महते इति मह असुन्। महान्, चासौ ऋषिश्चेति महर्षिः (कर्मधारय) सम्बोधने प्रथमा।

६. ज्ञातुम् = √ज्ञा + तुमुन्।

श्लोकसंख्या -६

१. त्रिलोकज्ञः = त्रिलोकस्य वृत्तं जानाति यः सः इति। उपपदतत्पुरुष।

२. वचः = कर्मणिद्वितीया, बहुवचनम्।

३. आमन्त्र्य = आ - √मन्त्र + ल्यप्।

४. वाक्यम् = क्ली (√वच् + ण्यत्)।

५. अब्रवीत् = √ब्रु + लङ् + द।

श्लोकसंख्या -७

१. दुर्लभाः = दुःखेन लभते इति, दुर् + लभ् + खल्।

२. त्वया = अनुक्ते कर्तरि तृतीया।

३. कीर्तिताः = कोतिः = स्त्री क्तिन्। कृत् + क्त + पुं प्रथमा बहुवचनम्।

४. बुद्ध्वा = √बुध् + त्वाच्।

५. श्रुयताम् = √श्रु + लोट् + ताम्।

श्लोकसंख्या -८

१. ईस्वाकुवंशप्रभवः = ईश्वाकुनाम् वंशः, (षष्ठीतत्पुरुषः, पुं) तस्मिन् प्रभावः, सप्तमी तत्पुरुषसमास।

२. रामः = उक्तेकर्मणिप्रथमा।

३. नियतात्मा = नियत-विण. (नि- √यम् क्त) नियतं आत्मा यस्य सः (बहुव्रीहिसमासः)।

४. महावीर्यः = महत्, वीर्यः यस्य सः (बहुव्रीहिसमासः)

५. द्युतिमान् = द्यु (दीप्तौ) कित् = द्युतिः, द्युति + मतुप्।

६. धृतिमान् = धृ - स्थितौ, धृतौ (तुदा आ स्थितौ अक धृतौ सक् धियते), √धृ+ क्तिन् = धृति + मतुप्।

श्लोकसंख्या -९

१. वाग्मी = वाक् = उच्यतेऽसौ इति √वच् क्विप् , वाच् + अस्त्यर्थे ग्मिनिः = चस्य कः।

२. शत्रुनिबर्हणः = शत्रुणां निवर्हणः इति (षष्ठीतत्पुरुषः)।

३. महाबाहुः = महान्तौ बाहु यस्य सः बहुव्रीहिसमासः।

४. महाहनुः = महान् हनुः यस्य सः = बहुव्रीहिसमासः।

श्लोकसंख्या -१०

१. आजानुबाहुः = जानुपर्यन्तम् इति आजानु (अव्ययीभावसमासः), आजानु बाहुः यस्य सः (बहुव्रीहिसमासः)।

२. सुशिरः = शोभनं शिरः यस्य सः , बहुव्रीहिसमासः।

३. सुललाटः = शोभनं ललाटो यस्य सः , बहुव्रीहिसमासः।

४. अरविन्दम् = अरिं दमयति यः (उपपदतत्पुरुषः) अरि - दम् - खच्।

श्लोकसंख्या -११

१. स्निग्धवर्णः = स्निग्धः वर्णः यस्य सः (बहुव्रीहिसमासः)।

२. समविभक्ताङ्गः = समं विभक्तम् , समविभक्तानि अङ्गानि यस्य सः (बहुव्रीहिसमासः)।

३. पीनवक्षा = पीनं = विण. (पा वृद्धौ क्तः), पीनवक्षः यस्य सः, (बहुव्रीहिसमासः)

४. विशालाक्षः = विशाले अक्षिणी यस्य सः (बहुव्रीहिसमासः)।

५. लक्ष्मीवान् = लक्ष्मी - स्त्री - लक्षयति पश्यति उद्योगिनमिति लक्ष्, ई मुडागमः , लक्ष्मीवान् = विष्णुः, लक्ष्मी + मतुप्।

६. शुभलक्षणः = शुभं लक्षणमस्ति यस्य सः (बहुव्रीहिसमासः)।

श्लोकसंख्या -१२

१. सत्यसन्धः = सत्यम् सन्धा यस्य सः, बहुव्रीहिसमासः।

२. धर्मज्ञः = धर्मान् जानाति यः (उपपदतत्पुरुषः)

३. हिते = हि- गतिप्रेरणे अथवा धा धारणे क्तः, हि- क्त + सप्तमी एकवचनम्।

४. रतः = रम् + क्त।

५. यशस्वी = यशस् +(मत्वर्थे) विन्।

६. ज्ञानसम्पन्नः = ज्ञानेन सम्पत्रः, तृतीयातत्पुरुषः।

७. शुचिः = (विण.), शुच्यत्यनेनेति (तृतीयातत्पुरुषः) शुच् + इन्। शुच् + इक्।

८. वश्य = $\sqrt{}$वश् + यत्।

९. समाधिमान् = सम् - आ - धा + कि = समाधि + मतुप्।

श्लोकसंख्या -१३

१. प्रजापतिसमः = प्रजा - स्त्री (प्रजायते इति प्र जन ङ), प्रजापतिना समम् , तृतीयातत्पुरुषः।

२. धाता = $\sqrt{}$धा + तृन् ।

३. रिपुनिषुदनः = रिपुं निषुद्यतीति 'कृत्योलुटो बहुलम्' इति रिपु - नि - सुद् + लुट् (उपपदतत्पुरुष)।

४. जोवलोकस्य धर्मस्य = षष्ठी शेषे।

५. परिरक्षिता = परि – √रक्ष + तृन्।

श्लोकसंख्या -१४

१. रक्षिता = रक्ष् – पालने (भ्वां प स रक्षति) ,रक्ष् + तृण्।

२. वेदवेदाङ्गतत्त्वज्ञः = वेदाश्च वेदाङ्गानि च = वेदवेदाङ्गानि (द्वन्दसमासः), वेदवेदाङ्गानां तत्त्वं जानाति यः (उपपदतत्पुरुषसमासः)

३. धनुर्वेदे = अधिकरणेसप्तमी।

४. निष्ठितः = नितरां स्थितमिति = नि – √स्था + कर्तृ + क्त।

श्लोकसंख्या -१५

१. सर्वशास्त्रार्थतत्त्वज्ञः = सर्वाणि शास्त्राणि (सहसुपा) सर्वशास्त्राणाम् अर्थतत्त्वंजानाति यः (उपपदतत्पुरुषः)।

२. स्मृतिमान् = √स्मृ + क्तिन् , स्मृति + मतुप्।

३. प्रतिभानवान् = प्रतिभा + अङ्+ टाप् + प्रतिभान = प्रतिभा + मतुप्।

४. सर्वलोकप्रियः = सर्व लोका सर्वलोकः (ससुपा) सर्वलोकानां प्रियः (षष्ठीतत्पुरुषसमासः)

५. अदीनात्मा = नदीनः नदीन (नञ् तत्) अदीनः आत्मा यस्य।

६. विचक्षण = वि – चक्ष + अण्।

श्लोकसंख्या -१६

१. अभिगतः = अभि– √गम + क्तः।

२. सद्भिः = अनुक्ते कर्तरि तृतीया।

३. सिन्धुभिः = अनुक्ते कर्तरि तृतीया।

४. आर्यः = ऋ+ ण्यत् ।

५. सर्वसमः = सर्वे सम (तृतीयातत्पुरुषः)।

६. प्रियदर्शन = प्रियं दर्शनं यस्य सः, बहुव्रीहिसमासः

श्लोकसंख्या -१७

१. कौसल्यानन्दवर्धनः = कौसल्याय आनन्दम् कौसन्यानन्दम् (चतुर्थी तत्पुरुषसमासः)। कौसल्यायाः
आनन्दस्य वर्धनम्।

२. गाम्भीर्ये = गम्भीर + अण्, अधिकरणे सप्तमी।

३. समुद्रः = विण. (मुद्रा मर्यादा तया सह वर्तेते इति। कर्तरिप्रथमा, सम् – उद् + रक्।

४. धैर्येन = करणे तृतीया।

५. हिमवान् = हिम् + मतुप्।

६. अलङ्कारोऽस्ति = उपमा। उपमा अलंकारस्य लक्षणं यथा – 'साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः'।

श्लोकसंख्या -१८

१. विष्णुना = विष्णुः = पु., विशति सर्वभूतानि अत्रेति। यस्माद्विश्वमिदं सर्वं तस्य शक्त्या महात्मनः
तस्मादेवोच्यते विष्णुर्विश्धातोः प्रवेशनात्।

२. विष्णुना = तुल्यार्थ शब्दयोगे तृतीया।

३. वोर्ये = अधिकरणे सप्तमी।

४. प्रियदर्शन = प्रियं दर्शनं यस्य सः, बहुव्रीहिसमासः।

५. कालाग्निसदृशः = कालाग्निना सदृशः, तृतीयातत्पुरुषसमासः।

६. क्षमया = हेत्वर्थे तृतीया।

७. पृथिवीसमः = पृथिव्याः समः, षष्ठीतत्पुरुषसमासः।

८. अत्र अलङ्कारोऽस्ति = उपमा। लक्षणं यथा - 'साम्यं वाच्यमवैधर्म्यं वाक्योक्ये उपमा द्वयोः'।

श्लोकसंख्या -१९

१. त्यागः = त्यज् + घञ्।

२. धनदेन = तुल्यार्थ शब्दयोगे तृतीया।

३. सत्ये = अधिकरणेसप्तमी।

४. गुणसम्पन्नम् - गुणैः सम्पन्नम् इति (तृतीयातत्पुरुषसमासः)।

५. सत्यपराक्रमः - सत्यमेव पराक्रमम् इति (रूपककर्मधारय)।

६. अलङ्कारोऽस्ति = उत्प्रेक्षा। उत्प्रेक्षा-अलंकारस्य लक्षणं यथा - 'भवेत्पम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना'।

श्लोकसंख्या -२०

१. ज्येष्ठम् = विण. (प्रशस्य इष्ठन्), वृद्ध + इष्ठ।

२. ज्येष्ठगुणैर्युक्तम् = ज्येष्ठः गुणः इति ज्येष्ठगुणः, ज्येष्ठगुणेन युक्तः तम्, तृतीयातत्पुरुषसमासः।

३. प्रकृतीनाम् = शेषे षष्ठी।

४. युक्तम् = $\sqrt{}$युज् + क्त + पुं + द्वितीया एकवचन।

५. प्रियकाम्यया = प्रियं कर्तुमिच्छया इति छन्दसि परेच्छायामपि काप्यज वक्तव्यम् इति विधाने सिद्ध।

श्लोकसंख्या -२१

१. यौवराज्येन - यौवराज्यं - स यौवराज्ये निधाय नवयौवनोद्भूतम्, सहयुक्तेऽप्रधाने तृतीया।

२. संयोक्तुम् = सम - $\sqrt{}$युज् + तुमुन्।

३. प्रोत्या = हैत्वर्थे तृतीया।

४. महीपतिः = मही - मह् अच् ङीष्, महया पति (षष्ठीतत्पुरुषः)।

५. अभिषेक = सम्भारान् अभिषेकाय सम्भारः, चतुर्थीतत्पुरुषसमासः)।

६. दृष्ट्वा = √दृश् + क्त्वाच्।

श्लोकसंख्या -२२

१. दत्तवरा = दत्त = दीयते इति, √दा - क्तः, दत्तः वरः यस्यै सा (बहुव्रीहिसमासः)।

२. एनम् = एतद् + द्वितीया एकवचनम्।

३. अयाचत् = √याच् + लङ् प्रथमपुरुष, एकवचनम्।

४. विवासनम् = वि - √वास् + भावे ल्युट्।

५. अभिषेचनम् = अभि- √सिच् + ल्युट्।

श्लोकसंख्या -२३

१. सत्यवचनात् = सत्य = सते हितम् सत् यत्, हेत्वर्थे पञ्चमी।

२. धर्मपाशेन = धर्मः एव पाशः, (रूपक कर्मधारय), करणे तृतीया।

३. संयतः = सम् - √यम् + क्त।

४. विवासायमास = वि - वास् + अस् + लिट् + णल्।

५. प्रियम् = कर्मणि द्वितीया।

श्लोकसंख्या -२४

१. जगाम = √गम् + लिट् णल्।

२. वनम् = गम् - कर्मणि द्वितीया।

३. प्रतिज्ञाम् = प्रति - √ज्ञा + अङ्।

४. अनुपालयन् = अनु - पाल + णिच् + शतृ + पुं प्रथमा एकवचनम्।

५. प्रियकारणात् = हेतौ पञ्चमी।

श्लोकसंख्या -२५

१. प्रजन्तम् = व्रज गतौ (भ्वा प म व्रजति), व्रज - शतृं, द्वितीया एकवचनम्।

२. अनुजगाम = अनु- √गम् + लिट् णल्।

३. स्नेहात् = हेत्वर्थे पञ्चमी

४. विनयसम्पन्नः = विनयेन सम्पत्रः (तृतीयातत्पुरुषः)।

५. आनदवर्धनः = आनन्दस्य वर्धनम् (षष्ठीतत्पुरुषः)।

श्लोकसंख्या -२६

१. भ्रातरम् = पु. भाजते इति भ्राज तृण् = भातृ, भातरम् कर्मकारकः।

२. दयितः = दयः + क्त।

३. सौभ्रात्रम् = सुभ्रातृ + अण् 'हायनान्तयुवादिभ्योऽण' सूत्रे।

४. अनुदर्शयन् = अनु - √दृश् - णिच् + शतृ, पुं प्रथमा एकवचनम्।

५. भार्या = नित्यस्नाता सुगन्धा च नित्यञ्च प्रियवादिनी, भृ + क्यप् - टाप् स्त्रियाम्।

६. प्राणसमा = प्राणैः समा (तृतीया तत्पुरुषसमासः)

७. हिता = हि + भावे क्त + स्त्रियां टाप्।

श्लोकसंख्या -२७

१. कुले = कुलं = क्ली- कुल इगुपधेति कः, अधिकरणे सप्तमी।

२. जाता = जन् + क्त + स्त्रियां टाप्।

३. देवमायेव - देवस्य माया इति देवमाया, (षष्ठीतत्पुरुषः)

४. निर्मिता = निर - √मा + क्त + स्त्रियां टाप्।

५. सर्वलक्षणसम्पन्ना = सर्वं लक्षणं (सहसुपा) सर्वलक्षणेन सम्पन्ना, तृतीयातत्पुरुषः।

६. नारीणाम् = निर्धारणे षष्ठी।

७. उत्तमा = उद्- तम् + अन्।

८. बधुः = अनुगत क्रियायाः कर्ता।

९. अत्र अलंकारोऽस्ति = उपमा। लक्षणं यथा - साम्यं वाच्यमवैधर्म्यं वाक्यैके उपमा द्वयोः।

श्लोकसंख्या -२८

१. सोता = स्त्री, सिनोतीति सिञन् वन्धे क्तः दीर्घश्च, सिनोति खनति भूमिमिति सोता। सिरवलने + क्त + आप् (निपातने दीर्घ)

२. अनुगता = अनु - √गम् + क्त + स्त्रियां टाप्।

३. शशिनम् = 'अनु' शब्द योगे द्वितीया।

४. रोहिणी = कर्तरि प्रथमा।

५. पौरैः = अनुक्ते कर्तरि तृतीया।

६. दूरम् = व्याप्तार्थे द्वितीया।

७. पित्रा = अनुत्ते कर्तरितृतीया।

८. दशरथेन = अनुक्ते कर्तरितृतीया।

श्लोकसंख्या -२९

१. श्रृङ्गवेरपुरे = अधिकरणे सप्तमी।

२. व्यसर्जयत् = वि- √सृज् + णिज् + लङ् प्रथमपुरुषः, एकवचनम्।

३. गुहम् = कर्मणि द्वितीया।

४. आसाद्य =आ - √सद् + ल्यप्।

५. धर्मात्मा = धर्म आत्मा यस्य सः (बहुव्रीहिसमासः)।

६. निषादाधिपतिम् = निषादानाम् अधिपतिः (षष्ठी तत्पुरुषः)।

श्लोकसंख्या -३०

१. गुहेन = सहयुक्तेऽप्रधाने, तृतीया।

२. लक्षणेन, सीतया = सहार्थे तृतीया।

३. ते = कर्तरि प्रथमा।

४. वनेन = करणे तृतीया।

५. गत्वा = गम् + क्त्वाच्।

६. नदीः = कर्मणि द्वितीया।

७. तीर्त्वा = √तृ + क्त्वाच्।

८. बहुदकाः = बहुनि उदकानि सन्ति यत्र, ताः इति (बहुव्रीहिसमासः)।

श्लोकसंख्या -३१

१. चित्रकूटम् = कर्मप्रवचनीययोगे द्वितीया।

२. अनुप्राप्य = अनु - प्र - √आप् + ल्यप्।

३. शासनात् = (शासनं स्वीकृत्य इति) ल्यवलोपे पञ्चमी।

४. रम्यम् = आवसथम् कर्म द्वितीया।

५. आवसथम् = आ - √वस् + अथच्। कर्मणि द्वितीया।

६. रम्यमानाः = √रम + शानच् - प्रथमा एकवचनम्।

श्लोकसंख्या -३२

१. देवगन्धर्वसङ्काशाः = देवः = दीप्यति आनन्देन क्रीडतीति √दिव् + अच्, गन्धर्व = गन्धं सङ्गीतवाद्यादिजनितं प्रमोदनं प्राप्नोति गन्ध + अर्व + अण्, देवश्चगन्धर्वश्च (द्वन्दसमासः), देवगन्धर्व सङ्काशाः (सहसुपा समासः)

२. न्यवसन् = नि - √वस् + शतृ, प्रथमा एकवचनम्।

३. सुखम् = व्याप्तार्थे द्वितीया।

४. गते, रामे = भावे सप्तमी।

५. पुत्रशोकातुराः = पुत्रात् जातः शोकः (शाकपार्थिववत्) तेन आतुरः, तृतीया तत्पुरुषसमासः।

श्लोकसंख्या -३३

१. जगाम = √गम् + लिट् + णल्।

२. विलपन् = वि- √लप् + शतृ + प्रथमा एकवचनम्।

३. गते, तस्मिन् = भावे सप्तमी।

४. वसिष्ठ प्रमुखैः = अनुक्ते कर्तरि तृतीया।

५. द्विजैः = अनुक्ते कर्तरि तृतीया।

श्लोकसंख्या -३४

१. नियुज्यमानः = नि -√युज् + कर्मणि शानच्।

२. राज्याय = क्रियार्थोपपदस्य स्थानिनः चतुर्थी।

३. महाबलः = महान् बलः यस्य सः (बहुव्रीहि समासः)।

४. वोरः = उक्ते कर्माणि प्रथमा।

श्लोकसंख्या -३५

१. सत्यपराक्रमम् = सत्य = सते हितम् यत् सत्, सत्यमेव पराक्रमः यस्य सः।

२. गत्वा = √गम् + क्त्वाच्।

३. तु = अव्यय

४. अयाचत = √याच् + लङ्, प्रथमपुरुषः एकवचनम्।

श्लोकसंख्या -३६

१. धर्मज्ञः = धर्मः = धरति विश्वम् इति, √धृ मन्। धर्मान् जानाति (उपपद तत्पुरुषः) इति, धर्म + ज्ञा + जन् + ङः

२. वचः = वच् = अदा प द्विक् व्यक्ति, कर्मणि द्वितीया।

३. अब्रवीत् = √ब्रु + लङ्, प्रथमपुरुषः एकवचनम्।

श्लोकसंख्या -३७

१. ऐच्छत् = √ईष् + लङ्, प्रथमपुरुषः एकवचनम्।

२. आदेशात् = आदेशम् स्मृत्वा (ल्यब्लोपे कर्मणि पञ्चमी)

३. महावलः = महत् बलम् यस्य सः (बहुव्रीहिसमासः)।

४. पादुके = कर्मणि द्वितीया।

५. राज्याय = राज्यं पालयितुम् इति। 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' सुत्रे चतुर्थी।

श्लोकसंख्या -३८

१. निवर्त्तयामास = नि - √वृत् + णिच् + अस् + लिट् + णल्।

२. भरताग्रजः = अग्रे ज्ञायते इति अग्रजः (उपपदतत्पुरुषः)

३. भरतस्य अग्रजः (षष्ठी तत्पुरुषः)

४. रामपादौ = कर्मणि द्वितीया।

५. उपस्पृशन् = उप- √स्पृश् + शतृ + प्रथमा एकवचनम्।

श्लोकसंख्या -३९

१. नन्दिग्रामे = नन्दयतीति नन्द सर्वधातुभ्यः इन्, अधिकरणे सप्तमी।

२. रामागमनकाङ्क्षया = रामस्य आगमनम्, रामागमनम् (षष्ठी तत्पुरुषसमासः), रामस्य आगमनस्य आकाङ्क्षा, ताभिः सह (तृतीया तत्पुरुषसमासः)।

३. गते भरते = भावे सप्तमी।

४. श्रीमान् = श्रीरस्यास्ति इति, श्री + मतुप्।

५. सत्यसन्धः = सत्यं सन्धा यस्य सः बहुव्रीहिसमासः।

६. जितेन्द्रियः = जितानि इन्द्रियाणि येन सः बहुव्रीहिसमासः।

श्लोकसंख्या -४०

१. आलक्ष्य = लक्ष्य = √लक्ष + ण्यत्। आ- √लक्ष्य + ल्यप्।

२. नागरस्य, जनस्य = कृद् योगे षष्ठी।

३. प्रविवेश = प्र - √विश् + लिट् णल् ।

श्लोकसंख्या -४१

१. प्रविश्य = प्र - √विश् + ल्यप्।

२. महाराण्यम् = महत् अरण्यम् (कर्मधारयसमासः)।

३. राजीवलोचनः = राजीवमिव लोचनं यस्य सः, बहुव्रीहिसमासः।

४. हत्वा = हन् + क्त्वाच्।

५. अगस्त्यम् = अग- स्तै+ कर्माणि द्वितीया।

६. अलङ्कारोऽस्ति = उपमा। लक्षणं यथा - साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः।

श्लोकसंख्या - ४२

१. अगस्त्यवचनात् = ल्यब्लोपे कर्मणि पञ्चमी।

२. जग्राह = √ग्रह + लिट् + णल्।

३. ऐन्द्रम् = इन्द्र + अण्।

४. शरासनम् = शरम् अस्यति अनेनेति, शर् + अस् + ल्युट्।

श्लोकसंख्या -४३

१. प्रीतः = √प्री + क्तः।

२. अक्षयः = क्षयं यस्मात् नास्ति, निञ् तत्पुरुषसमासः।

३. वसतः = √वस् + शतृ + षष्ठी एकवचनम्।

४. वने = अधिकरणे सप्तमी।

५. वनैचरैः = वनं = वनतीति वन् पचाद्यच्, तेन चरति इति वनैचरः, तैः, (तृतीया तत्पुरुषसमासः)

श्लोकसंख्या -४४

१. अभ्यागमन् = अभि - आ - √गम् + लुङ्+ प्रथम पु. बहुवचनम्।

२. ऋषयः = ऋषिः = ऋष् उणादिसूत्रेण इन्, ऋष् + इक्, ऋषिः। कर्तरि प्रथमा बहुवचनम्।

३. वधाय = तादर्थे चतुर्थी।

४. प्रतिशुश्रुव = प्रति + लिट् + णल्।

श्लोकसंख्या -४५

१. प्रतिज्ञात = प्रतिज्ञा = प्रति + ज्ञा + अङ्+ टाप्।

२. रामेण = अनुक्ते कर्तरि तृतीया।

३. वधः = √इन् + अल्।

४. संयति = सम् - √यम् + क्तिन्।

५. राक्षसाम् = षष्ठी शेषे।

६. अग्निकल्पनाम् = कल्प = कल्प्यते विरीयते असौ कृप् घञ्, अग्नेः कल्पः तेषाम्।

श्लोकसंख्या -४६

१. वसता = √वस् + शतृ + तृतीया एकवचनम्।

२. विरूपित = वि- रूपय + क्त , प्रथमा एकवचनम्।

३. शूर्पणखाः = शूर्प इव नखाः यस्या सा (बहुव्रीहिसमासः)।

श्लोकसंख्या -४७

१. शूर्पणखावाक्यात् = शूर्पणखायाः वाक्याम्, तस्मात् पञ्चमी तत्पुरुषसमासः, ल्याव्लोपे पञ्चमी।

२. उद्युक्तान् = उद् - √युज् + क्त द्वितीया बहुवचनम्।

श्लोकसंख्या -४८

१. निजधान = निज = निश्चयेन जायते इति नि- √जन + ड , नि - √हन् + लिट् प्रथमपुरुष एकवचनम्।

२. रणे = अधिकरणे सप्तमी।

३. पदानुगान् = पदमनुगच्छति पदानुग, (उपपदतत्पुरुषः) तान्।

४. वणे = अधिकरणे सप्तमी।

श्लोकसंख्या -४९

१. राक्षसाम् = राक्षसः = रक्षन्ति अस्मात् रक्षः, रक्ष एव राक्षस, (निर्धारणे षष्ठी)।

२. निहतानि = नि - √हिन + कृ।

३. ज्ञातिवधम् = ज्ञातीनां वधः, षष्ठी तत्पुरुषः।

४. श्रुत्वा = √श्रु + क्त्वाच्।

५. क्रोधमूर्च्छितः = क्रोधेन मूर्च्छितः, तृतीया तत्पुरुषः।

श्लोकसंख्या -५०

१. वरयामास = वर = ईप्से - चुरा उ स वरयति - ते। वृ-आम् + अस् + लिट् णल्।

२. वार्यमाणः = √वृ + शानच् ।

३. मारीचेन = अनुक्ते कर्तरि तृतीया।

श्लोकसंख्या -५१

१. विरोधः = वि - √रूध् + धञ्।

२. बलवता = वल् = भ्वा अ स वलते। सहार्थे तृतीया।

३. अनाहृत्य = न- आ - √दृ + ल्यप्।

४. कालचोदितः = कालेन चोदितः (तृतीया तत्पुरुषसमासः)

श्लोकसंख्या -५२

१. सहमारीचः = सहः = दिवा प अ सद्यति, मारीचेन सह वर्तमानः (बहुव्रीहिसमासः)।

२. जगामः = √गम् + लिट् + णल् (प्रथमपुरुषः बहुवचनम्)।

३. मायाविना = अनुक्ते कर्तरि तृतीया।

४. नृपात्मजौ = उक्ते कर्मणि प्रथमा।

५. अपवाह्य = अप् - √वह + णिच् + ल्यप्।

श्लोकसंख्या -५३

१. जहारः = √हृ - लिट् + णल्।

२. हत्वा = √हन् + क्त्वाच्।

३. निहतं = नि – √हन् + क्त +(पुं) द्वितीया एकवचनम्।

४. दृष्ट्वा = √दृश् + क्त्वाच्।

५. हताम् = √हृ + क्त + स्त्रियां टाप्, द्वितीया एकवचनम्।

६. श्रुत्वा = √श्रु + क्त्वाच्।

श्लोकसंख्या -५४

१. राघवः = रघोः अपत्यम्, रघु + अण्।

२. शोकसन्तप्तः = शोकेन सन्तप्तः, तृतीया तत्पुरुषसमासः। सम् –तप् + क्त।

३. विललाप = वि – √लप् + लिट् + णल्।

४. शोकेन = सहार्थे तृतीया।

५. दग्धा = √दह् + क्त्वाच्

श्लोकसंख्या -५५

१. मार्गमाणः = मार्गः = मार्गते मृग्यते इति वा मार्ग मृग् वा घञ्। मार्गः + शानच्, प्रथमा एकवचनम्।

२. सन्ददर्श = सम् – √दृश् + लिट् + णल्।

३. रूपेण = प्रकृत्यादित्वात्, तृतीया।

४. घोरदर्शनम् = घोरं दर्शनं यस्य सः (बहुव्रीहिसमासः)।

श्लोकसंख्या -५६

१. महाबाहुः = महान्तौ बाहुः यस्य सः (बहुव्रीहिसमासः)।

२. निहत्य = नि– √हन् + ल्यप्।

३. ददाह = √दह् + लिट् + णल् (प्रथमपुरुषः एकवचनम्)।

४. कथयामास = कथ + आम् + अस् + लिट् + णल्; वा, √कथय् + लिट् प्रथमपुरुषः एकवचनम्।

श्लोकसंख्या -५७

१. श्रमणां = तपः खेदयोः (दिवा च अ श्राम्यति), श्रम्, घञ्।

२. अभिगच्छ = अभि– √गम् + लोट् हि

३. अभिगच्छन्महातेजाः = अभिगच्छत् + महातेजाः।

४. अभ्यगच्छत् = अभि – √गम् + लङ्+ प्रथमपुरुषः एकवचनम्।

५. महातेजाः = महत् तेजाः यस्य सः = बहुव्रीहिसमासः।

६. शत्रुसूदनः = शत्रुन् सूदति यः सः = उपपदतत्पुरुषः।

श्लोकसंख्या -५८

१. शबर्य्या = अनुक्ते कर्तरि तृतीया।

२. पूजितः = √पूज् + क्तः।

३. सम्यग् = अव्ययः।

४. दशरथात्मजः = दशरथस्य आत्मजः, (षष्ठीतत्पुरुषसमासः), आत्मजः जायते यः = उपपदतत्पुरुषसमासः।

५. पम्पातीरे = पम्पायाः तीरे (षष्ठी तत्पुरुषसमासः) अधिकरणे सप्तमी।

६. हनुमता = सहयुक्तेऽप्रधाने इति तृतीया।

७. सङ्गतः = सम् + √गम् + क्तः।

श्लोकसंख्या -५९

१. वचनात् = वच् = वाचि (अदा प द्विक् व्यक्ति)। ल्यव्लोपे पञ्चमी।

२. हनुमत् = हनु + अस्त्यर्थे मतुप्।

३. सुग्रीवेण = सहयुक्तेऽप्रधाने इति तृतीया।

४. समागतः = सम् - आ -√गम् + क्त।

५. सुग्रीवाय = क्रियायोगे चतुर्थी।

६. शंसत् = 'बहलंछन्दस्यामाङ्योगे' इत्यङ्भावः। √शंस् + शतृ, प्रथमा एकवचनम्।

श्लोकसंख्या -६०

१. आदितः = आदौ, (अव्यय), आदि + पञ्चम्यर्थे तसिल्।

२. यथावृतम् = वृत्तम् अनतिक्रम्य, अव्ययीभावसमासः।

३. सीतायाः = षष्ठी शेषे।

श्लोकसंख्या -६१

१. चकार = कृ + लिट् + णल्।

२. रामेण = सहार्थे चतुर्थी।

३. वानरराजेन = वानराणां राजा इति (षष्ठीतत्पुरुषः), वानर राजा + टच्, वानरराज, सहयुक्तेऽप्रधाने इति तृतीया।

श्लोकसंख्या -६२

१. रामाय = क्रियायोगे चतुर्थी।

२. आवेदितम् = आ - √विद् + क्त, प्रथमा एकवचनम्।

३. प्रणयाद् = हेत्वर्थे पञ्चमी।

४. दुःखितेन = अनुक्ते कर्तरि तृतीया।

५. वालिवधम् = प्रति शब्दे द्वितीया।

श्लोकसंख्या -६३

१. कथयामासः = कथ् = चुरा - प - सक् - कथयति। √कथ् + आम् + अस् + लिट् + णल्।

२. वालिनः = शेषे षष्ठी।

३. आसीत् = √अस् + लङ् + द

४. वोर्येन = प्रकृत्यादित्वात् तृतीया।

श्लोकसंख्या -६४

१. दर्शयामास =√दृश् + आम् + अस् + लिट् + णल्।

श्लोकसंख्या -६५

१. उत्स्मयित्वा = उत् – √स्मि + णिच् + क्त्वाच्।

२. महावाहुः = महा = (स्त्री) मह्यते पूज्यते इति मह घ टाप्। महान्तौ बाहु यस्य सः = बहुव्रीहिसमासः।

३. चिक्षेप = क्षिप् + लिट् + णल्।

४. प्रेक्ष्य = प्र– √ईक्ष् + ल्यप्, प्रेक्षा (स्त्री) = प्र. ईक्ष्, अः टाप् ।

श्लोकसंख्या -६६

१. विभेद = भिद् + लिट् + णल्।

२. महेषुण = महः = मह्यते इति मह असुन्, करणे तृतीया।

३. जनयन् = जनः = √जन् + अच्, √जन् + णिच् + शतृ।

श्लोकसंख्या -६७

१. प्रीतमना = प्रीत = प्री + क्त , प्रीतमनाः = प्रीतं मनः यस्य सः, बहुव्रीहिसमासः।

२. विश्वस्तः = वि–श्वस् + क्त , प्रथमा एकवचनम्।

३. महाकपि = महांश्चासौ कपिश्चेति, कर्मधारयसमासः।

४. रामसहितः = रामेण सहितो वत्तमानो यः सः, बहुव्रीहिसमासः।

५. जगाम = √गम् + लिट् + णल्।

श्लोकसंख्या -६८

१. अगर्जत् = गर्ज = भ्वा प, चुरा उ अक गर्जति, गर्ज + लङ्–द।

२. हरिवरः = हरिषुवरः (सप्तमी तत्पुरुषसमासः)।

३. नादेन = करणे तृतीया।

४. निर्जगाम = निर्+ गम् + लिट् + णल्।

५. हरीश्वरः = हरीणाम् ईश्वरः (षष्ठी तत्पुरुषः)।

श्लोकसंख्या -६९

१. अनुमान्य = अनु– √मन + णिच् + ल्यप्।

२. सुग्रीवेन = सहार्थे तृतीया।

३. निजधान = नि –√हन् + लिट् + णल्।

४. शरेण = करणे तृतीया।

श्लोकसंख्या -७०

१. सुग्रीववचनात् = वच् = अदा प द्विक् व्यक्ति), ल्यव् लोपे पञ्चमी।

२. हत्वा = √हन् + क्त्वाच्।

३. प्रत्यपाद्यत् = प्रति– √पाद् + लङ् + प्रथमपुरुषः एकवचनम्।

श्लोकसंख्या -७१

१. समानीय = सम् - आ - √नी + ल्यप्।

२. वानरर्षभः = (वा विकल्पितः नरः अथवा वानं वने भवं फलादिकं रातीति वान रा कः = वानरः); वानर + ऋषभः , वानरेषु ऋषभः, सप्तमी तत्पुरुषः।

३. प्रस्थापयामारा = प्र- √स्था + णिच् + अस् + लिट्+ णल्।

४. दिदृक्षुः = √दृश + सन् + अ + उ।

५. जनकात्मजाम् = जनकस्य आत्मजा, षष्ठी तत्पुरुषः।

श्लोकसंख्या -७२

१. वचनात् = वचनमङ्गीकृत्य इति वाक्य, ल्यवलोपे पञ्चमी।

२. हनुमान् = हनु + मतुप्।

३. वली = वल् + अस्त्यर्थे इन्।

४. पुप्लुवे = √प्लु + लिट् प्रथमपुरुषः एकवचनम्

५. लवणार्णवम् = लवणाक्तः अर्णवः।

श्लोकसंख्या -७३

१. समासाद्य = सम् - आ - √साद् + ल्यप्।

२. रावण पालिताम् = रावणेन पालिताम् तृतीया तत्पुरुषसमासः।

३. ददर्श = √दृश् + लिट् + णल्।

४. ध्यायन्तीम् = (ध्या = भ्वा प सक धमति), धै + शतृ + स्त्रियाम् ङीप्, द्वितीया एकवचनम्।

श्लोकसंख्या -७४

१. निवेदयित्वा = नि - √विद् + णिच् + क्त्वाच्।

२. विनिवेद्य = वि- नि - √विद् + ल्यप्।

३. समासास्य = सम् -आ - √श्वस् + ल्यप्।

४. मर्दयामास = (मर्दनं = मृद् भावे ल्युट्), √मर्द- आम् - अस् + लिट् + णल्।

श्लोकसंख्या -७५

१. सेनाग्रगान् = अग्रं गच्छतीति = अग्रग = उपपदतत्पुरुषः।

२. सेनानाम् अग्रतः = सेनाग्र = षष्ठीतत्पुरुषः।

३. हत्वा = √हन् + क्त्वाच्।

४. निष्पिप्य = √निर् + पिष् + ल्यप्।

५. समुपागमत् = सम-उप-√गम् + लङ्- द।

श्लोकसंख्या -७६

१. वरात् = (वर् = चुरा उ स वरयति - ते), हेत्वर्थे पञ्चमी।

२. यदृच्छया = प्रकृत्यादित्वात् तृतीया।

श्लोकसंख्या -७७

१. दग्ध्वा = (दग्धा = दह्यते स्म इति दह् - क्तः), √दह + क्त्वा।

२. सीताम् = ऋते शब्दे योगे द्वितीया।

३. रामाय = क्रियायोगे चतुर्थी।

४. आख्यातुम् = आ - ख्या + तुमुन्।

५. आयात = आ - √या + लङ् द।

श्लोकसंख्या -७८

१. अभिगम्य = अभि- √गम् + ल्यप्।

२. न्यवेदयत् = नि - √विद् + लङ् - द।

३. दृष्ट्वा = √दृश् + क्त + स्त्रियामाप् प्रथमा विभक्तिः, एकवचनम्।

४. सीता = उक्ते कर्मणि प्रथमा।

श्लोकसंख्या -७९

१. सुग्रीवसहितः = सुग्रीवेन सहितः (तृतीया त्पुरुषः)।

२. क्षोभयामासः = क्षोभः = क्षुभ् भावे घञ्, क्षोभ + णिच् + अस् लिट् + णल्।

३. शरैः = करणे तृतीया।

४. आदित्यसन्निभैः = आदित्यस्य सन्निभः, (षष्ठी तत्पुरुषः) तैः।

श्लोकसंख्या -८०

१. दर्शयामास = √दृश+ णिच् + अस् + लिट् + णल्।

२. समुद्रवचनात् = लव्लोपे पञ्चमी, समुद्रस्य वचनात्।

३. अकारयत् = √कृ + णिच् + लङ् द।

४. नलम् = प्रयोज्य कर्तरि द्वितीया।

श्लोकसंख्या -८१

१. गत्वा = √गम् + त्वाच्।

२. हत्वा = √हन् + त्वाच्।

३. आदवे = आङ् द्वे अप् अधिकरणे सप्तमी।

४. सोताम् = कर्मप्रवचनीययोगे द्वितीया।

५. अनुप्राप्य = अनु- प्र + आप् + ल्यप्।

६. उपागतम् = उप- √गम् + लुङ् + द।

श्लोकसंख्या -८२

१. उवाच = ब्रु + लिट् + णल्

२. जनसंसदि = अधिकरणे सप्तमी।

३. अमृष्यमाना = न - √मृष् + कर्मणि शानच्।

४. विवेश = √विश् + लिट् + णल्।

श्लोकसंख्या -८३

१. अग्निवचनात् = अग्नेः वचनात् = अग्नेः वचनम्, (षष्ठी तत्पुरुषसमासः)।

२. ज्ञात्वा = √ज्ञा + क्त्वाच्।

३. कर्मणा = करणे तृतीया।

४. सचराचरम् = चराश्च अचराश्च = चराचरम्, समाहारद्वन्द्वः। चराचरेण सह वर्तमानम् बहुव्रीहिसमासः।

१. तुष्टम् = √तुष् + क्त।

श्लोकसंख्या -८४-८५

१. सर्वदैवतैः = अनुक्ते कर्तरि तृतीया।

२. अभिषिच्य = अभि - √सिच् + ल्यप्।

३. राक्षसेन्द्रम् = (राक्षसः = रक्षति अस्मात् रक्ष, रक्ष एव राक्षस) राक्षसेषु इन्द्रः, सप्तमी तत्पुरुषः।

४. कृतकृत्य = कृतं कृत्यम् येन सः, बहुव्रीहिसमासः।

५. विज्वरः = विगतो ज्वरो यस्य सः, बहुव्रीहिसमासः।

श्लोकसंख्या -८६

१. देवताभ्यः = (देवः = दीप्यति आनन्देन क्रीड़तीति दिव अच्), अपादाने पञ्चमी।

२. प्राय्य = प्र - √आप् + ल्यप्।

३. समुत्थाय = सम् - उत् - √स्था + णिच् + ल्यप्।

४. प्रस्थितः = प्र- √स्था + क्तः।

५. सूहृद्वृतः = सुहृद्भिः वृत्तः, तृतीया तत्पुरुषसमासः।

श्लोकसंख्या -८७

१. भरद्वाजाश्रमम् = भरद्वाजस्य आश्रमम्, षष्ठी तत्पुरुषसमासः।

२. व्यसर्जयत् = वि - √सृज् + णिच् + लङ् द।

श्लोकसंख्या -८८

१. जल्पन् = (जल्पः = जल्प वाचि घञ्), जल्प + शतृ, प्रथमा एकवचनम्।

२. आख्यायिकाम् = आ - √ख्या + णक् + स्त्रियां टाप्।

३. समारुह्य = सम् - आ - √रुह् + ल्यप्।

श्लोकसंख्या -८९

१. नन्दिग्रामे = अधिकरणे सप्तमी।

२. हित्वा = √हि + त्वाच्।

३. अनघः = (अघं = पापकरणे अघ णिच् अच्), नास्ति अघः यस्य सः, नञ् बहुव्रीहिसमासः।

४. अवाप्तवान् = अव - √आप् + क्तवतु, प्रथमाविभक्तिः, एकवचनम्।

श्लोकसंख्या -९०

१. प्रहृष्टमुदितः = प्रहृष्टः = प्र - √हृष् + क्तः, प्रहृष्टात् मुदितः पञ्चमी तत्पुरुषसमासः।

२. तुष्टः = √तुष् + क्त, प्रथमा एकवचनम्।

३. पुष्टः = √पुष् + क्त, प्रथमा एकवचनम्।

४. निरामयः = नास्ति अमयः यस्य सः, नञ् बहुव्रीहिसमासः।

श्लोकसंख्या -९१

१. अविधवा = विगतो धवो यस्याः सा (बहुव्रीहिसमासः), न विधवा अविधवा = नञ् तत्पुरुषसमासः।

श्लोकसंख्या -९२

१. अग्निजम् = अग्नेः जायते इति, उपपदतत्पुरुषः, अग्नि - जन + ड।

२. अप्सु = अधिकरणे सप्तमी।

३. मज्जन्ति = मसज् + लट् + अन्ति।

४. वायजम् = वातात् जायते = यत् = उपपदतत्पुरुषसमासः।

श्लोकसंख्या -९३

१. क्षुद्भयम् = क्षुद् = रुधा उ सक क्षुणक्ति, क्षुन्ते, क्षुदः भयम् = पञ्चमीतत्पुरुषसमासः।

२. तस्कर भयम् = तस्करः = तत् कृ अच् सुट्, तस्कारात् भयम् = पञ्चमी तत्पुरुषसमासः।

३. धनधान्ययुतानि = धनानि च धान्यानि च धन धान्यम् = समाहारद्वन्द्वसमासः।

श्लोकसंख्या -९५

१. अश्वमेधशतैः = (अश्वमेधः = पु. अश्वः मेध्यते हिंस्यते यत्र घञ्) अश्वमेधानांशतम्, षष्ठी तत्पुरुषसमासः।

२. इष्ट्वा = √यज् + क्त्वाच्।

३. विहद्भ्यः / ब्राहणेभ्यः = सम्प्रदाने चतुर्थी।

श्लोकसंख्या -९६

१. स्थापयिष्यति = √स्था + णिच् + लृद्ष्यति।

२. चतुवर्ण्यम् = चतुवर्ण + ष्यञ्।

३. नियोक्ष्यति = नृ + √युज् + लृट् + स्यति।

श्लोकसंख्या -९७

१. उपासित्वा = उप - √आस् + क्त्वाच्।

२. ब्रह्मलोकम् = ब्रह्मणः लोकः = ब्रह्मलोकः, षष्ठी तत्पुरुषसमासः।

श्लोकसंख्या -९८

१. पवित्रम् = पवित्र = पू + इत्र।

२. सर्वपापैः = करणे तृतीया।

३. पापघ्नम् = पापं हन्ति यः = उपपदतत्पुरुषसमासः, पाप + हन् + टक्।

४. प्रमुच्यते = प्र- √मुच् + कर्मणि + लट् ते।

श्लोकसंख्या -९९

१. आयुष्यम् = आयुष् + यत्।

२. पठन् = पठ् + शतृ + प्रथमाविभक्तिः एकवचनम्।

३. सपुत्रपौत्र = पुत्राः च पौत्राश्च = पुत्रपौत्राः = द्वन्दसमासः। पुत्रपौत्रैः सह वर्त्तमानः, बहुव्रीहिसमासः।

४. प्रेत्य = प्र + √इ + ल्यप्।

२.५ अध्यायस्य असमीया भाषायां सारांशः

ৰামায়ণৰ বালকাণ্ডৰ সংক্ষিপ্ত বিৱৰণ ঃ

বৈদিক সাহিত্যসমূহৰ পিছতেই বাল্মীকিকৃত ৰামায়ণক লৌকিক সাহিত্যৰ প্ৰথমখন গ্ৰন্থ হিচাপে স্বীকাৰ কৰা হয়। এই গ্ৰন্থখনৰ নায়ক ৰামচন্দ্ৰ আৰু নায়িকা সীতাক সৰ্বশ্ৰেষ্ঠ মানৰ বুলি স্বীকাৰ কৰা হয়। এই গ্ৰন্থখন মানৱ সমাজৰ এখন অমূল্য সম্পদ, য'ত প্ৰাচীন ভাৰতৰ ইতিহাস, ধৰ্ম-সংস্কৃতি আৰ্থিক বৈভৱ, তৎকালীন সমাজৰ বিশ্বাস আদিৰ বিশদ বিৱৰণ পোৱা যায়। ৰামায়ণত সৰ্বমুঠ সাতটা কাণ্ড আছ। এই সম্পৰ্কে পূৰ্বৰ গোট (অধ্যায়-🗁)ত বিশদভাৱে বৰ্ণনা কৰা হৈছে। ইয়াৰে প্ৰথম কাণ্ডটোৰ নাম (বালকাণ্ড)। বালকাণ্ডৰ প্ৰথম সৰ্গত মুঠ এশটা শ্লোক আছে। এই কাণ্ডটো 'ত' আখৰেৰে আৰম্ভ কৰা হৈছে -

তপঃ স্বাধ্যায়নিৰতং তপস্বী ৱাগ্বিদাং ৱৰম।
নাৰদং পৰিপপ্রচ্ছ বাল্মীকির্মুনিপুঙ্গৱম ।।

এই 'ত' আখৰক ভাৰতীয় আধ্যাত্মিক সমাজত মাঙ্গল্যসূচক বুলি গণ্য কৰা হয় -

'তকারো বিঘ্নঃ নাশকঃ', 'বস্তু লাভ করোণস্তু তকারঃ সৌখ্যাদায়কঃ' ইতি।

বালকাণ্ডৰ প্ৰথম সৰ্গত ৰামচন্দৰ বীৰ্যকথা বৰ্ণিত হৈছে। মহামুনি বাল্মীকিয়ে এই জগতৰ শ্ৰেষ্ঠ মানৱজনৰ বিষয়ে জানিবৰ বাবে আগ্ৰহ প্ৰকাশ কৰি দেবৰ্ষি নাৰদক সেই মানৱজনৰ বিষয়ে জনাবৰ বাবে অনুৰোধ কৰে আৰু বাল্মীকিৰ সেই আগ্ৰহ ৰক্ষা কৰি নাৰদে তেওঁক ৰামচন্দ্ৰৰ বিষয়ে বৰ্ণনা কৰে। সংক্ষেপতে বালকাণ্ডৰ বিষয়বস্তু এনেধৰণৰ - তপস্যা আৰু অধ্যয়নত সদায় নিৰত হৈ থকা দেবৰ্ষি নাৰদ এদিনাখন বাল্মীকি মুনিৰ আশ্ৰমত উপস্থিত হোৱাত বাল্মীকিয়ে নাৰদমুনিক অত্যন্ত বিনম্ৰতাৰে প্ৰশ্ন কৰিলে যে, পৃথিবীত এনে কোনোবা মহান পুৰুষ আছে নেকি যিজন গুণবান, বীৰ্যবান, ধৰ্মং, কৃতং, সত্যবাদী, দৃঢ়প্ৰতিং, সৎ চৰিত্ৰবান, বিদ্বান, লোক-ব্যৱহাৰত পাৰ্গত; প্ৰজাৰঞ্জনকাৰী, দেখাত সুশ্ৰী, ক্ৰোধজয়ী, কান্তিযুক্ত, হিংসাৰহিত আৰু যুদ্ধত তেওৰ ক্ৰোধ দেখিলে দেৱতাসকলেও ভয় খায়? মহামুনি বাল্মীকিৰ এই প্ৰশ্নত দেৱৰ্ষি নাৰদ অতি সন্তুষ্ট হ'ল আৰু প্ৰসন্ন মনেৰে তেওঁক ক'বলৈ ধৰিলে- এই পৃথিৱীত ওপৰোক্ত সকলো গুণ একেজন ব্যক্তিতে পোৱাটো দুৰ্লভ। তথাপিও ঈক্ষাকু বংশত ৰাম নামেৰে প্ৰসিদ্ধ এজন ব্যক্তি জন্ম লাভ কৰিছে যি অতি সংযত, মহাবীৰ্যবান, সুন্দৰ কান্তিযুক্ত ধৈৰ্যবান আৰু জিতেন্দ্ৰিয়।

তদুপৰি তেওঁ বুদ্ধিমান, নীতি -পৰায়ণ, বাগ্মী, লক্ষ্মীযুক্ত, শত্রুবিজয়ী, বিশাল স্কন্ধযুক্ত, দীর্ঘবাহুযুক্ত আৰু উন্নত কণ্ঠযুক্ত। মহাপুৰুষৰ গুণেৰে সমৃদ্ধ এই ব্যক্তিজন সাহসী, মহাপ্রতাপী, তেজস্বী ধনুর্বিদ্যাত অত্যন্ত পাৰ্গত হোৱাৰ লগতে শত্রুদমনকাৰী, আজানুলম্বিত গম্ভীৰ কণ্ঠস্বৰযুক্ত তথা শ্যামবৰণীয়া তেওঁৰ শৰীৰৰ সৰ্বাঙ্গ সমান গঞ্জৰ। তেওঁ ধৰ্মৰ তত্বৰ জ্ঞাতা প্রতিজ্ঞা ৰক্ষাত দৃঢ়, প্রজাবৎসল যশস্বী, জ্ঞানী, পৰিত্র বিনীত আৰু যোগীৰ দৰে সমাধিপ্রাপ্ত ঐশ্বৰিকসমৃদ্ধ এই ব্যক্তিজন জগতৰ সৃষ্টিকর্তা ব্রহ্মাৰ সমতুল্য। তেওঁ ঋক, যজু, সাম আৰু অথর্ব এই চাৰিও বেদৰ তেওঁ ৰক্ষক, বেদাঙ্গসমূহৰ তত্বৰ জ্ঞাতা হোৱাৰ লগতে প্রখৰ স্মৃতিশক্তি সম্পন্ন, সকলো মানুহৰ প্রিয়, ক্ষত্রিয় গুণেৰে বিভূষিত। তেওঁৰ দর্শন মাত্রেই জনসাধাৰণ আনন্দিত হয় গতিকে নদীসমূহে সাগৰৰ আশ্রয় লোৱাৰ দৰে সজ্জনসকলে তেওঁৰো আশ্রয় গ্রহণ কৰে, তেওঁ সকলোৰে পূজ্য। তেওঁ তেওঁৰ মাতৃ কৌশল্যাৰ আনন্দবর্ধনকাৰী, গভীৰতাত তেওঁ সমুদ্রৰ দৰে আৰু ধৈর্য গুণত হিমালয়ৰ দৰে স্থিৰ। তেওঁ গুণত নাৰায়ণতুল্য, চন্দ্রৰ দৰে ধুনীয়া, ক্রোধত জলন্ত অগ্নিৰ দৰে আৰু ক্ষমা গুণত ধৰিত্রীৰ দৰে স্থিৰ, দান প্রদানৰ ক্ষেত্রত কুবেৰৰ দৰে, সত্যবচনত ধর্মৰাজৰ দৰে।

এনেধৰণৰ সকলো সদগুণৰ দ্বাৰা বিভূষিত ৰামচন্দ্রক যুৱৰাজ পদত অধিষ্ঠিত কৰিবৰ বাবে তেওঁৰ পিতৃ দশোৰথে মনস্থ কৰিলে। কিন্তু দশৰথৰ তিনিগৰাকী পত্নীৰ ভিতৰত অন্যতমা কৈকীয়ীয়ে দশৰথৰ পৰা পূর্বতে লাভ কৰি থোৱা 'বৰ'ৰ বিষয়ে স্মৰণ কৰাই দশৰথৰ পৰা সেই 'বৰ' আহ্বান কৰিলে। ইয়াৰে এটা বৰ হ'ল ৰামচন্দ্রক বনবাস আৰু দ্বিতীয় বৰ হ'ল— কৈকেয়ীপুত্র ভৰতক যুৱৰাজ পদত অভিষিক্ত কৰা। পূর্বপ্রতিজ্ঞা ৰক্ষা হেতু দশৰথে পুত্র ৰামচন্দ্রক নির্বাসন দিলে। তেতিয়া ৰামে পিতৃৰ প্রতিজ্ঞা ৰক্ষা আৰু মাতৃ কৈকেয়ীৰ আশা পুৰণার্থে বনবাস গ্রহণ কৰে। দশৰথৰ আন এগৰাকী পত্নী সুমিত্রাৰ পুত্র লক্ষ্মনো ৰামচন্দ্রৰ লগত বনলৈ গমন কৰে। ৰামচন্দ্রৰ পত্নী সীতাদেৱীয়েও ৰামচন্দ্রৰ লগত বনবাসী হয়। বনলৈ গৈ থকা যাত্রাপথত সমা তেওঁলোকে প্রথমে গঙ্গাৰ পাৰত অৱস্থিত শৃংগৱেৰপুৰম নামৰ ঠাইত নিষাদৰাজ গুহৰ ৰাজ্যত উপস্থিত হ'ল। ৰামে সেই ঠাইৰ পৰাই তেওঁৰ ৰথৰ সাৰথিক ওভোতাই পঠিয়াই। তাৰপাছত তেওঁলোকে নিষাদৰাজৰ সৈতে বহুকেইখন অৰণ্য অতিক্রম কৰি গভীৰ অৰণ্যত থকা ভৰদ্বাজ ঋষিৰ আশ্রমত উপস্থিত হ'ল। তাৰে পৰাই তেওঁলোকে গুহক ওভোতাই পঠিয়ালে আৰু ভৰদ্বাজ মুনিৰ আজ্ঞা লৈ চিত্রকূট নামৰ বনত প্রৱেশ কৰিলে আৰু তাতে এটি পর্ণকুটীৰ নির্মাণ কৰি সুখেৰে বাস কৰিবলৈ ধৰিলে। আনফালে, ৰামচন্দ্র বনবাসী হোৱাৰ দুখতে দশৰথে মৃত্যুবৰণ কৰিলে। তেতিয়া বশিষ্ঠকে আদি কৰি প্রধান ঋষিসকলে ভৰতক ৰজা পাতিবলৈ সিদ্ধান্ত ল'লে। কিন্তু ভৰতে ৰাজ্যভাৰ ল'বলৈ অসন্মত হ'ল আৰু ৰামচন্দ্রক প্রসন্ন কৰি বনৰ পৰা ঘুৰাই আনিবৰ বাবে চিত্রকূট নামৰ বনলৈ গ'ল। কিন্তু ৰামচন্দ্রই ভৰতৰ অনুৰোধ ৰক্ষা নকৰি নিজৰ পাদুকাযোৰকে ভৰতক দি ঘুৰাই পঠালে। পৰবর্তী সময়ত ৰামচন্দ্র সদয় হৈ নিজৰাজ্যলৈ প্রত্যাৱর্তন কৰিব বুলি ভাবি ভৰতে নন্দিগ্রাম নামৰ ঠাইৰ পৰাই ৰাজ্যশাসন কৰিবলৈ লয়। ভৰত উভতি যোৱাৰ পাচত চিত্রকুটলৈ পুনৰ ভৰতৰ প্রজাগন আহিব পাৰে বুলি শঙ্কা কৰি ৰামচন্দ্রই চিত্রকুট ত্যাগ কৰি

দণ্ডকাৰণ্য নামেৰে আন এখন অৰণ্যত প্ৰৱেশ কৰে ।

ইয়াৰ পাছত তেওঁলোকে সুতীক্ষ্ণ মুনি,অগত্য মুনি আৰু অগস্ত্যৰ ভাতৃক দৰ্শন কৰিলে। অগস্ত্যৰ বচনানুসাৰে ইন্দ্ৰধনু গ্ৰহণ কৰিলে। সেই ইন্দ্ৰধনু আছিল অক্ষয় শৰযুক্ত। সেই অৰণ্যত বাস কৰি থকাৰ সময়তে ঋষিসকলে তেওঁলোকক আশ্ৰমত উপদ্ৰৱ কৰা কৱন্ধ আদি বিভিন্ন ৰাক্ষসবিলাকক বধ কৰিবৰ বাবে ৰামচন্দ্ৰক অনুৰোধ জনালে। ৰামচন্দ্ৰয়ো ৰাক্ষস বিলাকক বধ কৰিবলৈ প্ৰতিজ্ঞাবদ্ধ হ'ল। সেই অৰণ্যৰে জন্মস্থান নামে ঠাইত বিভিন্ন ৰূপ ধাৰণ কৰিব পৰা সূৰ্পনখা নামেৰে এজনী ৰাক্ষসী অৱস্থান কৰাত তেওঁ সেই ৰাক্ষসীক শৰৰ দ্বাৰা মুখত আঘাত কৰি বিকৃত ৰূপ প্ৰদান কৰিলে।তেতিয়া সেই ৰাক্ষসীৰ প্ৰৰোচনাত খৰ, দূষণ, ত্ৰিশিৰাকে ধৰি বহুতো ৰাক্ষসে ৰামক বধ কৰিবৰ বাবে খেদি আহিল। ৰামে সেই সকলো ৰাক্ষসকে সহজেই হত্যা কৰিলে। ৰামচন্দ্ৰই সেই অৰণ্যত থকা প্ৰায় চৈধ্যহাজাৰ ৰাক্ষসক বধ কৰিলে। নিজৰ স্বজাতিক ৰামে বধ কৰাৰ বাৰ্তা ৰাক্ষস ৰাৱণে শুনাৰ পাছত তেওঁ অত্যন্ত ক্ৰোধিত হয় আৰু ৰামক হত্যা কৰিবৰ বাবে মাৰীচ নামৰ এটা মায়াবী ৰাক্ষসৰ সহায় বিচাৰে। মাৰীচে ৰাৱণক ৰামৰ সৈতে যুদ্ধত প্ৰবৃত্ত নহবৰ বাবে অনুৰোধ জনালে যদিও মৃত্যুমুখলৈ আগবাঢ়ি যোৱা মানুহৰ ঔষধৰ প্ৰতি অনিহা হোৱাৰ দৰে ৰাৱণে মাৰীচৰ কথা অগ্ৰাহ্য কৰিলে। ৰাৱণ মাৰীচৰ সৈতে ৰামৰ আশ্ৰমত উপস্থিত হ'ল আৰু মাৰীচে মায়াৰে ৰাম-লক্ষ্মণক কুটীৰৰ পৰা দূৰলৈ লৈ গ'ল। তেতিয়া ৰাৱণে সীতাদেৱীক কুটীৰৰ পৰা হৰণ কৰে। ওচৰতে বাস কৰা জটায়ু নামেৰে এটা পক্ষীয়ে সীতাক অপহৰণ কৰা কাৰ্যত ৰাৱণক বাধা দিছিল যদিও ৰাৱণৰ চোকা অস্ত্ৰৰ আঘাতত জটায়ু মৃতপ্ৰায় হয়। ৰামচন্দ্ৰ কুটীৰলৈ উভতি আহি জতায়ুৰ মুখেৰে সীতাহৰণৰ বিষয়ে অৱগত হয় আৰু শোকত ভাগি পৰে। আনহাতে ৰামক সীতা হৰণৰ বাৰ্তা দিয়েই জটায়ুৰ মৃত্যু হয়। শোকাভিভূত অৱস্থাৰে ৰামচন্দ্ৰই জটায়ুৰ অগ্নিসংস্কাৰ কৰি বনত সীতাক অন্বেষণ কৰি থকা অৱস্থাতে কৱন্ধ নামৰ এটা বিশালাকৃতিৰ ৰাক্ষসৰ সন্মুখীন হয়। ৰামে কৱন্ধক হত্যা কৰি দহনকাৰ্য সমাপ্ত কৰে। কৱন্ধ আছিল অভিশাপগ্ৰস্থ এক গন্ধৰ্ব। ৰামৰ হাতত মৃত্যু হোৱাৰ লগে-লগেই তেওঁ পুণৰ গন্ধৰ্বৰূপ ঘূৰাই পায় আৰু স্বৰ্গ প্ৰাপ্ত হয়। সেই কৱন্ধই মৃত্যুৰ আগে আগে শৱৰী নামৰ এগৰাকী ধৰ্মচাৰনীৰ ওচৰলৈ যাবলৈ পৰামৰ্শ দিয়ে। কৱন্ধৰ উপদেশ অনুসাৰে ৰামচন্দ্ৰই শৱৰীৰ ওচৰলৈ যায় আৰু শৱৰীয়ে ৰামচন্দ্ৰক বিধিবৎ আদৰ অভ্যৰ্থনা জনোৱাৰ পাছত পম্পাতীৰত থকা হনুমান নামৰ বান্দৰ সৈতে মিলিত হয়। হনুমানৰ কথামতেই ৰামচন্দ্ৰ সুগ্ৰীবৰ সৈতে বন্ধুত্ব স্থাপন কৰে আৰু সুগ্ৰীৱৰ ওচৰত নিজৰ সকলো কথা ব্যক্ত কৰে আৰু সুগ্ৰীৱেও নিজৰ বিষয়ে সমস্ত ৰামচন্দ্ৰৰ আগত ব্যক্ত কৰে। সুগ্ৰীৱে ৰামক সকলো বৃত্তান্ত জনোৱাৰ পাছত ৰামে সুগ্ৰীৱৰ শত্ৰু তথা ভাতৃ বালীক বধ কৰে। বালীৰ মৃত্যুৰ পাছত সুগ্ৰীৱ সেই ৰজ্যৰ ৰজা হ'ল আৰু ৰজা হৈয়েই সুগ্ৰীৱে বান্দৰসকলক সমৱেত কৰাই সীতাক অন্বেষণ কৰিবৰ বাবে আদেশ দিলে। চাৰিওফালে বান্দৰসেনাই সীতাক বিচাৰিবলৈ ধৰিল। মহাবলবান হনুমানে সম্পাতি নামেৰে এটা পক্ষীৰ কথামতে শতযোজন বহল লৱণ সাগৰ জপিয়াই পাৰ হ'ল। সেই সাগৰ পাৰ হৈ ৰাৱণৰ দ্বাৰা ৰক্ষিত লংকা নগৰীত তেওঁ উপস্থিত হ'ল আৰু তাত অৱস্থিত অশোক নামৰ উদ্যানত

সীতাক দেখা পালে। সীতাক হনুমানে নিজৰ পৰিচয়ৰ চিনস্বৰূপে ৰামচন্দ্ৰৰ হাতৰ আঙুলিৰ এটা আঙুঠি দৰ্শন কৰোৱালে আৰু ৰামচন্দ্ৰই সীতাক উদ্ধাৰ কৰিবৰ বাবে কৰা সকলো ব্যৱস্থাৰ বিষয়ে জ্ঞাত কৰাই লঙ্কাৰ বৰ্হিদ্বাৰ ভাঙি দিলে। তাৰ পাছত হনুমানে ৰাৱণৰ পুত্ৰ অক্ষয় কুমাৰৰ সহিতে পাঁচজন সেনাপতি আৰু সাতজন মন্ত্রীপুত্রক হত্যা কৰি স্ব-ইচ্ছাৰে ৰাৱণৰ বন্ধন গ্রহণ কৰিলে। তাৰ পাছত সেই বন্ধনৰ পৰা মুক্ত হৈ সীতা বাস কৰি থকা অশোক বনক বাদ দি সমস্ত লঙ্কাপুৰী দগ্ধ কৰি সীতাৰ বার্তা জনাবৰ বাবে ৰামচন্দ্ৰৰ ওচৰলৈ উভতি যায়। হনুমানে ৰামচন্দ্ৰক সীতাৰ বার্তা দিয়াৰ পাছত ৰামচন্দ্ৰই বান্দৰ সেনাসকলৰ সহায়ত সাগৰত সেতু নির্মাণ কৰি লঙ্কাত প্রবেশ কৰে। ৰাৱণৰ লগত হোৱা যুদ্ধত ৰাৱণক হত্যা কৰি সীতাক উদ্ধাৰ কৰে। তাৰ পাছত সীতা সহিতে সুগ্রীৱ, হনুমান আদিক লগত লৈ পুষ্পক নামৰ আকাশী যানেৰে অযোধ্যা অভিমুখে গমন কৰে। অযোধ্যালৈ যোৱাৰ পথত ৰামচন্দ্ৰ ভৰদ্বাজ ঋষিৰ আশ্রমত প্রৱেশ কৰি তেওঁক প্রণাম জনাই ভৰতে বাস কৰা নন্দিগ্রামত উপস্থিত হয়। তাতেই তেওঁলোকে জঁটা ত্যাগ কৰি সকলো ভাতৃ মিলিত হৈ তেওঁ ৰাজ্যভাৰ গ্রহণ কৰে। ইয়াৰ পাছত ৰামৰাজ্যত প্রজাসকলে সুখে-সন্তোষে বাস কৰাৰ কথা উল্লেখ কৰা হৈছে আৰু ব্রাহ্মণাদি চাৰিও বর্ণই সুচাৰুৰূপে নিজৰ কার্য সমাপন কৰিব পাৰিছিল বুলি বর্ণনাৰে বালকাণ্ডৰ প্রথম সর্গ সমাপ্ত কৰা হৈছে ।



२.६ अध्यायात् किमवगतम्

अध्यायात् वयं निम्नोक्तविषयाः ज्ञातवन्तः –

- महर्षिवाल्मीकिप्रणीतं रामायणस्य बालकाण्डस्य श्लोकानां सरलार्थः ज्ञातवन्तः। बालकाण्डस्य संक्षिप्तं परिचयं ज्ञातवन्तः।
- बालकाण्डस्य मूलपाठ्यांशोऽपि अस्मिन् अध्याये ज्ञातवन्तः।



२.७ ज्ञानाधिक्यम्

१) Vasishth, pt. Shivram sharma (edi), srimadvalmikiramayana of maharsi valmiki, chaukhamba vidyabhawan varanasi.

२) Saikia Bora, Dr. Indira, श्रीमद्वाल्मीकीयरामायणम, बालकाण्डम्, प्रथमः सर्गः, Bani prakash mandir, panbazar, Guwahati.

३) Goldman, P. Robert, The Ramayana of Valmiki (An Epic of ancient India, vol-v), Balakanda, MLBD, Delhi, vst edition -1991 .

४) Misra, Paramahansa and pandaya kapildev (Trans.) Ramayanam,

MLBD, Delhi -1991.

५) Krishnacharya, T.R., Vyasacharya, T.R(edi.) Ramayana (with commentary), Bombay and kumbhakonam, 1911-13.

६) Sastri Gaurinath, Sanskrit sahityera itihasa, saraswata library, 206, Vidya sarani, calcutta, vst edition, 1976.



२.८ अग्रगत्याः निरूपणम्

प्रश्नः १: बालकाण्डे कति संख्यकाः श्लोकाः सन्ति ?

प्रश्नः २: भरतः रामप्रत्यागमनकाङ्क्षया कुतः राज्यशासनमकरोत् ?

प्रश्नः ३: विराधनाम्नं राक्षसं रामचन्द्रः कुत्र जघान ?

प्रश्नः ४: शरभङ्गसुतीक्ष्ण-अगस्त्यानां निवासस्थानं कुत्र आसीत् ?

प्रश्नः ५: रामायणस्य बालकाण्डस्य संक्षिप्तं परिचयं देय।

प्रश्नः ६: बालकाण्डानुसारं रामचरितं उपस्थाप्यताम्।

प्रश्नः ७: लङ्कापुर्य्याम् उपस्थितं भूत्वा हनुमानकृत कार्यावली वर्ण्यताम्।

प्रश्नः ८: रामायणस्य बालकाण्डस्य सारांशः लिख्यताम्।

प्रश्नः ९: नारदमतानुसारेण रामस्य शासनकाल कथं आसीत् एकम् आभासं प्रस्तुयताम्।

*** ***** ***

अध्यायः ३ : महाभारतम् (शान्तिपर्वणि, एकनवतिः शततमः अध्याय, सामान्याध्ययनम्)

अध्यायस्य संरचना

१.१ उद्देश्यम्

१.२ परिचयः

३.३ महाभारतस्य प्रणेता, उत्पत्ति क्रमविकासञ्च

३.४ महाभारतस्य प्रतिपाद्यम्

३.५ महाभारतस्थ उपजीव्यत्वम

३.६ महाभारतस्य उपाख्यानानि

३.७ महाभारतकालीन समाजः

३.८ महत्वाद् भारत्त्वाच्च महाभारतमुच्यते

३.९ महाभारतस्य टीका / भाष्य

३.१० महाभारतस्य रचनाकालः

३.११ शान्तिपर्वस्य कथावस्तु

३.१२ मोक्षधर्मपर्व

३.१३ अध्यायस्य असमीया भाषायां सारांशः

३.१४ अध्यायात् किमवगतम्

३.१५ ज्ञानाधिक्यम्

३.१६ अभ्यासप्रश्नाः

३.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् –

- अनेन अध्यायेन महाभारतस्य प्रणेता, उत्पत्तिं क्रमविकाशस्य विषये ज्ञातुं शक्यते।
- अनेन अध्यायेन महाभारतस्य कथावस्तुविषये ज्ञातुं शक्यते।
- परवर्तीकालीन संस्कृतसाहित्ये महाभारतस्य प्रभावविषये अनेन अध्यायेन अवबोधनं भवति।
- महाभारते सन्निविष्टानां विभिन्नानाम् उपाख्यानां विषये अनेन अध्यायेन ज्ञातुं शक्यते।
- अनेन अध्यायेन महाभारतकालीनः समाजस्य विषये अवबोधनं भवति।
- अनेन अध्यायेन महाभारतस्य महत्त्वस्य विषये अवबोधनं भवति।
- अनेन अध्यायेन महाभारतस्य रचनाकालस्य विषये ज्ञातुं शक्यते।
- महाभारतस्य शान्तिपर्वस्य विषये अनेन अध्यायेन ज्ञातुं शक्यते।

३.२ परिचयः

पूर्वस्मिन् अध्याये भवान् 'रामायणम् (बालकाण्डः, प्रथमः परिच्छेदः, पाठ्याध्ययनम्)' इति विषयस्य अध्ययनं कृतवान्। इदानीं अस्मिन् अध्याये भवान् महाभारतस्य प्रणेता, उत्पत्तिं, क्रमविकाशस्य विषये, महाभारतस्य शान्तिपर्वस्य विषये अपि ज्ञातुं शक्यते।

३.३ महाभारतस्य प्रणेता, उत्पत्ति क्रमविकाशञ्च

अथ महाभारतं हि एकः प्रसिद्धः प्राचीन भारतीय ग्रन्थः। वेदशास्ते यद्वत् मानवजीवनस्य इहलौकिकं पारलौकिकं च भूतभविष्यमानानां कार्याणां वर्णनमपि च तद्धेतुं प्रकाश्यते तद्वदेव हि महाभारतेऽपि इहलौकिक पारलौकिक घटनाक्रमाणि अपि सुविहिततया वर्ण्यते। अतः ग्रन्थोऽयं 'पञ्चमवेदः' इत्यपि कथ्यते। अस्य ग्रन्थस्य प्रणेता श्रीवेदव्यासः आसीत्। माता चास्य सत्यवती पराशरजातत्वात् पाराशर्यः। यमुनायाः कश्मिंश्चित् द्वीपे अस्य जन्मजातमतः एव द्वैपायनः, अथवा द्वीपे समुत्पन्नत्त्वात् द्वैपायन इति च कथ्यते। कृष्णवर्णनात् कृष्णद्वैपायनः, यज्ञोपयोगि भागानां भाजकत्वात् वेदव्यासश्चोच्यते। इममद्भुतं विशालकायं महाकाव्यमिदं बृहदाख्यानयुक्तं महर्षिणा व्यासेन त्रिभिसंवत्परैः विरचितमिति अस्मादेव महाकाव्याद् स्पष्टोभवति –

'त्रिभिवर्षैः सदोत्थाय कृष्णद्वैपायनो मुनिः।
महाभारतमाख्यानं कृतवानिदमद्भुतम्॥

शांखायनश्रौतसूते कुरुक्षेत्रसंघटितसैकस्य युद्धस्य वर्णनं प्राप्यते यत्र कौरवकुलं विध्वंसितं वर्णितम्। प्राचीन राजवंशानां वीरपुरुषाणां कीर्तयस्तथा प्रधान घटनायाः विस्तारः नूनं कुशोलवैः संकीर्तिता आसीत्। येषामुल्लेखमात्रं शमात्रं वा (रामायण – महाभारत) महाकाव्यद्वये संरक्षितं दृश्यते। युद्धविजय काव्यस्य आवृत्तिकारास्तु सूताः एवासन ये खलु राजगृहे स्थित्वा उत्पवे च युद्धयात्रायां च तेषां गानमकुर्वन्। चारणकविभिरपि (कुशोलवैरपि) वीणावादन संयोगेन तेषां गीतानां गानं प्रकाश्यं नीतम्।

ब्राह्मणग्रन्थेषु दुष्यन्तशकुन्तलयोः पुत्रं भरत भरतवंशस्य पूर्वपुरुषरूपेण मन्यते। तस्मिन् कुलोत्पन्ने कुरुराजः प्रख्यात आसीत्। अतः स वंशः कौरव इत्याख्यायते। तेषां राष्ट्रमपि तन्नाम्नाभिधीयते इति यजुर्वेदे ब्राह्मणग्रन्थे च प्राप्यते। पारिवारिक संघातवशात् भरतानां कुलं विनष्टम्। रक्तक्षयो संघातोऽयं हि इतिहासः। तेनैवाधिकृत्य रचितमासीत् वीरकाव्यम्। तत् काव्यमेव महाभारतस्य बीजम्। कालान्तरे तत्र अनेकानि काव्यानि संयोजितानि। तत्रैव पूर्व नृपतीनां वीरत्वव्यञ्जकाख्यानानि काव्यरूपेण पश्चात् प्रक्षिप्तानि नाराशंसीरूपेण कविभिर्गीतानि काव्यानि उपाख्यानरूपं दधते महाकवेः।

यदा महाभारतस्य चारणकवीनां गीतानि प्रभूतं समादृतानि लोकप्रियानि चासन् तदा ब्राह्मणैः महाकाव्यस्य क्रमविकाशो कृतः। तेन प्रकारेण महाकाव्यमिदं धर्मशास्त्ररूपं नीतम्। एवं च देवोपाख्यानानि, ब्राह्मण्यतत्वपूर्णोपदेशाः मानवनीतिः, धर्मनीतिः, राजनीति च इति विभिन्नाः

विषयाः कालक्रमाद् महाभारते सम्बन्धाः। तथा च पण्डिताः तेषां मतादर्शं प्रचारयितुं माध्यमरुपेण जनप्रियं महाकाव्यमिदं समाद्रियते स्म। इत्यवसरे तैः तेषां पूर्वपुरुषाणां महाशक्तिधराणामृषीणां कथाऽपि तत्र सक्ताः।

अपि च यस्मिन् प्रदेशे विष्णुरेव सर्वोच्च देवरूपेण पुज्यते तस्मिन्नेव महाकाव्यमिदं प्रधानतया विकसितम्। शिवाख्यानानि तु पश्चात् संयुक्तान्येव।

साम्प्रदायिकास्तु महाभारतस्य विकसमित्थं मन्यते यथा-

मन्वादिभारतं केचिदस्तिकादि तथापरे।

तथापरिचारादन्ये विप्राः सम्यगधीयते॥

केचिद्विद्वांसः महाभारतस्य प्रारम्भं मनोरूपा—ख्यानात् केचिदस्तिकोपाखानात् केचिच्चपरिचरोपाख्यानाद् मन्यते।

महाभारतस्य विकासे त्रीणिकर्माणि दृश्यते - जयभारतमहाभारतानि। व्यासदेवः तस्य प्रधानशिष्यं वैशम्पायनं जयाख्यकाव्यं अध्यापयामासः। कथ्यते हि जयकाव्ये ८८०० श्लोकाः आसन्। अप्रक्षिप्तं खलु महाकाव्यमिदं परिचरोपाख्यानादारं स्यात्।

हितीय काले परिवर्धितरुपेण भारताख्य ग्रन्थ तथा काव्यमिदं वैशम्पायनः सर्प यज्ञावसरे जन्मेजयं श्रावयामासः। तदा तस्मिन् चतुर्विंशतिसहस्त्रानि श्लोकाः आसन्। आस्तिकोपाख्यानादेव तत् प्रारब्धमासीत्।

तृतीय काले च सौतिः द्वादशवर्षीययज्ञे प्रवृत्तमानं शौनकं प्रश्नोत्तररूपे श्रावयामासः। इदानीन्तनस्य श्लोकशतसहस्त्ररूपस्य महाभारतस्य स्वरूपमस्मिन्नेव काले सम्पूर्णं स्यात्।

यदुक्तम्-

अस्मिंस्तु मानुषे लोके वैशम्पायन उक्तवान्।

एकं शतसहस्त्रं तु मयोक्तं वै निबोधत॥ इति।

काव्यमिदं मनुशब्देन प्रारभ्यते। अथास्य महाभारतम् इति नामधेयं सौतिकृतम् इत्यपि सम्भवति।

३.४ महाभारतस्य प्रतिपाद्यम्

कौरवपाण्डवयोः युद्धकथा अवलम्ब्यं व्यासदेवः महाभारतं रचितवान्। हस्तिनापुरस्य नृपति विचित्रवीर्यस्य धृतराष्ट्रः पाण्डुः च द्वौ पुत्रौ आसीत्। यद्यपि धृतराष्टऽग्रजन्मा आसीत् तथापि जन्मान्धत्वात् पाण्डुरेव राजसिंहासनेऽभिषिक्तः। कालान्तरेण पाण्डुः पञ्चत्वं गतः। धृतराष्ट्रस्य शतपुत्रेषु दुर्योधन एव जेष्ठ आसीत्। पाण्डोश्च युधिष्ठिर-भीम - अर्जुन - नकुल - सहदेवेति पञ्च पुत्रा, आसन्। कालक्रमेण यदा ते सर्वे: यौवनत्वामाप्तम् तदा दुर्योधनः छलेन तेषां राज्यमपहर्तुमैच्छत्। कृतासङ्ख्य -प्रयत्नोऽपि यदा सः सफलतां न लेभे तदा स्वमातुलशकुनिसाहाय्येन द्युत क्रीडायां पाण्डवान् पराजित्य द्रौपदीञ्च स्वानुजेन दुःशासनेन सभायामानीय अपमानं कर्तुं प्रयेते। दैवात् सफलो न जातः। पराजिताः पाण्डवाः द्वादशवर्षपर्यन्तं वनवासे वर्षैकञ्च यावताज्ञातवासे कठिनां

यातनामसहन्। ततोऽरण्यात् परावृत्य स्वकीयं राज्यमयाचयन्।

दौत्यार्थ प्रेषितेन पाण्डवप्रतिनिधित्वासेन श्रीकृष्णेनाप्यतिप्रयत्नं कृतम्। परञ्च स्वार्थपरायणः दुर्योधनस्तु 'सूच्यात्रं नैव दास्यामि विना युद्धेन केशव' इति निश्चयादल्पमात्रमपि न विचलितः। तदा पाण्डवाः अपि योद्धुं सन्नद्धाऽभवन्। ततः पाण्डवानां कौरवाणां मध्ये कुरुक्षेत्रेऽष्टादशदिवसपर्यन्तं तुमुलं युद्ध सञ्जातः। निजदलबलेन सह दुर्योधनः पराजितः जातः विजयोऽभवन् पाण्डवाः तेषु श्रेष्ठः युधिष्ठिरः राजसिंहासनमारोढत्। कालान्तरं द्रौपद्या सह पाण्डवाः अपि एतेन महायुद्धेन सन्तप्तहृदयाः सन्तः उद्विग्न—मानसाश्च अभिमन्युपुत्रं परीक्षितं हस्तिनापुरस्य राज्ये प्रतिस्थाप्य हिमालयमगच्छन्। कालक्रमेण तत्रैव कालकवलतां गतः।

महाभारतमष्टादशसु पर्वसु विभक्तं वर्तते। तद् यथा-

(१) आदिपर्व
(२) सभापर्व,
(३) वनपर्व
(४) विराट् पर्व
(५) उद्योगपर्व
(६) भीष्मपर्व
(७) द्रोणपर्व
(८) कर्णपर्व
(९) शल्यपर्व
(१०) सौप्तिक पर्व
(११) स्त्रीपर्व
(१२) शान्ति पर्व
(१३) अनुशासन पर्व
(१४) आश्वमेधिकपर्व
(१५) आश्रमवासिकपर्व
(१६) मौसल पर्व
(१७) महाप्रस्थानिकपर्व
(१८) स्वर्गारोहण पर्व

अथ अष्टादशपर्वव्यतिरिक्तं हरिवंश नाम्ना परिशिष्टभूतमिव यद् एकोनविंशं पर्व रामायणमुत्तरकाण्डमिव महाभारतमन्वीयते तत् 'खिलपर्व' इत्युच्यते। तत्र प्रधानकथोपन्यासेन सहानेकानि आख्यानोपाख्यानानि एकलितानि। तानि यथा- १. रामोपाख्यानम्, २. नलोपाख्यानम् ३. सुप्रसिद्धम् भारतीयादर्शपत्नीस्वरूपनिरूपकं सावित्रीसत्यवदुपारख्यानम्, ४. शकुन्तलोपाख्यानम्, ५. गङ्गावतरणोपाख्यानम्, ६. मत्स्योपाख्यानम्, ७. उशीनरशिवि-वृषदर्भ-प्रभृति-नृपोपाख्यानानि च। भीष्मपर्वणः अन्तर्भूतं श्रीमद्भगवदगीताप्रकरणमतीव महत्त्वपूर्णं रमणीयं विश्वप्रसिद्धं च वर्तते।।

प्रकरणमिदमष्टादशाध्यायैरुपनिबद्धम्। विश्वसाहित्यस्य न कोऽपि ग्रन्थस्तादृशी प्रशस्तिं प्रतिष्ठां च लेभे यादृशी महाभारते उपनिबद्धा गीतेति।

महाभारतस्य 'आदि' पर्वणि तावद् धार्तराष्ट्राणां पाण्डवानां च बाल्यं, द्रौपदीविवाहः, यादववीरशौरिणां पाण्डवानां संस्तवः वर्णितमस्ति।

सभापर्वणि इन्द्रप्रस्थे पाण्डवानामृद्धिः, द्युते च द्रौपदीसहितस्य पाण्डवानां सर्वस्वाणां युधिष्ठिरेण हरणं, उपरिस्थितैकवर्षाज्ञातवासाय द्वादशवर्षवनवासाय पाण्डवानां विवसनम् वर्ण्यते।

वनपर्वणि काम्यकारण्ये पाण्डवानां द्वादशवर्षवनवासचर्याः वर्णितमस्ति।

विराट्पर्वणि मत्स्यपतेर्विराटः भृत्यत्वेन गुप्तात्मनां पाण्डवानामज्ञातवासस्य त्रयोदशवर्षस्यातिवाहनं वर्ण्यते।

उद्योगपर्वणि धार्तराष्ट्रेषु पाण्डवानां न्याय्यं दायभागं प्रदातुमप्रस्तुतेषु पाण्डवानां रणोद्योगो वर्णितः। ततो भाविषु पञ्चपर्वसु वासुदेव पाण्डव-वर्ग सर्वक्षयकारणं भीषणं रणं विस्तरेण वर्णितम्। स्त्रीपर्वणि मृतदाहंसंस्कारं कीर्तयित्वा शान्तिपर्वणि अनुशासन पर्वणि च युधिष्ठिरं प्रति भीष्मस्य राजधर्मोपदेशः निबद्धः। अश्वमेधिकपर्वणि युधिष्ठिरस्य राज्याभिषेकोऽश्वमेधो नाम यागश्च, आश्रमवासपर्वणि गान्धारिधृतराष्ट्रयोः तपोवनगमनम्, मौशलपर्वणि यादवानामनोन्यविनाशनः कलहः कृष्णस्य च सहसा व्याधकृतो वधः, महाप्रस्थानिकपर्वणि अर्जुनपौत्रं परीक्षितं प्रजापालनकर्मणि नियुज्य निर्विष्णपाण्डवानां मेरुं प्रति प्रस्थानम्, स्वर्गारोहणपर्वणि च पाण्डवानां स्वर्गारोहणमुदीर्यते इति शम्॥

३.५ महाभारतस्य उपजीव्यत्वम्

संस्कृतसाहित्ये महाभारतस्य अवदानं नितान्तं प्रसिद्धम्। महाभारतस्य प्रभावः पूर्ववर्तीकालिन संस्कृतसाहित्ये तथा भारतीय विभिन्नभाषाणां साहित्येऽपि दृश्यते।

महाभारतमधिकृत्य विरचितेषु ग्रन्थेषु प्रथमतः भासकाव्यानां नामोल्लेखः कर्तव्यः। कविभासेन बहुनि रूपकाणि विरचितवान्। तेषु कानिचन महाभारतश्रितानि नाटकानि यथा- दूतवाक्यम्, उत्तम दूतघटोत्कचम्, कर्णभारम्, ऊरुभङ्गम्, बालचरितम्, पञ्चरात्रम्, मध्यमव्यायोगश्च। दूतवाक्ये दूतभूतस्य श्रीकृष्णस्य सदाशयतया सदैव दुर्योधनस्याधिमानित्वं वर्णितम्। मध्यम व्यायोगे भीमेण घटोत्कचाद् ब्राह्मणपुत्ररक्षणं भीमस्य हिडिम्बया सह पुनर्मिलनञ्च वर्णितमस्ति। कर्णभारम् इति नाम्ना रूपके कर्णस्य ब्राह्मणरूपधारिणे शक्राय कवचकुण्डलूदानेन सह सम्बद्धा कथा वर्णिताऽस्ति। उरुभङ्गम् इति नाम्ना रूपके दुर्योधनस्योरुभङ्गपर्यन्ता कथोपवर्णिताऽस्ति। सम्भवतः इदमेव हि संस्कृतसाहित्ये प्रथमं दुःखान्तनाटकम्। बालचरितं हि मूलतः भागवताश्रितं नाटकम्। इदमेव कंसवधसंज्ञयाऽपि व्यपदिश्यते। अत्र हि कृष्णस्य जन्मतः आरभ्य कंसवधपर्यन्ता कथोपवर्णिताऽस्ति। पञ्चरात्रम् हि त्रयोऽङ्कात्मकम्। अत्ल हि यज्ञावसाने द्रोणो दक्षिणारूपेण पाण्डवेभ्योऽर्द्धराज्यप्रदानं वृणुते। दुर्योधनोऽपि यजमानः पञ्चरात्राभ्यन्तरे पाण्डवागमने तथाकरणाय प्रतिजानीते। द्रोणस्य प्रयासेन पाण्डवास्तत्रोपतिष्ठति यथाप्रतिश्रुतं हि राज्यार्ध्यं दुर्योधनस्तेभ्यः

प्रयच्छति। कथैषा महाभारतकथया सह विवदते। मध्यमव्यायोगे भीमेन घटोत्कचाद् ब्राह्मणपुत्ररक्षणं भीमस्य हिडिम्बया सह पुनमिलनञ्च वर्णितमस्ति।

महाकवि कालिदासस्य संस्कृत साहित्यस्य सर्वोत्तमं कोर्ति 'अभिज्ञानशाकुन्तलम्' इति नाटकम्। महाभारतस्य आदिपर्वणि वर्णितं शकुन्तलापाख्यानम् अवलम्बनं कृत्वा कालिदासः अभिज्ञानशाकुन्तलम् नामनाटकम् रचितवान्। तेन महाभारतीयं एतां कथां किञ्चित् लघुकृत्वा तस्य काव्यस्य कथावस्तु निर्मितम्। लौकिके संस्कृतसाहित्ये शकुन्तलानाटकस्य जनप्रियत्वं सवैः ज्ञातमेव।

भट्टनारायणस्य 'वेणीसंहारम् नाटकं महाभारतीयं कथाम् आश्रित्य विरचितम्। दुःशासनापमानसन्तप्तां द्रौपदीं घोरां प्रतिज्ञामकरोत् यद्' अहं दुःशासने निहत एव कैश्यसंयमनं करिष्यामि। अस्याः एव घटनायाः पूतौ महाभारतस्य या कथा साऽत्र वर्णिता।

कविः राजशेखरोऽपि 'बालभारतम् नाम नाटकं महाभारतमाख्यानमाश्रित्य रचितम्।

शिवार्जुनयुद्धमवलम्ब निर्मित्तं भारवेरेकमेव किरातार्जुनीयोभिधानं काव्यं प्राप्यते। अष्टविंशतिसर्गात्मके अस्मिन् काव्ये पाण्डवानां वनवासीनां विषये वर्णना अस्ति। 'शिवाऽर्जुनस्य युद्ध अपि च अर्जुनस्य पाशुपातनाम्ना अस्त्रलाभविषये अत्र सम्यक् वर्णना अस्ति।

माघस्य 'शिशुपालबधे' द्वाविंशतिसर्गाः सन्ति।। अत्र युधिष्ठिरस्य राजसूययागे श्रीकृष्णस्य कृतः शिशुपालस्य वधो मुख्यतया वर्णितोऽस्ति। महाभारतोक्तां निष्प्राणमिमां कथां माघेन वर्णनमाहात्म्येन चमत्कारिणीं विहितवान्।

नैषधकाव्यस्य गुरुत्वमपि महाकाव्येषु गण्यते। विद्वत् जनानां औषधीयरुपस्य नैषधचरितस्य प्रणेता आसीत् श्रीहर्षः। अस्य काव्यस्य कथावस्तुऽपि महाभारतमहाकाव्याद् गृहीतं भवति। अस्मिन् ग्रन्थे द्वाविंशतिसर्गाः सन्ति। निषाददेशस्य नृपतिः नल तथा विदर्भः देशस्य नृपतिः भीमस्य कन्या दमयन्याः प्रणयगाथा एव नैषधकाव्यस्य प्रतिपाद्यम्।

महाभारतस्य सारांश गृहीत्वा कवि क्षेमेन्द्रेण 'महाभारतमञ्जरी' नाम्ना एकं काव्यं रचितवान्।

पाणिनेः जाम्बवतोविजयमिति काव्यस्य कथावस्तु महाभारतात्, गृहीतमासीत्। अन्यच्च काव्यं 'वासुदेव विजयम्' कविः वासुदेवः। तत्र कंशवधवृत्तान्तं काव्यस्य उपजीव्यं भवति, यत्तु महाभारताश्रितम्। अस्य कवेः 'नलोदय' काव्यमिति नाम्ना अन्यत् काव्यं अपि वर्तते। तस्य च कथावस्तुः महाभारतात् एव गृहीतमासीत्। कवि नीतिवर्मणः 'कीचकवधकाव्यमिति' नाम्ना प्रख्यात काव्यं वर्तते। कविः धनञ्जयस्य 'राघवपाण्डवोयम्' नाम काव्यमपि महाभारतमाश्रित्य विरचितम् आसीत्।

३.६ महाभारतस्य उपाख्यानानि

महाभारतम् एकं निर्दिष्टसमये न विरचितम्। भिन्नेषु समयेषु विभिन्नानि आख्यानानि उपाख्यानानि च मूलमहाभारते (जयकाव्ये) संयोजनं करणात् इदं बृहदाकारम् अभवत्। एतेषां संयोजकाः सूत्रधाराः सुताः तथा ब्राह्मणाः आसन्।

आदौ सूताः परम्परागतरूपेण एतानि वीरगाथानि, वंशानुचरितानि च मूलमहाभारते

(जयकाव्ये) संयोजिताः। अपरं च ब्राह्मणाः मूलकथाभागे वीरगाथानि समेत्य तेषां स्वकीया ऐतिह्यपूर्णा बहुनि कथानि, रूपकानि च कल्पकथानि संयोजिताः।

नीतिमूलकानि तथा शिक्षाप्रदायिनी आख्यानानि महाभारते वर्तन्ते। उपाख्यानानाम् अधिकांश एव आदिपर्वणि, वनपर्वणि अपि च शान्तिपर्वणि सन्ति। यथा- आस्तिकोपाख्यानम्, शकुन्तलो पाख्यानम्, ययाति-तपती-वशिष्ठ- औव्यः- सुन्द-उपसुन्दनाम् उपाख्यानानि इत्यादयः आदिपर्वणि सन्ति। नलोपाख्यानम्, अगस्त्य-ऋष्यशृङ्ग- सुकण्या-अष्टावक्र-यवक्रीत- सौगन्धिकाहरणं,मत्स्य-राम-सावित्री आदीनां उपाख्यानानि वनपर्वणि उल्लेखं सन्ति। इन्द्रविजयगलवचरित्र-अम्बादि-उपाख्यानानि उद्योगपर्वणि उल्लेखं सन्ति। त्रिपुरवधं उपाख्यानं कर्णपर्वणि अपि च हयग्रीववध, षोडशराजकीय, जामदग्न्य मुचुकुन्द कृतघ्नगौतम कुंन्दधारादि उपाख्यानानि शान्तिपर्वणि उल्लेखं सन्ति। सुदर्शन-विश्वामित्र- उपमन्यु-विपुल-वीरहव्य- च्यवन-नाचिकेता-कार्तिकेय-दुर्वासाणाम् उपाख्यानानि अनुशासनपर्वणि उल्लेखं सन्ति। अन्योन्या पर्वणि अपि बहुनि उपाख्यानानि सन्ति।

शाकुन्तल उपाख्यानम् - शकुन्तला दुष्यन्तयोः प्रणयगाथा महाभारतस्य आदिपर्वणि अस्ति। ऋषिः विश्वामित्रस्य मेनकायाः च सुता आसीत् शकुन्तला। कन्वमुनिना पालिता शकुन्तलां पौरवः दृष्यन्तः गन्धर्व प्रथयापरिणयति स्म। परन्तु राजा राजपुरीं गत्वा शकुन्तलावृत्तान्तं विस्मृतवान्। आश्रमे एव शकुन्तलायाः एकं पुत्रसन्तानं जन्म बभूव। शकुन्तलाः तस्याः पुत्रेन सह राजसभायां गत्वा राजानं स्वपरिचयं ददाति स्म। परन्तु लोकापवादभयात् शकुन्तलां पत्नीरूपेण स्वीकर्तुं राजा न इच्छति स्म। देववाणीं श्रुत्वा राजा ताम् भार्यारूपेण गृह्णाति स्म।

नल-दमयन्त्याः उपाख्यानम्- पाण्डवानां वनवासकाले वृहदश्व नाम कश्चित् मुनि दुःखम् अभिभुतान् पाण्डवान् अश्वासयितुं नल दमयन्त्याः दुदर्शाग्रस्ताः कथां कथितवान्।

ययातिः उपाख्यानम्- आदौ ययाति नाम्ना नृपतिः शुक्राचार्यस्य दुहिता देवयानी उपसेमे। परन्तु देवयान्याः दासो असुरकण्यां शर्मिष्ठायाम् अपि ययातिः विवाहं अकरोत्। ततः शुक्राचार्यः ययातिम् अकाले एव जरावस्थाप्राप्तुं अभिशापं ददाति स्म। ययाति- शर्मिष्ठायोः कनिष्ठपुत्रं पुरुं जरावस्थां दत्त्वा पुनरपि यौवनावस्थां लब्धवान्। बहुकालं यौवनभोगं कृत्वा सर्वशेषे समस्तानि पार्थिवसुखं असारमत्वा पुनरपि पुत्रं यौवनं प्रत्याप्य राज्यदानं अकरोत्।

रामोपाख्यानम् - मार्कण्डेयमुनिना युधिष्ठिरं वाल्मिकी-मुनिरचितं रामोपाख्यानं संक्षेपतः वर्ण्यते।

शिवेः उपाख्यानम्-उशीनरनृपतिः शिविः शरणागतकपोतस्य प्राणरक्षितुं स्वमांसं श्येनं अर्पयति स्म।

सावित्रे उपाख्यानम्- द्युमत्सेनस्य पुत्र आसोत सत्यवान्। तस्य पत्नी आसीत दमयन्तीः। सत्यवान तथा तस्म पतिव्रता भार्याचा, सावित्याः आख्यानं आरतीय स्त्रिणाम पक्षे अतीव आदर्शस्थानीयमाख्यानम्। आख्यानम् अनुसारेण सावित्रीः पातिव्रत्य बलात यमराजस्य आशीवीदं लब्धाः मृत्यने मृतपतेः हृतायुषं लब्धवती।

एतानि आख्यानानि महाभारतोययुगस्य लोकानां परम्परागत विचितानि सामाजिक-

सांस्कृतिक व्यवस्थानि राजी प्रदेशात मध्ये पितान्युतयोः सम्बन्धाः, गुरु शिष्यानां सम्बन्धा, दाम्पत्यप्रेम्नगयानि सुन्दरतया वर्णितम इति शम्।

३.७ महाभारतकालीन समाजः

महाभारतः हिन्दुधर्मस्य धर्मग्रन्थ अपि च भारतस्य सामाजिकः इतिहासम्। भारतवर्षस्य संस्कृतौ समाजिकरीतिषु अपि च साहित्येषु महाभारतस्य प्रभाव अपरिसीमित सन्ति।

महाभारतस्य प्रतिपाद्यं मूलतः राजनैतिकम् अपि च पारिवारिकम्। महाभारतकालीन-समाजे वर्णाश्रमव्यावस्थायाः प्रचलनमासीत्। महाभारतकालीन समाजे ब्राह्मणत्वं वंशानुक्रमिक नासीत्। उक्तं गीतायाम-

'चातुवर्ण्यं मया सृष्टं गुणकर्मविभागश्च' इति।

वृत्तिगतरूपेन महाभारतकालीन समाजः विभज्यन्ते यथा-ब्राह्मणः, क्षत्रियः, वैश्यः, शुद्रः इति। समाजे ब्राह्मणस्य स्थानम् आसीत् सर्वश्रेष्ठः। महाभारतस्य आदिपर्वणि उल्लेखम् अस्ति- 'गो ब्राह्मणस्य माहात्म वर्णना प्रव महाभारतस्य उद्देश्यम्' इति-

'अनेकजननी यत्र कार्तिकेयस्य सम्भवः। ब्राह्मणानां गवां चैव माहात्म्य यत्र कोर्त्यते॥

ब्राह्मणानां उपरि क्षत्रियाः अपि वेदानाम् अध्ययनं कृतवन्तः। यद्यपि महाभारतकालीन शासनव्यवस्था राजतान्त्रिकं आसीत् तथापि राज्ञाः धर्मानुसारेण शासितवान्। नृपति कदापि स्वैराचारो नासीत्। पिता पुत्रयोः सम्पर्कम् इव राजाप्रजाणां सम्पर्कमासीत्। प्रजाः युधिष्ठिरं पित्रा इव आचरेन्-

'एवं गते ततस्तस्मिन् पितरोवाश्वसन् जनाः'।

महाभारतकालीन समाजेः जनानां प्रमुखाजीवः आसीत् कृषिकर्मणि समाजे यद्यपि बहुविवाहस्य प्रचलनम् आसीत् तथापि नारीणां बहुविवाहस्य प्रचलनं नासीत्। 'वयं पाण्डवाः द्रौपदीं विवाहं करिष्यामः' इति यहा युधिष्टिरः द्रुपदं अवदत् तदा द्रुपद्रः उत्तवान्-

एक्स्य बहव्यो विहिता महिष्य कुरुनन्दन।

नैकस्य बह्वः पुंसः श्रुयन्ते पतयः क्वचित्।।

महाभारतकालीन समाजे ब्रह्मा-विष्णु-महेश्वरस्य माहात्म्यं विशेषरूपेण प्रतिष्ठितम् आसन्। तथापि महाभारते विष्णुः एव मूलशक्तिः अस्ति। महाभारते विष्णोः अवतारमासीत श्रीकृष्णः।

समाजे सहमरणं प्रथा आसीत्। माद्रीदेवी पाण्डुमरणपश्चात् सहमरणं याति स्म। लोकविश्वासस्य प्रतिविश्व महाभारतकालीन समाजे दृश्यते। समाजे शकुनस्य, शृगलस्य आर्तनादाः, अश्वस्य अश्रुपातम्, देवप्रतिमायाः अहेतुकं पतनम् इत्याद्याः अतीव अशुभकारकाः इति लोकसमाजे प्रचलितं आसन्। अन्धविश्वासाः न केवलं अशिक्षितानां लोकानां मध्ये सन्ति, अपितु ज्ञानीजनस्य मध्येऽपि वर्तन्ते। यथा दुर्योधनस्य जन्मकाले अशुभसूचकानि चिह्नानि दृष्टा विदुरादि प्रभृतयः बहुः ज्ञानिनः दुर्योधनं परित्यक्तुं उपदिशन्ति स्म।

तदानीन्तनकाले समरक्षेत्रेषु उच्चस्तराणां समरकलानां प्रयोगः आसीत्। यथा मकरब्युहः, चक्रब्युहः।

भारतवर्षस्य राष्ट्रीयजीवनप्रतिष्ठायां तथा सामाजिकनियन्त्रणस्य क्षेत्रे महाभारतस्य अवदानम् अतीव गुरुत्वपूर्णः। एकलव्यस्य गुरुभक्तिः, युधिष्ठिरस्य सत्यनिष्ठाः, अर्जुनस्य वीरत्वम्, भीष्मस्य ब्रह्मचर्यम्, कर्णस्य पुरुषकारः, अभिमन्योः दुःसाहसिकता, सावित्याः पातिव्रत्यम् इत्यादयः आदर्शाः भारतीयसांस्कृतिकप्रतिष्ठायां महत्वपूर्णः प्रभावः सन्ति।

३.८ महत्वात् भारत्वाच्च महाभारतमुच्यते

अथ महाभारतं हि एकः सुमहान प्राचीन भारतीय ग्रन्थः। प्राचीनतमाःभारतीयउपलब्धाः ग्रन्थाः वेदाः। तत्पश्चात् लौकिकसाहित्ये रामायण महाभारतयोः स्थानम्। अतो हि महाभारतम् इति अस्य ग्रन्थस्य पञ्चमवेदाख्याऽपि विद्यते। वेदशास्त्रे यद्वत् मानवजीवनस्य इहलोके परलोके च भूतभविष्यमानानां कार्याणां वर्णनमपि च तद्धेतुं प्रकाश्यते। तदेव हि महाभारतेऽपि इहलौकिक पारलौकिक घटनाक्रमाणां सुविहिततया वर्ण्यते। पूर्वजन्मनः वालाद्रौपदी पञ्चवृषभः समन्वितां गाम उपहासं चकार। अतो हि परजन्मनि तत्-शापतया पञ्चपति समन्विता द्रौपदी भवति। तहदेव हि अम्बाऽपि परजन्मनि शिखण्डीरूपेण अवतीर्णा भूला भोषाख्य मृत्योः कारणं भवति। इत्यं हि जन्मान्तरवादस्य महिमा प्रकीर्तितः। तदानीन्तन देशस्य राजनैतिक - सामाजिक-अर्थनैतिक परिस्थितीनां चाक्षुषवर्णनमल सञ्जीवितं भवति।

राजविद्या- धनुर्विद्या नीतिविद्या प्रभृति आहरण प्रक्रियापि सम्यक् रूपेण प्रदर्शिता। जुरुम् प्रभृतित् सन्मानितान् जनान् प्रति अक्ति अपि च कक्षिष्ष जनान् प्रति स्नेहः केन प्रकारेण करणीयः अतैव सत्रिहितः। काव्यशास्त्रीयदृष्ट्या महाभारते 'पाञ्चालीरीति विदयते-

'शब्दार्थयोः समो गुम्फः पाञ्चालीरीतिरिष्यते'

ग्रन्थोऽयम ओज - प्रसाद माधुर्यादिभिः सर्वैः काव्यगुणैः परिपूर्णोऽस्ति। यद्यपि महाभारतस्य अङ्गीरसः 'शान्तरसः' अस्ति, तथापि भीष्म - द्रोणः कर्ण-शल्यादिषु पर्वसु वीरर सस्य धारा अपि प्रवाहिता अस्ति। महाभारते शब्दालंकारेषु मुख्यरूपेण 'अनुप्रासः' अर्थालङ्कारेषु उपमा-रूपकः-उत्प्रेक्षा अर्थान्तरन्यासान दृश्यन्ते। यथा-

भोमो भोमपराक्रमः।

अशोकः शोकनाशनः॥

महाभारतस्य अधिकांशतः अनुष्टुप् छन्द्रः कुत्रचिद्र गद्यात्मको आगः अपि दृश्यते। यदा कदा अन्येषां धन्दसामपि प्रयोगः दरीदृश्यते। महाभारतस्य के शैली संवादात्मिका, एवञ्च भाषा सरला, गभीरा प्रभावोत्पादिका वर्तते।

साहित्यरूपेण महाभारतस्य स्थानमतीव उच्चैर्विदयते। अभिमन्युवधः, युद्धान्ते नारीनां विलापः आदिषु दुःखवर्णनम, युद्धवर्णनम्, पाण्डवभातृणां मध्ये प्रेमप्रतिवर्णनं, इत्यं हि सहित रूपेणापि अस्त्र स्थानं प्रशंसनीयम। युद्धारको भाषणकाले मुक्तित्वं, ज्ञानतत्वं, वर्मतत्वं, भक्तितत्वं प्रभृतिन् चित्ताकर्षकरुपेण वर्णिकम्। पाशाक्रीड़ायाः कु-प्रवाहः, सामाजिक व्याधिरिति, सत्यरक्षा, प्रतिज्ञापालनं प्राणेभ्योऽपि महद्रिति सर्वथाऽवदातुं, 'जननो जन्मभूमिश्च स्वर्गादपि गरीयसी' इति

मतं सर्वजनसमाहतमस्ति। प्रतिज्ञादायित्वदेशरक्षणं-कर्तव्यमित्येतेषां पालनार्थं कर्णः अर्जुनः भीमः प्रभृतीनामादर्शं प्रशंसनीयम। इत्य इथं हि मुक्तिविद्या राजनैतिक, ऐतिहासिकं, नीतिविद्या, साहित्य, धर्मविद्या प्रकृतिः विभिन्नेषु विषयेषु चरम उत्कृष्टः निदर्शनपूर्वकं स्वकीया महत्व-प्रदर्शनात् सस्य ग्रन्यस्य महाभारताख्या युक्तियुक्तया एव॥

३.९ महाभारतस्य टीका / भाष्यः

महाभारते बहुभिर्बहुधा व्याख्यातोऽस्ति। अस्य व्याख्यातृषु नारायणनीलकण्ठानन्तमहार्जुनमिश्ररामानुज—विमलबोधशंकराचार्यश्रीनिवासप्रभृतयो द्वाविंशतिः प्रसिद्धाः। नारायणस्य भारतार्थप्रकाशः, अर्जुनमिश्रस्य भरतार्थदीपिका, नीलकण्ठस्य भारतभावदीपिका काश्चनास्य प्रसिद्धाः टीकाः। अस्य हि श्रीमद्भगवदगीता, अनुस्मृतिः, गजेन्द्रमोक्षः, भीष्मस्तवराजः, विष्णुसहस्रनाम चेति पञ्च सन्दर्भा पञ्चरत्नत्वेन गृहीताः।

३.१० महाभारतस्य रचनाकालः

महाभारतं न एककालकृतिः। साम्प्रत्युपलभ्यमानं महाभारतं महाभारतात् परतो बहुषु शतके व्यतितिष्तेव निर्मितं स्यादत्तो जयाख्यस्य ८८०० श्लोकात्मकस्य मूलमहाभारतस्य १,००,००० श्लोकात्मकात् वर्तमानमहाभारतात् पूर्वकालिकत्वं निश्चितम्। अत्र वर्तमानकालमहाभारतम्य रचनाकालसम्बन्धे युक्तो विशिष्य विचारणीयमस्ति-

एकादशशताब्दयां महाकविः क्षेमेन्द्रः महाभारतकाहिनीमवलम्ब्य 'महाभारतमञ्जरी' नाम्ना एकं काव्यं विरचितवान्। अतः वर्तमानमहाभारतस्य कालं एकादशशतकात्पूर्वम् इति वक्तुं शक्यते।

ख्रीष्टिय-अष्टमशतकोत्तरार्धे जाता आदयशंकराचार्या महाभारतं स्त्रीभिर्धर्मज्ञानायाध्येयत्वेनादिशन्ति तेन महाभारतस्य कालम् अष्टमशतकात् पूर्वम् इति वक्तुं शक्यते।

अष्टमशतकमध्यकालभवाः कुमारिलभट्टाः महाभारतस्य अष्टादशानां पर्वणां दशानूनेभ्यः पर्वभ्यः खलु अनुवदन्ति। अतः महाभारतस्य रचनाकालः अष्टमशतिकात् पूर्वम् इति वक्तुं शक्यते। सप्तमशतकोद्भवाः वाणसुबन्धुप्रभृतयः कवयः सर्वाष्टादशपर्वस्योपाख्यानानि परामृशन्ति हरिवंश - परिचयं च आत्मनः आविष्कुर्वन्ति। कम्बोडियानामके भारतस्य प्राचीनोपनिवेशे षष्ठशतके उत्कीर्णात् शिलालेखात् ज्ञायते यत् तत्र स्थितैः कस्मैचिद् मन्दिराय रामायणमहाभारतग्रन्था उपायनं प्रादीयन्त, उपायनकृता च नित्यतत्कथाप्रबन्धोऽपि व्यधीयत इति।

यववालिप्रभृतिषु द्वीपेषु षष्ठशतके महाभारतमवर्तत, तत्कालादपि च प्राग् एतस्यानुवादस्त्रिविष्टपभाषायां समजायत।

चतुर्थपञ्चमशतकभूदानपात्रेषु च स्मृतिरूपेण महाभारतवचनानि निर्दिष्टानि दृष्टानि। ४६२ ख्रीष्टोत्कीर्णे एक शिलालेखे पाराशर्य - व्यासस्य लक्षश्लोकात्मकमहाभारतप्रणेतृत्वमुल्लिख्यते- 'व्यासो नाम महर्षिः पाराशर्यः लक्षपद्यात्मकं महाभारतं प्रणिनाय इति। सीरियादेशभाषायाम्

उपलभ्यमानस्य शान्तिपर्वा -ध्यायत्रयस्य साक्ष्येण हर्टलमहोदयः स्पष्टयति यत् प्रचलितं महाभारतम् ई.पू. पञ्चमशतकनिबद्धात् महाभारतात् न भिद्यते। चिन्तामणिविनायक वैद्यकृतां महाभारतमीमांसायाम् उल्लेखमस्ति यत् ५० ख्रीष्टाब्दकाले लक्षपद्यात्मकं महाभारतं दक्षिणपथे लब्धप्रसारमासीत्। ख्रीष्टप्रथमशतसम्वत्पर्या जीविना वज्रसूची—कारेणाश्वघोषेण हरिवंशस्थं पद्यमेकमुद्धृतम्। एभिः सर्वैः समुदितैरेतत् 'सिद्धं यत् ख्रीष्टशतकप्रारम्भे महाभारतवश्यमवर्तत। अपि च-

पाणिनेर्महाभारतं संस्तुतमासीदिति 'दालमन' साक्ष्येण प्रमीयते।

ख्रीष्टपूर्वपञ्चमशतकप्रणीते आश्वलायनगृह्यसूत्रे महाभारतस्योल्लेखो अस्ति।

प्रायश्चतुःशतवर्षपूर्वे प्रादुभूर्ते बौधायनधर्मसूत्रे महाभारतोल्लेखा दृश्यन्ते।

अस्मिन् ग्रन्थे महाभारतोक्ता विष्णुसहस्रनामोल्लेखः अस्ति। महाभारतम्य शान्तिपर्वणि विष्णोः दशावतारेषु बुद्धस्य नामधेयं न परिगण्यते। महाभारते 'ब्रह्मा एव सर्वेषां देवानां ज्येष्ठो देवः' इति स्वीक्रियते। पालिभाषानिबद्धसाहित्येन च ब्राह्मणो ज्येष्ठत्वं ख्रीष्टपूर्वपञ्चमशताब्दीतः प्रागेव प्रसिद्धमासीत् इति जायते।

ज्योतिषप्रमाणैरपि कतिपये विद्वांसः कल्पयन्ति यत् प्रकृतेन महाभारतेन नूनं ख्रीष्टपूर्वपञ्चमशतकात् पूर्वमेव प्रणीतेन भवितव्यम् इति निश्चिन्वन्ति।यद्वा तद्वा भवतु, सर्वसमीक्षया महाभारतम् ५०० ई.पू. समयतः परतो न निर्मितं किन्तु कदाचित् पूर्वमेव निर्मितमिति प्रतीयते।

३.११ शान्तिपर्वस्य कथावस्तु

महाभारतस्य द्वादशपर्वणः नाम शान्तिपर्व अस्ति। शन्तिपर्वणि त्रीणि उपपर्वाणि सन्ति। तानि यथा -

१. राजधर्मानुशासनपर्व

२. आपद्धर्मपर्व

३. मोक्षधर्मपर्व

अस्मिन पर्वणि ३६५ अध्यायाः सन्ति। पर्वणि मंकगीता (अध्यायः- २७७) पराशरगीता (अध्यायः २९०-९८) हंसंगीता (अध्यायः २९९) नाम्नाऽपि त्रयः अध्यायाः सन्ति। अस्मिन् शान्तिपर्वणि धर्म दर्शन, राजनीति-तथा च अध्यात्मज्ञानानां विवरणानि सन्ति। महारथिकर्णस्य मृत्योः पश्चात् शोकाभिभूतस्य युधिष्ठिरस्य वर्णनया पर्वमिदं प्रारम्भं भवति। कर्णस्य मृत्योः पश्चात् युधिष्ठिरेण अवगतं यत् कर्ण तथ्य जेष्ठभ्राता आसीत्। अतःस विषादग्रस्तः युधिष्ठिरः राजकीय जौवनाचर्यां त्यक्त्वा सन्यासाश्रमं ग्रहीतुं स्थिरम् अकरोत परन्तु, तस्य एनां वैराग्यावस्थां दूरीकर्तुं भीम-अर्जुन-नकुल-सहदेव-द्रौपद्यादयः विभिन्नोपायेन चेष्टां अकुर्वन्। व्यासदेवोऽपि त्वं प्रजापालकरूपेण दायित्वनिर्वाहितुं विभिन्नानि उपदेशवचनानि प्रददौ। व्यासदेवस्य उपदेशं श्रुत्वा स राजारूपेण शासनभारं गृहीत्वा कुरुक्षेत्रे समरक्षेत्रे शरशय्यस्थितस्य पितामहभीष्मस्य समीपे अगच्छत्। तदा युधिष्ठिरं प्रति भीष्मेन बहुनि उपदेशानि प्रदत्तम्। तानि उपदेशानि एव महाभारतस्य 'शान्तिपर्वणः' प्रतिपाद्यम्।

अस्य पर्वश्चन्तर्गतस्य प्रथम उपपर्वद्वये मानवीय-आचार-धर्मनीति राजधर्मा अपि च मनुष्यानां कर्तव्य—अकर्तव्यविषये वर्णितमस्ति। अन्तिमे उपपर्वणि मोक्षप्राप्तेः विषये वर्णनामस्ति। अत्र सन्नासधर्म एव मोक्षप्राप्त्यर्थं मुख्यहेतुः इति उच्यते। स्वधर्मपालनम् अपि च निष्कामङ्कभाव एव मोक्षप्राप्तेः मूलम् इति भीष्मः युधिष्ठिरं प्रति न्यगदत्। अस्मिन् पर्वणि उल्लेखमस्ति यत् भोगस्य प्रति अधिकम् आकर्षणम् एव मनुष्यानां पतनस्य कारणम्। क्षमा अपि च दरिद्रान् प्रति दानम् एतद् द्वयं मोक्ष लाभस्य उपायम्। चतुराश्रमेषु गृहस्थाश्रमम् एव श्रेष्ठम् इति अस्मिन् पर्वणि उल्लेखमस्ति। गृहस्थाश्रमेण धर्म-अर्थ-काम-मोक्षः इति पुरुषार्थानां सिद्धिं भवति। अपि च अनेन आश्रमधर्मपालनेन अनायासेन एव सन्यासाश्रम प्राप्तुं भवति।

अस्मिन् पर्वणि बहुनि नीतिवाक्यानि सन्निविष्टाः सन्ति। पशुपक्षीनां कथामाध्यमेन अत्र नीतिकथायाः समाहारं भवति (शान्तिपर्व, १/१४३-२४७)।'कपोतलब्धोपाख्यानम्' इति उपाख्यानम् अस्मिन् विषये प्रकृष्ट उदाहरणम् अस्ति। ज्येष्ठजनं प्रति सन्मानम् एव यश ख्याति-सम्पद च परमायुलाभस्य उपायः इत्यपि अस्मिन् पर्वणि उल्लेखमस्ति।

बीजमात्रं पुरा सृष्टं यदेतत् परिवर्तते।
मृतामृताः प्रणश्यन्ति बीजाद् बीजं प्रवर्तते ॥- शान्तिपर्व, १८६/२५)

शठता - लोकोपवाद-निन्दा -मिथ्या प्रवचनानां-क्रोध-लोभ-ईर्षा इत्याद्याः सर्वथा वर्जनीयाः इत्यपि भीष्मस्य उक्तिप्रसङ्गेन वक्तमस्ति (शान्तिपर्व, २५४/२२-२४), सहृदयमेव सर्वश्रेष्ठं तीर्थस्थानम् इत्यपि अस्मिन् पर्वणि उल्लेखमस्ति।

भीष्मः तस्य उपदेशवचने उक्तमासीत् यत् वृहस्पतिर्देवः पुरुषार्थ एव राजधर्मस्य मूलं इति उच्यते-

उत्थानं हि नरेन्द्राणां बृहस्पतिरभाषत।
राजधर्मस्य तन्मूलं श्लोकांश्चात्र निबोध मे।
उत्थानेनामृतं लब्धमुत्थानेनासुरा हताः।
उत्थानेन महेन्द्रेण श्रेष्ठ्यं प्राप्तं दिवीह च।
उत्थानवीरः पुरुषो वाग्वीरानधितिष्ठति।
उत्थानवीरान् वाग्वीरा रममन्त उपासते॥
उत्थानहीनो राजा हि बुद्धिमानपि नित्यशः।
प्रधर्षणीयः शत्रूणां भुजङ्ग इव निर्विषः॥
न च शतुरवज्ञेयो दुर्वलोऽपि बलीयसा।
अल्पोऽपि हि दहत्यग्निर्विषमल्पं हिनस्ति च॥
(शान्तिपर्व, ५८/२३-१७).

देवताः तेषां उद्यमेन हि अमृतं लाभं अकरोत्। स्व उद्यमेन हि इन्द्रः स्वर्गलोकस्य अधिपति अभवत्। अतः उद्यमी जनान् प्रति श्लाघ्यवचनानि अत्र प्राप्यते। सत्कर्म एवं धर्मः इति वचनमाधृत्य सत्कर्मकर्तुं प्रेरयति भीष्मः। उदारभावः अपि च मानवप्रेम्नः एव प्रकृतधर्मः इत्यपि

अस्मिन् पर्वणि उक्तमस्ति। भीष्मः उक्तवान् - यानि व्यवहाराणि स्वस्य निमित्ते अप्रियाणि तानि व्यवहारः अन्येषां प्रति न कर्तव्यम् -

यदन्यैर्विहितं नेच्छेदात्मनः कर्म पुरुषः।
न तत् परेषु कुर्वीत जानन्नप्रिययात्मनः।।

धर्मस्य लक्षणप्रसङ्गे मोक्षधर्म प्रकरणे युधिष्ठिरस्य प्रश्नस्य उत्तररूपेण भीष्मः उक्तं यत् - वेदः स्मृतिः सदाचारः एतानि धर्मस्य लक्ष्णानि। सदाचारः एव धर्मस्य मूलमस्ति। अर्थोपार्जनमपि धर्मस्य मूलम् इत्यपि आलोचितमस्ति -

संरोहत्यकृतप्रज्ञः सदा येन हि पादपम्।
स तमेव ततो हन्ति विषग्रन्थिरिवातुरम्॥
शरीरं पुरमित्याहु स्वामिनो बुद्धिरिष्यते।
तत्ववुद्धेः शरीरस्थं मनो नामाथचिन्तकम्॥
(शान्तिपर्वः /२५४/६, ९).

मोक्षधर्मस्य विषये उल्लेखमस्ति यत्-जीवात्मा-परमात्मानोः तादात्मसम्बन्धः एव मोक्षः इति (शान्तिपर्व, २०४, २०६, २९४, २९६), शान्तिपर्वस्य 'सनत्-सुजातीय' आख्याने संसारस्य त्यागं कृत्वा ईश्वरस्य आराधना कर्तुं उपदिदेशः। अपि च स्वगृहे स्थित्वा आश्रमधर्मपालनम् अपि मोक्षलाभस्य उपायम् इत्यपि उल्लेखमस्ति। अस्य पर्वणः ३२६ अध्याये इन्द्रियं च पञ्चप्राणमेव मोक्षयोगः इत्युच्यते।

भक्तिः अपि च श्रद्धाविषयेऽपि अस्मिन् सर्गे वर्णितमस्ति। अत्र ज्येष्ठजनं प्रति श्रद्धा-सन्मानकर्तुं उपदिदेशः। सत्वगुणमाहरणकर्तुं अपि उपदिदेशः-

न तस्मै धारयेद् दण्डं राजा धर्मेण धर्मवित्।
क्षत्रियस्य तु बालिश्याद् ब्राह्मणः क्लिश्यते क्षुधा॥
श्रुतशीले समाज्ञाय वृत्तिमस्य प्रकल्पयेत्।
अथैनं परिरक्षेत पिता पुत्रमिवौरसम्॥
इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये।
अनुकल्पः परो धर्मो धर्मवादैस्तु केवलम्॥
विश्वैर्देवैश्च साध्यैश्च ब्राह्मणैश्च महर्षिभिः।
आपत्पु मरणाद् भीतैर्विधिः प्रतिनिधिकृतः॥
प्रभुः प्रथमकल्पस्य योऽनुकल्पे न वर्तते।
न साम्परायिकं तस्य दुर्मतेविद्यते फलम्॥
न ब्राह्मणो निवेदेत किंचिद् राजनि वेदवित्।
स्ववीर्याद् राजवीर्याच्च स्ववीर्यं बलवत्तरम्॥
(शान्तिपर्व, २५६/२०-२८/२६५/२३-२८)

भीष्मस्य वचनानुसारेण भक्तिः अपि च श्रद्धापूर्वकं दानम् अतीव श्रेष्ठम् इति। भीष्मः

उक्तवान्- ईश्वरं प्रति श्रद्धा आदित्यसम इव भवति। श्रद्धाहीनजनाः शीघ्रं विनाशप्राप्तं भवति -

अहिंसादिकृतं कर्म इह चैव परत्र च।
श्रद्धां निहन्ति वै ब्रह्मन् सा हता हन्ति तं नरम्॥
समानां श्रद्धाननां संयतानां सुचेतसाम्।
कुर्वतां यज्ञ इत्येव न यज्ञो जातु नेष्यते॥
श्रद्धा वैवस्वतो सेयं सूर्यस्य दुहिता द्विज।
सावित्री प्रसवित्री च बहिर्वाङ्मनसो ततः॥
(शान्तिपर्व, २६४/६-८).

युधिष्ठिरं प्रति उपदेशरूपेण भीष्मः त्रयोदशानां आचाराणां विषये उल्लेखं क्रियते। इन्द्रियदमनं तथा वासनात्यागः अध्यात्मिक उन्नतेः मूलमस्ति।। इन्द्रियदमनेन जनाः पापरहितं भूत्वा तेजस्वी भवति। त्यागस्य विषयेऽपि अस्मिन् पर्वणि उल्लेखमस्ति। त्यागमेव मानवजीवनस्य कृते अतीव गुरुत्वपूर्णमस्ति इति महाभारतस्थ शान्तिपर्वणः मूलकथावस्तुसारः इति शम्।

३.१२ मोक्षधर्मपर्व

भरद्वाज उवाच-
दानस्य किं फलं प्रादुर्धर्मस्य चरितस्य च।
तपसश्च सुतप्तस्य स्वाध्यायस्य दुतस्थ वा॥ १॥
अन्वयः प्राहुः दानस्य किं फलं धर्मस्य चरितस्य च।
तपसः च सुतप्तस्य स्वाध्यायस्य वा दुतस्य।

सरला व्याख्या - भरद्वाज उवाच- हे महात्मन, दानस्य फलं किं, तपसश्च स्वाध्यायस्य दुतस्य वा फलं किं, भवान् कृपया मां वदतु।

व्याकरण =
प्रादुः = प्र-$\sqrt{}$ब्यू+लिट् + उस्
फलं - कर्मणि हितीया, फलतीति फल निष्पतौ अच्।
तपसा = तपः = क्ली तपति इति तप असून्।
स्वाध्यायः स्वाध्यायो जपः इत्योक्त।
भृगुरुवाच -
दुतेन शाम्यते पापं स्वाध्यायै शान्तिरुत्तमा।
दानेन भोगानित्याहुस्तपसा स्वर्गमाप्नुयात॥ २॥

अन्तयः इति आहुः हुतेशाम्यते पापं स्वाध्यायैः शान्तिः उत्तमा दानेन भोगान, तपसा स्वर्गम आप्नुयात्॥

सरला व्याख्या -दुतेन पापनाशं भवति, वेदाध्ययनेन शान्तिलाभं भवति, दानेन भोगप्राप्तिं तपसा स्वर्गलाभं च भवति॥

व्याकरण =

हुतेन = करणे तृतीया

स्वर्गम् = कर्मणि द्वितीया।

स्वाध्यायैः – करणे तृतीया (बहु)

आप्नुयात = आप्+विधिलिङ् यात्।

दानेन = करणे तृतीया

दानं तु द्विविधं प्राहुः परत्रार्थमिहैव च।

सदयो यद् दीयते किंचित् तत्परेलोपतिष्ठते ॥ ३।।

अन्वयः = द्रानं तु द्विविधः प्राहुः परलार्थम्, इहैव च सदभ्यो यद् दीयते किञ्चित् तत् परत्र उपतिष्ठते॥

सरला व्याख्या = दानं द्विविधं –ऐहिकं लौकिकंञ्च। सत्यानं दानेन पारलौकिकं सुखलाभं भवति।

व्याकरण –

सत्पात्रं= कर्मणि द्वितीया।

दानेन = करणे तृतीया।

सदभ्यो –सम्प्रदाने चतुर्थी।

उपतिष्ठते = उप–स्था + लट् ते।

असद्भ्यो दीयते यत्तु तद् दानमिह भुज्यते।

यादृशं दीयते द्रानं तादृशं फलम् अश्नुते ॥ ४॥

अन्वयः असद्भ्यो दीयते यत्तु तद् दानम् इह भुज्यते दानं यादृशं दीयते तादृशं फलम् अश्नुते।

सरना व्याख्या– असत्पात्रं दानेन पार्थिवं सुखलाभं भवति। मनुष्या यथा दानं क्रियते तथैव फललाभं भवति।

व्याकरण =

असद्भ्यो = सम्प्रदाने चतुथी।

भुज्यते = $\sqrt{}$भुज + कमणि लट् ते।

दानं = कर्मणि हितीया।

फलम् = कर्मणि दूतीया।

अश्नुते = $\sqrt{}$अश् + लट् ते।

भरद्वाज उवाच–

किं कस्य धर्माचरणं किं वा धर्मस्य लक्षणम्।

धर्मः कतिविधो वापि तद्र भवान् वक्तुमर्हति ॥ ५।।

अन्वय किम्, कस्य धर्म आचरणं किं वा धर्मस्य लक्षणम्, धर्मः कतिविध वा अपि।

सरला व्याख्या = भरद्वाजः, महर्षिं पृच्छति, धर्मस्य किं लक्षणम् धर्म कतिविधाः, धर्माचरणं केन प्रकारेण कर्तव्यम्, इनि विषये कृपया मां वदतु।

व्याकरण =

वक्तुमर्हति- वक्तुम् + अर्हति

वक्तुम = √वच् + तुमुन्

भवान्= सम्बोधने प्रथमा।

स्वधर्माचरणे युक्ता ये भवन्ति मनीषिणः।

तेषां स्वर्गफलावाप्तिर्योऽन्यथा स विमुक्ष्मते ॥ ६ ॥

अन्वयः -स्व धर्म आचरणे युक्ता ते भवन्ति मनीषिणः तेषां स्वर्गफलम् अवाप्ति यो अन्यथा स विमुच्यते।

सरला व्याख्या = भृगुरुवाच - 'स्वधर्मपालनमेव धर्मः' इति

मनीषिणां मतम्। यः स्वधर्मपालनं न क्रियते सः निश्चितमेव मूर्खोऽस्ति।

व्याकरण =

स्वधर्मपालने-अधिकरणे सप्तमी।

वक्तुम् = √वच् + तुमुन्।

युक्ता = √युज् + क्त (प्रथमा बहुवचन)

अव्याप्तिः अव- आप् + क्तिन्।

भरद्वाज उवाच-

यदेतच्चातुराश्रम्यं ब्रह्मर्षिविहितं पुरा।

तेषां स्वे स्वे समाचारास्तान् में वक्तुमिहार्हसि ॥ ७ ॥

अन्वयः = एतद् चतुराश्रम्यं यह ब्रह्मर्षिं विदितं पुरा। तेषां स्वे स्व समाचाराः तान् मे वक्तुम्, इहा अर्हसि।

सरला व्याख्या = हे महात्मनः प्राचीनकाले महर्षिणा चतुराश्रमं निमित्ते कीदृशं धर्मनिरूपितं क्रियते। अपि च तानि धर्मपालनार्थं कीदृशम् आचरणं निर्णीतम् इति विषये भवान् कृपया वदतु।

व्याकरण =

वक्तुमिहार्हसि = वक्तुम् + इह + अर्हसि।

वक्तुम = वच् + तुमुन्

भृगुरुवाच -

पूर्वमेव भगवता ब्रह्मणा लोकहितमनुतिष्ठता धर्मसंरक्षणार्थमाश्रमाञ्चत्वारोऽभिनिर्दिष्टाः। तत्र गुरुकुलवासमेव प्रथममाश्रममुदाहरन्ति। सम्यग् यत्र शौचसंस्कारनियम-व्रतविनियतात्मा उभे संध्ये भास्कराग्निदैवतान्युपस्थाप्य विहाय तन्द्रालस्ये गुरोरभिवादनवेद्राभ्यासश्रवणपवित्रीकृता-तरात्मा विषवणमुपस्पृश्य ब्रह्मचात्रि परिचरणगुरु—शुश्रुषानित्यश्रित शैक्षयादि सर्वनिवेदितान्तरात्मा गुरुवचन—निर्देशानुष्ठाना प्रतिकुली गुरुप्रसादलब्धरखाध्यायतत्परः स्यात' अन्वयः- पूर्वमेव अगवता

ब्रह्मणा लोकहितमनुतिष्ठता धर्म संरक्षणार्थम आश्रम अवारी आश निर्दिष्टाः। तत्र गुरुकुल वासमेव प्रथमम् आश्रम् उदाहरन्ति। सम्यग् यत्र शौच-संस्कार-नियम-व्रतविनियतामा उभेसन्ध्ये भास्करमग्निदेवतान् उपस्थय विहाय तन्द्रालस्ये गुरोः अभिवादनेन वेद अभ्यास-श्रवन-पवित्रीकृत अन्तरात्मा त्रिषवणम् उपस्पृश्य ब्रह्मचर्य-अग्नि परिचरण गुरु-शुश्रुषाण इति भिक्षा भैक्षादि सर्वनिवेदितान्तरात्मा गुरुवचन—निर्देशान् अनुष्ठान् प्रतिकूलो गुरुप्रसादलब्धस्वाध्याय तत् परः स्यात्।

सरला व्याख्या - पूर्वे भगवान् ब्रह्मा लोकहितार्थं धर्मरक्षार्थं च चतुराश्रमं निर्धारितम्। तानि चतुराश्रमेषु ब्रह्मचर्याश्रम एवं प्रथममाश्रममे अस्ति। ब्रह्मचर्याश्रमे छात्राः गुरोः समीपे पवित्ररूपेण निवासं कर्तव्यम्।

व्याकरण=

लोकहितम् = (षष्ठीतत्पुरुष) लोकस्य हितम्।

अनुष्ठितता = अनु-स्था+शतृ, पुं, तृतीया, एक,

उदाहरन्ति = उत्-आ-$\sqrt{}$हर् + लट् अन्ति।

उपस्थाय = उप-स्था + ल्यप्।

भवति चात्र श्लोकः -

गुरुं यस्तु समाराध्य द्विजो वेदमवाप्नुयात्।

तस्य स्वर्गफलावाप्तिः सिध्यते चास्य मानसमिति ॥ ९ ॥

अन्वयः भवति चात्र श्लोकः -

गुरुं यत् तु सम् आराध्य द्विजः वेदम् आप्नुयात् तस्य स्वर्गफलम् अवाप्तिः सिद्धाते च अस्य मानसम् इति।

सरला व्याख्या = शास्ते उल्लिख्यन्ते यथा- गुरोः प्रसादात यं ज्ञानलाभं भवति तेन द्वारा वेदाध्ययने तत्परो भाव उचितम्। यम् गुरुम् आराधनां कृत्वा वेद्राध्ययनं क्रियते तस्य स्वर्गलाभं भवति।

व्याकरण =

समाराध्य = सम-आ-$\sqrt{}$राध् + ल्यप्।

आप्नुयात् = $\sqrt{}$आप् + विधिलिङ् यात्।

अव्याप्तिः = अव- $\sqrt{}$आप् + क्तिन्।

गार्हस्थ्यं खलु द्वितीयमाश्रमं वदन्ति। तस्य समुद्राचार—लक्षणं सर्वमनुव्याख्यास्यामः। समावृत्तानां सदाचारानां सहधर्मचर्यफलार्थिना गृहाश्रमो विधीयते। धमार्थकामा व्याप्तिसंत त्रिवर्गसाधनापेक्षयागर्हितेन कर्मणा धनान्यादायः स्वाध्यायोपलब्धप्रकर्षेण वा ब्रह्मर्षिनिमित्तन वा आद्रिसारगतेन वा। हव्यकव्यनियमाभ्यासदैवत प्रसादोपलब्धेन वा धनेन गृहस्थो गर्हस्थ्यं वर्तयेत्। तद्धि सर्वाश्रमाणां मूलमुदाहरन्ति। गुरुकुलनिवासिनः परिव्राजका ये चान्ये संकल्पितव्रत नियम धर्मानुष्ठायिनः तेषामपि यत् एव भिक्षा-बलि-संविभागाः प्रवर्तन्ते।

अन्वयः गार्हस्थ्यं खलु द्वितीय आश्रमं वदन्ति। अस्य समुदाचार लक्षणं सर्वमनुष्य व्याख्यास्यामः। समावृत्तानां सदाचारानां सहधर्मचर्यफलार्थिना गृहाश्रमो विधीयते।धर्म-अर्थ-काम अव्याप्ति हि र्यत्र त्रिवर्गसाधन-उपलब्ध-प्रकर्षेण वा ब्रह्मर्षिः निमित्तेन वा आद्रिसारगतेन वा। हव्य-कव्य-नियम-अभ्यास-दैवत-प्रसाद-उपलब्धेन वा धनेन गृहस्थो गार्हस्थ्यं वर्तयेत्। तद्धि सर्वाश्रमानां मूलम् उदाहरन्ति। गुरुकूलनिवासिनः परिव्राजका ये च अन्ये संकल्पित -व्रत नियमः धर्मः अनुष्ठायिनः तेषामपि यत् एव भिक्षा-बलि-संविभागाः प्रवर्तन्ते।।

सरलव्याख्या-

गार्हस्थाश्रमम् एव द्वितीयाश्रममस्ति। अस्मिन् आश्रमे धर्म-अर्थ-कामादि लाभार्थं चेष्टां कर्तव्यम्। गृहस्थाश्रमेव सर्वाश्रमानां मु

मूलम्। गुरुकुलवासिनः परिव्राजकाः अन्ये संकल्पितव्रतनियमधर्मानुष्ठानकारो अपि गार्हस्थाश्रमोजनात् भिक्षाबलिं गृहीत्वा एव धर्मकार्यं सम्पादनं क्रियते।

व्याकरण =

गार्हस्थम् = कर्मणि द्वितीया।

प्रवर्तन्ते = प्र - √वृत् + लट् अन्ते।

वानप्रस्थानां च द्रव्योपस्कार इति प्रायशः खल्वेते साधवः साधुपथ्यौदनाः स्वाध्याय प्रसङ्गिनस्तोर्थाभिगम- देशदर्शनार्थं पृथिवीं पर्यटन्ति, तेषां प्रत्युख्यानाहि मनाभिवादनानसूय वाक्प्रदानसुखशक्त्यासनसुखशयनाभ्यवहरिसक्रिया चेति।। ११।।

अन्वयः -वानप्रस्थानां च द्रव्य- उपस्कार इति प्रायशः खलु एते साधवः साधुपथ्य-उदनाः स्वाध्याय-प्रसंङ्गिन तीर्थ अभिगमन देश दर्शनार्थं पृथिवीं पर्यटन्ति। तेषां प्रत्युथ्तान अभिगमन अभिवादन-अनसुय वा प्रदान-सुखशक्या आसन सुख शयनाभ्यः व्यवहार सक्रिया च इति॥

सरला व्याख्या = वानप्रस्थानाश्रमीजनां दर्शनमात्रैव सम्भाषणं कृत्वा हास्यवदने परिचर्याकर्तुं कर्तव्यम्।

व्याकरण =

पृथिवीम् = कर्मणि द्वितीया.

शयनाभ्यः अपादाने पञ्चमी।

भवन्ति चात्र श्लोकाः =

अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते।

स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ।। १२।।

अन्वयः यस्य अतिथिः भग्न-आश गृहात् प्रतिनिवर्तते स तस्मै दुःकृत दत्ता पुण्यमादाय गच्छति॥

सरला व्याख्या - शास्त्रे अस्ति यत्- यस्मिन् गृहात् अतिथयः निराशं भूत्वा प्रतिनिवर्तते अतिथिः अभिशापात् तस्य गृहस्थस्य पूण्यनाशं भवति।

व्याकरण

आदाय - आ-दा + ल्यप

पुण्यम् = कर्मणि हितीया

प्रतिनिवर्तते = प्रति नि वृत् + लट् ते।

दत्ता -दा + त्वाच्

भग्नाशः-भग्ना आशा यस्य सः - बहुव्रीहि।

अपि चात्र यज्ञक्रियाथिर्देवताः प्रीयन्ते।

निवापेन पितरौ विद्याभ्यासश्रवणधारणेन कषयः।

अपत्योत्पादनेन प्रजापतिरिति ॥ २३।।

अन्वयः अपि च अत्र यज्ञक्रियाभिः दैवतः प्रोयन्ते। पितरौ निवापेन विद्या अभ्यास् श्रवणौ धारणेन ऋषयः प्रजापतिः अपत्य उत्पादनेन इति।

सरला व्याख्या= अस्मिन् आश्रमे यज्ञक्रियादिद्वारा देवान्, श्राद्धादिन पितृलोकान्, विद्याभास श्रवणधारणेन ऋषिम्, पुत्रोत्पादनेन प्रजापतिं प्रोयन्ते ॥

व्याकरण

ऋषभः = कर्तरि प्रथमा।

उत्पादनेन = करणे तृतीया।

यज्ञक्रियाभिः = करणे तृतीया।

श्लोकौ चात्र भवतः -

वात्पल्यात्पर्वभुतेभ्यो वाच्याःश्रोत्रसुखा गिरः।

परितापोपयातञ्च पारुष्यं चात्र गर्हितम् ॥ १४॥

अन्वयः = श्लोकौ च अत्र भवतः - श्रोत सुखा गिरः वाच्या वात्पल्यात्, सर्वभूतेभ्यः पारुष्यं परिताप उपघातः च अल गर्हितं च।

सरला व्याख्या = गृहस्थोजनाः सर्वप्राणीं सम्भाषणं कर्तुं कर्तव्यम्। निन्दावचनं न करणीयम्, कपटवावयं कदापि न प्रयोगम् उचितम्।

व्याकरण =

श्रोतसखा = श्रोतुम् सुखाः = चतुर्थी तत्पुरुष समास।

वात्पल्यात्-अपदाने पञ्चमी।

सर्वभूतेभ्यः- अपादाने पञ्चमी।

अवज्ञानमहंकारो दम्भश्चैव विगर्हितः।

अहिंसा सत्यमक्रोधः सर्वाश्रमगतं तपः॥ १५॥

अन्वयः = अवज्ञान अहंकार दम्भः च एव विगर्हितः अहिंसा सत्यम, अक्रोधः सर्व आश्रमगतं तपः।

सरला व्याख्या -अवज्ञान अहंकारः दम्भ च कदापि न करणीयम्। सर्वेषु आश्रमेषु अहिंसा-सत्यम-अक्रोधं च श्रेष्ठम् अस्ति। अतः अहिंसा- सत्यम् अक्रोधं इति सर्वथा अदरणोयम्।

व्याकरण=

अवज्ञानम् = अव-√ज्ञा+ ल्युट् ।

अपि चात्र मान्याभरणवस्त्राभ्यङ्गनित्योपभोगनृत्यगीतवादितश्रुतिसुखनयना भिरामदर्शनानां प्राप्तिर्भक्ष्यभोज्यलेघ्यपेयचोष्याणामभ्यवहार्याणां विविधानामुपभोगः। स्वविद्वारसन्तोषः कामसुखावाप्तिरिति ॥ १६

अन्वयः- अपि च अत्र माल्य- आभरण-वस्त्राभिः अद्र-नित्य उपभोगः काम सुखम् अव्याप्ति इति स्व विहार सन्तोषः।

सरला व्याख्या = गृहस्थामोजनः माल्याभरणं, नृत्य गोत उपभोगं नयनाभिरामं दर्शनं, कामसुखं इत्यादयः लभितुं शक्यते॥

व्याकरण-

उपभोगः = उप-√भुज् + अच।

अव्याप्तिः = अव -√आप् + क्तिन्।

दर्शनानां प्राप्तिः भक्ष्यभोज्यलेघ्यपेय च उष्याणाम्।

त्रिवर्गगुणनिवृत्तिर्यस्य नित्यं गृहाश्रमे।

स सुखन्यनुभूयेह शिष्टानां गतिमाप्नुयात् ।। १७।।

अन्वयः = यस्य गृहाश्रमे त्रिवर्ग निवृत्तिः स सुखान् अनुभूय इह शिष्टानां गतिः आप्नुयात्।

सरला व्याख्या- यः गृहस्थाश्रमोजनः त्रिवर्गसाधनं, त्रिगुणं साधनं कर्तुं शक्यते सः परमा प्राप्तुं शक्यते।

व्याकरण=

प्राप्तिः = प्र- √आप+ क्तिन्।

गति = √गम् + क्तिन्।

उच्छवृत्तिर्गृहस्थो यः स्वधर्मीचरणे रतः।

व्यक्तकामसुखारम्भः स्वर्गस्तस्य न दुर्लभः।। २८॥

अन्वयः = यः स्वधर्माचरणे स्तः उञ्छवृत्ति गृहस्थो व्यक्त काम सुख आरम्भः तस्य स्वर्गः न दुर्लभः॥

सरला व्याख्या = गृहस्थाश्रतो स्थित्वा यः कामं त्यक्ता उच्छवृत्तिं गृहीत्वा स्वधर्मपालनं क्रियते तस्य अपि स्वर्गलाभं भवति।

व्याकरण =

गृहाश्रमे = गृहस्य आश्रमः = षष्ठी तत्पुरुष समास।

स्वधर्माचणे = स्वस्य धर्मः = षष्ठी तत्पुरुष।

तस्य आचरणम् = षष्ठी तत्पुरुष।

৩.১৩ অধ্যায়স্য অসমীয়া ভাষায়াং সারাংশঃ

ৰামায়ণ আৰু মহাভাৰত হৈছে লৌকিক সংস্কৃত সাহিত্যৰ কালজয়ী সৃষ্টি -

ভাৰতীয় জনসাধাৰণৰ ইপ্সিত চতুৰ্বৰ্গ ধৰ্ম-অৰ্থ-কাম-মোক্ষ মহাভাৰততে বিবিধ আখ্যাৰ দ্বাৰা বিস্তৃতভাৱে বৰ্ণনা কৰা হৈছে। গ্ৰন্থখনক পঞ্চমবেদ বুলিও কোৱা হয়। অনুষ্টুপ ছন্দোবদ্ধ, শান্তৰস প্ৰধান এই ব্যৱহাৰিক কাব্যখন - সহজ-সৰল, মধুৰ, গম্ভীৰ, জ্ঞানগৰ্ভ উক্তিৰ অক্ষয় ভাণ্ডাৰ। এই গ্ৰন্থখনও মুঠ ওঠৰটা পৰ্ব আছে। মহৰ্ষি ব্যাসদেৱ এই গ্ৰন্থখনৰ প্ৰণেতা। মহাভাৰত কোনো এটা নিৰ্দিষ্ট সময়ত ৰচিত হোৱা নাই। বৰ্তমান সময়ত মহাভাৰততে প্ৰায় একলাখ শ্লোক পোৱা যায়। পণ্ডিতসকলে মত ব্যক্ত ক�ৰিছে যে, আদিতে মহাভাৰততে ইমান সংখ্যক শ্লোক নাছিল। বিভিন্ন সময়ত মহাভাৰতৰ মূল কাহিনীভাগৰ লগত বহু কথা যোগ হৈ বৰ্ত্তমানৰ কলেবৰ লাভ কৰিছে।

প্ৰথম অৱস্থাত এই কাব্যখনৰ নাম আছিল জয়কাব্য। শ্লোকযুক্ত এই গ্ৰন্থখনে দ্বিতীয় পৰ্যায়ত 'ভাৰত' নামৰে বিকশিত হয়। এই ভাৰতকাব্য ই পৰৱৰ্তীকালত অধিক বিস্তৃত হৈ মহাভাৰত নাম লাভ কৰে। মহাভাৰততে সৰ্বমুঠ শ্লোকৰ সংখ্যা হ'ল এক লাখ। সেই কাৰণে মহাভাৰতৰ আন এটা নাম হ'ল 'শতসাহস্ৰী সংহিতা'। মহাভাৰতৰ দ্বাদশ পৰ্বতোৰ নাম হ'ল শান্তিপৰ্ব। এই শান্তিপৰ্বত তিনিটা উপপৰ্ব আছে। সেই কেইটা হ'ল —

- ৰাজধৰ্মানুশাসনপৰ্ব।
- আপদ্ধৰ্মপৰ্ব।
- মোক্ষধৰ্মপৰ্ব।

শান্তিপৰ্বত মুঠ টা অধ্যায় আছে। আমাৰ আলোচিত শান্তিপৰ্বৰ নং অধ্যায়ত ভৃগু আৰু ভৰদ্বাজ মুনিৰ কথোপকথন বৰ্ণিত হৈছে। অধ্যাগটোৰ প্ৰাৰম্ভতে ভৰদ্বাজ মুনিয়ে কৃষ্ণক সুধিছিল যে দানৰ পৰা কি ফল লাভ হয় ? তেতিয়া ভৃগুৱে কৈছিল যে দানৰ দ্বাৰা মানুহৰ ভোগ তথা তপস্যাৰ দ্বাৰা মানুহৰ স্বৰ্গলাভ হয়। দান দুই প্ৰকাৰৰ-পাৰলৌকিক আৰু ইহলৌকিক। সৎপাত্ৰৰ দান কৰিলে পাৰলৌকিক সুখ লাভ হয় আৰু অসৎপাত্ৰত দান কৰিলে ঐহিক সুখ লাভ হয়। তদুপৰি ভৰদ্বাজে সোধা ধৰ্ম সম্বন্ধীয় প্ৰশ্নৰ উত্তৰত ভৃগুৱে কৈছিল যে স্বধৰ্ম পালন কৰিলেই স্বৰ্গ লাভ হয় আৰু চাৰিও আশ্ৰমত পালনীয় ধৰ্ম সম্বন্ধেও এই অধ্যায়টিত আলোচনা কৰা হৈছে। বৰ্ণাশ্ৰমধৰ্ম পালন কৰা সময়ত ব্ৰহ্মচাৰী শিষ্যসকলে পৱিত্ৰভাৱে গুৰুৰ আশ্ৰমত বাস কৰি গুৰুৰ সকলো আজ্ঞা নিৰ্বিবাদে পালন কৰি, পৱিত্ৰ হৈ, অগ্নি-সূৰ্য আদিৰ উপাসনা কৰি বেদ অধ্যয়ন কৰিব লাগে। গৃহস্থাশ্ৰম পালন কৰা গৃহস্থাশ্ৰমীজনে সদাচাৰ সম্পন্ন হৈ ধৰ্ম-অৰ্থ-কাম আদিৰ সুপ্ৰয়োগ কৰি দান-হোম-পূজা আদি অনুষ্ঠিত কৰি কাল যাপন কৰিব লাগে। বানপ্ৰস্থী আশ্ৰমবাসীসকলৰ যিহেতু উপাৰ্জন সম্বল নাথাকে সেয়ে তেওঁলোকক গৃহস্থীজনে অভ্যৰ্থনা কৰি সাদৰ -সম্ভাষণ জনাব লাগে। গৃহস্থী সদায় দানশীল হ'ব লাগে বুলিও এই অধ্যায়ত উল্লেখ কৰা হৈছে। যিখন ঘৰৰ পৰা অতিথি নিৰাশ হৈ উভতি যাব লগা হয় সেই ঘৰখনে অতিথিৰ

সকলো দুষ্কর্মৰ ফলভোগী কৰিব লগীয়া হয়। এই আশ্রম অনুসৰণকাৰীসকলৰ যজ্ঞ অনুষ্ঠানৰ দ্বাৰা দেৱতাসকল, শ্রাদ্ধাদিৰ পৰা পিতৃসকল, বেদাধ্যয়নৰ দ্বাৰা ঋষিসকল আৰু পুত্র উৎপাদনৰ দ্বাৰা প্রজাপতিক সন্তুষ্ট হয়। এই প্রসংগতে কোনো লোকৰ প্রতি কটু বাক্য, নিন্দা বচন আদি প্রয়োগ কৰিব নাপায় বুলিও ভৃগুৱে ব্যক্ত কৰিছে। জীৱিকা নির্বাহৰ বাবে শস্যাদি উৎপাদন কৰাটোও ধর্ম বুলি কোৱা হৈছে। যিলোকে শস্যাদি উৎপাদন কৰি জীৱিকা নির্বাহ কৰে, তেনে লোকৰ সহজতে স্বর্গ লাভ হয় বুলিও ভৃগু মুনিয়ে ব্যক্ত কৰিছে।

এনেধৰণৰ বিভিন্ন নীতি কথা, ধর্মকথা, আখ্যান-উপাখ্যান আদিৰে মহাভাৰত বিশ্বকোষ হিচাপে পৰিগণিত। সেই কাৰণে মহাভাৰত সম্বন্ধে কোৱা হয়— 'মহত্বাদ ভাৰত্বাদ মহাভাৰতমুচ্যতে'। পৰৱর্তী সময়ত এই গ্রন্থখনৰ ওপৰত অসংখ্য কাব্য-মহাকাব্য-নাটক-গল্প-উপন্যাস আদি ৰচিত হৈ ভাৰতীয় সাহিত্যৰ ভঁৰাল চহকী হৈছে। এই ক্ষেত্রত মহাভাৰতৰেই সৌতিৰ এষাৰি বাক্য প্রণিধানযোগ্য —

सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति।
पर्जन्य इव भूतानामक्षयो भारतद्रुमः।। इति।।



३.१४ अध्यायात् किमवगतम्

अध्यायात् वयं निम्नोक्तविषया: ज्ञातवन्त: -

- महाभारतस्यप्रणेता, उत्पत्तिं क्रमविकाशस्य विषये ज्ञातवन्त:।
- महाभारतस्य कथावस्तुविषये ज्ञातवन्त:।
- परवर्तीकालीन संस्कृतसाहित्ये महाभारतस्य प्रभावविषये ज्ञातवन्त:।
- महाभारते सन्निविष्टानां विभिन्नानाम् उपाख्यानां विषये ज्ञातवन्त:।
- महाभारतकालीन: समाजस्य विषये ज्ञातवन्त:।
- महाभारतस्य महत्त्वस्य विषये ज्ञातवन्त:।
- महाभारतस्य रचनाकालस्य विषये ज्ञातवन्त:।
- महाभारतस्य शान्तिपर्वस्य विषये ज्ञातवन्त:।



३.१५ ज्ञानाधिक्यम्

१) Dev Goswami, Haramohan (1st published, 1977 Sanskrit Sahityaz Burcanji, Book Land, Guwakatisth.

२) Sastri, Gourinath, A Concise History of Classical krit Literature, Motilal

Banaiasimes, Delhi, Varanasi.

३) De, S.K. and Dasgupta, Sl. Hirstory of Sanskrit Literature, Vol. 1, Calcutta-1980.

४) Winternitz, M., History of Indian Literature (Eng. The, V. S. Sha), 3 vols, Delhi-1983.

५) Sharma R.S., Advent of the Ateyans in Indian. In India., Manotzar publishers, Delhi, 2003.

६) Sarma, De. Thaneswar, (July, 1995) Sanskrit Sahityar Itivectiva, Chandica Pacakazh, Panbazar, Guwahati-v.

७) दाहालः, आचार्य लोक्मणि (१९९९) संस्कृतसाहित्येतिहासः, कृष्णदास अकादमी, वाराणसी.

८) मिश्र, आचार्य रामचन्द (२००३) संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन, वाराणसी - २२२००१.

९) अग्रवालः, आचार्य हंसराजः (१९८६) संस्कृतसाहित्येतिहासः, चौखम्बा सुरभारतो 'प्रकाशन, वाराणसी.

१०) उपाध्याय, रामजी, संस्कृत निबन्धावलिः, चौखम्बा विद्याभवन, वाराणसी.

११) पाण्डेय, डा. विजय शंकर, पाठकः, डा. जमुना (२०२३), संस्कृत निबन्ध मकरन्द्र, चौखम्बा संस्कृत शशिज आफिस, वाराणसी.

१२) Sharma, Die Ishvar Chandra, and Binali, Dr. O.N. (Edi) Mahabharata (Sanskrit Text) Parimal publications, Delhi.



३.१६ अभ्यासप्रश्नाः

प्रश्नः १: महाभारतस्य रचयिता कः ?

प्रश्नः २: महाभारते कति संख्यकाणिः पर्वाणि सन्ति ?

प्रश्नः ३: महाभारतस्य उत्पत्तिं क्रमविकाशं चाधिकृत्य नातिविस्तरं निबन्धमेकं प्रस्तुयताम्।

प्रश्नः ४: प्राचीन भारतीयवाङ्मये महाभारतस्य प्रभावमधिकृत्य कश्चन प्रबन्धो विरच्यताम्।

प्रश्नः ५: महाभारतस्य शान्तिपर्वे कति संख्यकाणिः उपपर्वाणि सन्ति ?

प्रश्नः ६: महाभारते सन्निविष्टानां विभिन्नानां उपाख्यानानां विषये नातिदीर्घः निबन्धो विरच्यताम्।

प्रश्नः ७: महाभारतकालीन समाजव्यवस्थाविषये प्रबन्धो विरच्यताम्।

प्रश्नः ८: अधोलिखितेषु विषयमवलम्बा प्रबन्धः लिखताम्-

(१) महत्वात् भारत्वाच्च महाभारतमुच्यते।

(२) शाकुन्तल उपाख्यानम्

(३) सावित्रेः उपाखानम्

(४) 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्'।

प्रश्नः ९: महाभारतस्य रचनाकालसम्बन्धे नातिदीर्घो निबन्धो विरच्यताम्।

प्रश्नः १०: महाभारतस्य शान्तिपर्वमधिकृत्य प्रबन्धमेकं प्रस्तुयताम्।

*** ***** ***

अध्यायः ४ : कुमारसम्भवम् (परिचयः)

अध्यायस्य संरचना

४.१ उद्देश्यम्

४.२ परिचयः

४.३ महाकविकालिदासस्य परिचयः

४.४ कुमारसम्भवमहाकाव्यस्य कथावस्तु

- ४.४.१ कुमारसम्भवमहाकाव्यस्य स्रोतः
- ४.४.२ कुमारसम्भवस्य अष्टसर्गाणां सारः
- ४.४.३ कुमारसम्भवमहाकाव्यस्य नामकरणस्य तात्पर्यम्
- ४.४.४ कुमारसम्भवमहाकाव्यस्य टीकायाः विवेचनम्

४.४ चरित्रचित्रणम्

- ४.५.१ समीक्षणम्

४.६ अध्यायस्य असमीया भाषायां सारांशः

४.७ अध्यायात् किमवगतम्

४.८ अग्रगत्याः निरूपणम्

४.९ ज्ञानाधिक्यम्

४.१० अभ्यासप्रश्नाः

४.१ उद्देश्यम्


अस्य अध्यायस्य अध्ययनं कृत्वा वयम् –

- संस्कृतसाहित्यस्य मध्ये महाकाव्यस्य उद्भवः तथा महाकाव्यलक्षणानि ज्ञातुं शक्नुमः।
- कुमारसम्भवस्य ग्रन्थकारः महाकविकालिदासस्य विषये संक्षेपेण ज्ञातुं शक्नुमः।
- कुमारसम्भवस्य विषयवस्तुं तथा प्रथमाष्टसर्गाणां सारम् अवगन्तुं शक्नुमः।
- अनेन अध्यायेन कुमारसम्भवमहाकाव्यस्य मुख्यचरित्राणां तथा रसविचारस्य विषये अपि ज्ञातुं शक्नुमः।

४.२ परिचयः

महाकाव्यस्य आद्यं कदा, कस्मिन् समये, केन वातावरणे च आरभ्यते इति यथार्थेन वक्तुं कष्टमेव; तथापि पण्डिताः मन्यन्ते यत् महाकाव्यस्य उद्गमः प्राचीनवैदिकसाहित्ये एव जाता। ऋग्वेदे संनिहितानि विविधानि सूक्तानि उत्तरकाले नाट्यकाव्यस्य तथा महाकाव्यानां स्रोतः अभवन्। 'काव्य' इत्यस्य अर्थे 'रसमय' इत्येव मुख्यतया गृहीतः। अतः रसमयं वाक्यम् एव काव्यम्। एतत् काव्यम् 'दृश्य' तथा 'श्रव्य' इति द्विविधं विभक्तमस्ति। दृश्यकाव्यं रुपक-उपरुपकादिभेदेषु

विभक्तमस्ति। श्रव्यकाव्यं च पुनः त्रीणि प्रकाराः—पद्यकाव्य, गद्यकाव्यम्, मिश्रकाव्यमिति। पद्यकाव्यं पुनः त्रिषु श्रेणीषु विभक्तम् अस्ति — महाकाव्यम्, खण्डकाव्यम्, मुक्तककाव्यम्। अतः काव्यस्य मुख्यविभागाः एवमस्ति-



संस्कृतसाहित्यस्य आदिकाव्यं 'रामायणम्' इति ख्यातम् अस्ति। संस्कृतालङ्कारिकैः महाकाव्यस्य लक्षणानि विविधरूपेण निरूपितानि सन्ति। तेषु 'साहित्यदर्पण' इति ग्रन्थस्य रचयिता विश्वनाथकविराजः षष्ठपरिच्छेदे महाकाव्यलक्षणानि विशदं वर्णयति। तद्वत् भामहस्य 'काव्यालङ्कारे', राजाभोजस्य 'सरस्वतीकण्ठाभरणे' तथा अग्निपुराणेऽपि महाकाव्यलक्षणानि परिदृश्यते।

विश्वनाथकविराजस्य 'साहित्यदर्पण' अनुसारेण महाकाव्यस्य लक्षणानि इमे सन्ति —

-महाकाव्यं भवितुं पद्यकाव्यं सर्गबन्धात्मकं भवेत्। महाकाव्यस्य सर्गाः न अतिदीर्घाः न अपि अति-सङ्क्षिप्ताः भवन्ति। सामान्यतः अष्टादशात् त्रिंशत् पर्यन्तं सर्गाः सन्ति। महाकाव्यस्य नायकः देवः वा सज्जनवंशे उत्पन्नः क्षत्रियो वा स्यात्। नायकः वीरः च धीर उदात्तगुणयुक्तः भवेत्; कदाचित् तस्य एकस्य एव राजवंशे उत्पन्नत्वं अपि सम्भवति। रसेषु शृङ्गारः, वीरः, शान्तः वा यः कश्चन एकः मुख्यः अंगीरसः भवेत्, अन्ये रसाः अङ्गरूपेण स्थिताः भवन्ति। नाटकवत् महाकाव्येऽपि सर्वे सन्धयः भवन्ति। धर्मः, अर्थः, कामः, मोक्षः इत्येतस्य चतुष्टयस्य प्राप्तिः वर्णनीया भवति। महाकाव्ये दुष्टजनस्य निन्दा तथा सज्जनानां स्तुतिमूलकाः श्लोकाः अपि सन्ति। महाकाव्ये संध्या, सूर्योदयः, रात्रिः, प्रदोषः, मध्याह्नः, मृगया, पर्वतः, ऋतवः, वनम्, उपवनम्, सागरः, सम्भोगः, विप्रलम्भः, मुनयः, स्वर्गः, नगरः, यज्ञः, यात्रा, विरहः, मन्त्रणा, पुत्रजन्म इत्यादीनां वर्णनम् आवश्यकम् अस्ति। महाकाव्यस्य श्लोकाः एकस्मिन् एव छन्दसि रचिताः भवन्ति, तथा अन्ते द्वौ त्रयः वा भिन्नच्छन्दाः अपि श्लोकाः भवन्ति। 'महाकाव्यम् नमस्कारेणात्मकं, आशीर्वचनात्मकं वा वस्तुनिर्देशात्मकं मंगलाचरणेन वा आरभ्यते। महाकाव्यस्य नामाङ्कनं कविनाम्ना, नायकस्य नाम्ना वा प्रसिद्धस्य अन्यस्य पात्रस्य नाम्ना अपि कर्तुं शक्यते। एवं छन्दोमयैः श्लोकैः यदा विस्तृतकथा घटना-प्रतिघटनानां मध्ये परिणतिं प्राप्नोति तदा तदेव महाकाव्यमिति कथयितुं शक्यते। उदाहरणरूपेण — कुमारसम्भवम्, रघुवंशम्, नैषधचरितम् इत्यादि।

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा।।
शृङ्गार वीरशान्तानामेकोऽङ्गी रस इष्यते।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसंधयः।।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।
चत्वारस्तस्य वर्गाः सुत्स्तेम्बेकं फलं भवेत्।।
आदौ नमस्क्रियाशिर्वा वस्तुनिर्देश एव वा।
क्वचिन्निन्दा खलादीनाम् सत्यं च गुणकीर्तनम्।।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।
नातिसल्पा नातिदीर्घाः सर्गा अष्टाधिक इह।।
नानावृत्तमयः कापि सर्गः कश्चन दृश्यते।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।।
संध्यासूर्येन्दुरजनी प्रदोष ध्वान्तवासराः।
प्रातरमध्याह्नमृगया शैलतुवनसागराः।।
संभोग विप्रलम्भौ च मुनि स्वर्गपुराधराः।
रणप्रयाणोपयम मन्त्रपुत्रोदयादयः।।
वर्णनीयाः यथायोगं साङ्गोपाङ्गा अमी इह।
कविवृत्तस्य वा नाम्ना नायकस्येतरस्य वा।।
नामास्य सर्गोपादेयकथया सर्गाणां तु।।

४.३ महाकविः कालिदासस्य परिचयः

महाकविकालिदासेन रचितम् 'कुमारसम्भवम्' संस्कृतमहाकाव्येषु अन्यतमम् अस्ति। कविना रचितम् अन्यं महाकाव्यं 'रघुवंशम्' इति। महाकविकालिदासं कविकुलगुरुः इति मन्यते। पशाश्चात्य पण्डितः सर विलियम् जोन्सः तस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य काव्यिक सौन्दर्येण आकृष्टं सन् तं 'भारतवर्षस्य शेक्सपीयर' इति संज्ञां दत्तवान्। विश्वे ये संस्कृतानुरागिणः सन्ति ते सर्वे कालिदास्य रचनाभिः मुग्धाः। तस्य जीवने तथा आविर्भावकालविषये अद्यापि पण्डितेषु मतभेदाः दृष्टाः। केषां पण्डितानां मतमस्ति यत् तस्य जन्मभूमिः कश्मीरप्रदेशः, अपरेषां मते उज्जयिनी तस्य जन्मभूमिः। तथापि एतानि सर्वाणि मतानि परीक्ष्य इदमवगम्यते यत् तस्य जन्मस्थानं उज्जयिनी। दण्डिनः 'अवन्तीसुन्दरीकथा' ग्रन्थेऽपि तस्य जन्मस्थानम् उल्लिखितम् अस्ति।

'लिप्ता मधुद्रवेणास्य निर्याशा गिरः।
तेनैतद्वर्ज्यं वैदर्भं कालिदासेन शोधितम्।' इति।।

कालिदासः शैवसम्परदायस्य अनुगामी आसीत्। सम्भवतः स उज्जयिन्यां सुप्रसिद्धस्य महाकालमन्दिरे महादेवस्य उपासकः आसीत्। कालिदासः राजा विक्रमादित्यस्य राजसभायाः 'नवरत्ने एकरत्नत्वेन ख्यातिमलभत्।'ज्योतिषविद्याभरण' नामकस्य ज्योतिषग्रन्थेऽपि तस्य नवरत्नताम् उल्लिखितम् अस्ति –

'धन्वन्तरिक्षपणकामरसिंहः शङ्कुबेतालभट्टघटकर्परः कालिदासः।

ख्यातोवराहमिहिरो नृपतिः सभायां रत्नानि वै बररुचिर्नृप विक्रमस्य।' इति।

अर्थात् धन्वन्तरिः, क्षपणकः, अमरसिंहः, शङ्कुः, बेतालभट्टः, घटकर्परः, कालिदासः, वराहमिहिरः, बररुचिः च नवरत्नाः आसन्। एषां पृष्ठपोषकः राजा विक्रमादित्यः आसीत्।

महाकविकालिदासस्य जीवनचरितम्

कालिदासस्य जीवनविषये नैकाः किंवदन्ती प्रचलिताः। केचन मते, कालिदासस्य जन्म ब्राह्मणकुले अभवत्। तस्य षोडशवर्षपर्यन्तं अक्षरज्ञानमपि नासीत्। बाल्ये तस्य मातापित्रोः निधनं सञ्जातम्, अतः कश्चन गवां पालकः तं पालनं कृतवान्। विशेषचातुर्येण सः काचित् विदुषीराजकन्यां परिणीतवान्। ज्ञानहीनत्वेन सः भार्यायाः समीपं लज्जितोऽभवत् इत्यतः स गृहात् निर्गत्य देवी कालिकायाः उपासनां कृत्वा विद्वत्त्वं प्राप्तवान् तथा काव्यप्रतिभया प्रेरितः पुनः गृहे प्रत्यावृत्तः। तस्य भार्या तमेकदा अपृच्छत् – 'अस्ति कश्चिद्वाग्विशेषः'। ततः कथं चिद् कालिदासः भार्यायाः प्रत्येकं शब्दं प्रतीकरूपेण गृहीत्वा काव्यं रचितवान्।'अस्ति' शब्देन (अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयः) 'कुमारसम्भवम्', 'कश्चित्' शब्देन (कश्चित्कान्ता विरहगुरुणा) 'मेघदूतम्', 'वाक्' शब्देन (वागार्थाविव संपृक्तौ) 'रघुवंशम्' तथा 'विशेष' शब्देन (विशेषं सूर्यस्पृहणीयचन्द्रमा) 'ऋतुसंहार' इति नामकानि चत्वारि काव्यानि रचितवान्।

मिराशीरपण्डितस्य मतानुसारेण रघुवंशस्य प्रथमसर्गे महर्षिवशिष्ठाश्रमस्य तथा पञ्चमसर्गे वरतन्तुमुनिकाश्रमस्य तथा अभिज्ञानशाकुन्तलं नाटके कण्वमुनिकाश्रमस्य उल्लेखात् इदं अनुमीयते यत् कालिदासः प्राचीनभारते गुरुकुले अध्ययनं कृतवान्। वेदेषु ब्राह्मणेषु उपनिषद्दर्शनादिषु च तस्य महान् पाण्डित्यं दृष्टव्यमस्ति। शास्त्रेषु यः विज्ञानस्य विस्तारः तस्य परिचयः तस्य कृतिषु अभिव्यक्तः अस्ति। तदन्यत्, ज्योतिष–धनुर्वेद–आयुर्वेद–सङ्गीतं–चित्रकला प्रभृतिविषयेषु गम्भीरज्ञानस्य परिचयः प्राप्तुम् शक्यते। इतिहासे, भूगोलशास्त्रे, तथा काव्यशास्त्रे च अपि तस्य प्रवीणतां दृष्टुं शक्यते।

आविर्भावकालः

कालिदासस्य आविर्भावकालस्य विषये पण्डितानां मध्ये मतभेदः दृश्यते।

१. जर्मनपण्डितमेक्समूलर, डॉ. हार्णली, डॉ. रामकृष्णभाण्डारकरः, रामावतारशर्मा, विजयचन्द्रमजुमदार, तथा महामहोपाध्यायः वासुदेवविष्णुमिराशि प्रभृतयः विद्वत्जनाः मन्यन्ते, कालिदासः गुप्तयुगीनः आसीत्। श्रीचिन्तामणिविनायकवैद्यः, शिवरामआप्टेः पण्डितः सतीशचन्द्रचट्टोपाध्याय, चन्द्रशेखरपाण्डेयः, पण्डितबलदेवउपाध्यायः प्रभृतिविद्वद्भिः प्रथमशताब्द्यां ईसापूर्वे तस्य स्थितिकालं स्वीक्रियते।

२. चीनदेशीयः पर्यटकाश्रियः ह्युएनत्पाङ् (६१९-६४५ ईसवी) भारतयात्रायां मालव (मोपोला) देशस्य राजा शीलादित्यस्य राजत्वकालं ५३०-५८० ईसवी यथा निर्दिष्टवान्। कल्हणस्य 'राजतरङ्गिणी' इति ग्रन्थे राजा विक्रमादित्यस्य एवं तस्य सभाकविः मातृगुप्तस्य उल्लेखः अस्ति, तस्मात् शीलादित्यः तथा विक्रमादित्यः एक एव पुरुषः इति प्रतीयते। मालवराजा यशोवर्मा अपि शीलादित्य इत्यभिधानं प्राप्तवान्। कल्हणस्य उल्लेखानुसारं विक्रमादित्यः कश्मीरसिंहासने अधिष्ठितः भानुगुप्त एव इति प्रतिपाद्यते। यशोवर्मण नाम्ना प्रसिद्ध 'सेतुबन्ध' इति प्राकृतमहाकाव्यं विक्रमादित्यस्य आज्ञायाः अनुसारं कालिदासेन विरचितम् इति प्रतिपाद्यते। तथापि पण्डिताः एतत् मतं न स्वीकुर्वन्ति। ह्युएनत्पाङस्य शीलादित्यः अध्यापकसिल्वनलेवी मतेन बलवीरश्च शीलादित्य एव इति निश्चितः। यदि 'राजतरङ्गिणी' अनुयायं यशोवर्मा एव विक्रमादित्यः अस्ति, तर्हि तं 'राजाधिराज' इति अभिलिखितम् उचितम्। विक्रमादित्यस्य आज्ञायाम् अनुसारेण कालिदासेन प्रवरसेनस्य सेतुबन्धकाव्यम् एव रचितम् इति अनुकूल्यम्। भानुगुप्तः कालिदासः न अस्ति इति विविधाः प्रमाणानि दृष्टानि सन्ति।

३. फ्रेंचपण्डितहिपोलिटेफाउचेतस्य अनुसारेण, 'रघुवंशम्' इति महाकाव्ये वर्णितं रघुवंशीयराजा अग्निवर्णस्य निधनात् पत्न्याः गर्भे पुत्रजन्मं भवति। अग्निवर्णस्य समये एव कालिदासः आविर्भूतः, कारणं काव्ये अग्निवर्णपुत्रस्य वर्णना समाप्तिरूपेण कृतवान्। पण्डितफाउचेतानुसारेण, ८म शताब्द्याम् अग्निवर्णस्य मरणं तथा तस्य पुत्रोऽजायत् इति, तदनुसारं कालिदासस्य कालः सप्तमशताब्दात् पूर्वम् भवति।

४. महाकविः कालिदासः 'मालविकाग्निमित्रम्' नामकनाटकस्य प्रस्तावनायां महाकविभासस्य नामोपलक्षणं कृतवान् — 'प्रथितयशसां भाससौमिल्लककविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकविः कालिदासस्य कृतिं इमाम् दृष्टुं कथं परिषदो बहुमानः।'
'भासस्य प्रभावः कालिदासेऽपि विद्यते' इति पण्डितैः अनुमोदितम् अस्ति। ए.बी. पुषलकारस्य मते भासस्य आविर्भावकालः प्रथमशताब्दी तथा कालिदासस्य चतुर्थशताब्दी इति निर्णीतम् अस्ति।

५. बहवः पण्डिताः कालिदासस्य आविर्भावः गुप्तयुगस्य साक्षात् मन्यन्ते। तैः कालिदासस्य कालस्य सीमा द्वयं निर्दिष्टम्। सप्तमशतकस्य गद्यकाव्यकारः बाणभट्टः तथा द्वितीयः पुलकेशीः अयहोळ्शासनम् (६१४ ईसवी) कालिदासं सप्तमशतकात् पूर्वकालीनं इति प्रकटयति। तथैव मन्दसराभिलेखस्य (४७३ ईसवी) सहायतया कालिदासकालं निर्णीतुं शक्यते। उक्त अभिलेखस्य कर्त्ता वत्पभट्टः कालिदासस्य 'मेघदूतस्य' श्लोकमपि अनुकरणं कृतवान्। तेन कालिदासः ४५० ईसवीपूर्वकालीनः इति प्रतिपादितः।

६. कालिदासस्य 'मालविकाग्निमित्रम्' नाटकस्य त्रयचरित्रा पुष्यमित्रः, अग्निमित्रः तथा वसुमित्रः शुङ्गवंशीय ऐतिहासिकपुरुषरूपेण अंकिताः। शुङ्गवंशस्य राजा खीष्टपूर्वे ७३ सम्बत्परपर्यन्तं शताधिककालं राजत्वं कृतवन्तः। तेन कालिदासस्य कालः द्वितीयशतकः

स्वीकृतम् अस्ति।

७. मेक्समूलरः मेघदूते दिनांगं तथा निचुलः नामद्वयं संज्ञानि इति निर्दिष्टवान्। तस्य मते दिनाङ्गं आसीत् आसङ्गस्य शिष्यः, तथा एषः षष्ठशतकस्य विद्वान् अस्ति। अतः, कालिदासस्य कालोऽपि षष्ठशतके सन्निहितः। किन्तु, कीथः एतदनुमानं अस्वीकरोति। तेन कालिदासस्य समयः चतुर्थशतकः इति निर्दिष्टः।

कालिदासस्य आविर्भावकालस्य विषये पण्डिताः विभिन्नानि अभिप्रायाणि धृतवन्तः, तथा अधिकांशैः गुप्तयुगीनः इति निश्चितुमाशङ्कते। किन्तु प्रयागसमीपे 'भीटा' नामकस्मिन् स्थले मृण्मयपदकं लब्धं, यत्र कालिदासस्य 'अभिज्ञानशाकुन्तलम्' नाटकस्य प्रथमाङ्कस्य दृश्यस्य अङ्कनं दृष्टम्। ऐतिहासिकदृष्ट्या एतत् शुङ्गकालीनम् इति निरूपितम् अस्ति। तस्मात् कालिदासस्य समयः ख्रीष्टपूर्वे प्रथमशताब्दस्य इत्येव निश्चितम्। एवं कालिदासस्य आविर्भावकालः प्रथमशताब्दः इति निर्णीतः।

कालिदासकृतिनां संकलनम्-

कालिदासस्य रचनासु प्रसिद्धाः बहवः ग्रन्थाः दृश्यन्ते, तथापि पण्डिताः सप्त ग्रन्थान् एव कालिदासकृतयः इति निश्चितं मन्यन्ते। तदिदं सप्तकं यथा -

महाकाव्यम्-

क) कुमारसम्भवम्

ख) रघुवंशम्

खण्डकाव्यम्-

ग) मेघदूतम्

घ) ऋतुसंहारः

नाटकम्-

ङ) मालविकाग्निमित्रम्

च) विक्रमोर्वशीयम्

छ) अभिज्ञानशाकुन्तलम्

४.४ कुमारसम्भवम् महाकाव्यस्य कथाः

महाकविकालिदासेन रचितं कुमारसम्भवमहाकाव्यम् पंञ्चमहाकाव्येषु अन्तर्भूतम् अस्ति। रघुवंशमहाकाव्यमपि एतेषु गण्यते। कुमारसम्भवमहाकाव्यं सप्तदशसर्गेषु विभक्तम् अस्ति। पण्डिताः प्रायः प्रथमसर्गात् आरभ्य अष्टमसर्गपर्यन्तं सर्गान् एव कालिदासस्य कृतिः इति वदन्ति। यतोहि अष्टसर्गानां काव्यिकसौन्दर्यं अवशिष्टेभ्यः(नवमसर्गात् सप्तदशसर्गपर्यन्तं) सर्गेभ्योः अपेक्षया उत्कृष्टा अस्ति। प्रसिद्धविद्वान् आर.डी.कर्मकारः मन्यते यत् सम्पूर्णं महाकाव्यं कालिदासस्य एव रचना।

कुमारसम्भवस्य कुथावस्तुः

'कुमारसम्भव' इति शब्दस्य अर्थः कुमारस्य सम्भवः, कुमारः अर्थात् कार्त्तिकेयस्य

कु कु

जन्मकथा। कुमारसम्भवमहाकाव्यस्य प्रमुखः विषयः तारकासुरस्य वधाय कार्त्तिकेयस्य जन्मकथा अस्ति। तारकासुरस्य आतङ्केन पीडिताः देवगणाः ब्रह्मणः समीपं गच्छन्ति। ब्रह्मा उपदिशति यत् शिवपार्वत्योः संयोगेन उत्पाद्यमानः पुत्रः एव तारकासुरं हन्तुं समर्थःअस्ति। अद्यापि शिवः योगसमाधिस्थः अस्ति, तथा च हिमालयस्य कन्या पार्वती शिवं श्रद्धापूर्वकं सेवते। यदि शिवः पार्वत्या सह संयोगं प्राप्तवान् तर्हि कस्यचित् पुत्रस्य जन्मं भवेत्। तयोः पुत्र एव तारकासुरं जितुं सामर्थ्यम्। एतत् श्रुत्वा देवराजः इन्द्रः सभां संयोजयति, तत्र मन्मथं (कामदेवम्) आह्वयति। शिवपार्वत्योः संयोगार्थं कामदेवः वसन्तेण सह शिवस्य तपस्थानं गच्छति। वसन्तस्य प्रभावेन अचलवसन्तं निर्माय, कामदेवः शिवः पार्वतीं प्रति आकर्षयितुं प्रयतते। शिवस्य ध्यानं भङ्गमाप्नोति, तथा च कामदेवस्य कार्यं दृष्ट्वा क्रोधेन कपालस्थ तृतीयनेत्रेण अग्निं सृजति, येन कामः भस्मीकृतः। पतिविहीना रतिः विलपन्ती दयार्द्रं भावं पार्वत्या अन्तरे जागरयति। पार्वती अपि तदा योगसमाधिस्थं शिवं स्वकलेन आकर्षयितुं असमर्था इति ज्ञात्वा तस्य प्राप्त्यर्थं कठोरं तपः आरभते। पार्वत्याः तपसि तुष्टः शिवः ब्राह्मणवेषं धृत्वा पार्वत्याः परीक्षां करोति, तां विजयिनीं ज्ञात्वा स्वं रूपं दर्शयति। ततः शिवः सप्तर्षिभिः सह हिमालयं प्रति प्रेषयति पाणिग्रहणार्थं प्रार्थयितुं। हिमालयः सविनयम् आत्मजां पार्वतीं शिवाय दत्त्वा मोदेन परिपूरितो भवति। शिवपार्वत्योः संयोगेन तस्मिन् क्षेत्रे कार्तिकेयस्य जन्मनः सम्भावना अपि दृष्टा। एषा कथा कालिदासेन अष्टसर्गेषु विभक्ता। तदनन्तरं नवमसर्गात् सप्तदशसर्गपर्यन्तम् कियन्तः विषयाः दृश्यन्ते। विवाहानन्तरं शिवपार्वत्योः दीर्घकालीनं समयं यथा तथोपभोगे यापयतः इति देवगणाः खिन्नाः भवन्ति। अग्निदेवः कपोतस्य रूपं धृत्वा शिवपार्वत्योः संयोगस्थानं गच्छति। शिवः क्रोधेन अग्निं सम्प्रतिष्ठते, तथापि अग्निः देवगणानां याचनां स्वीकृत्य तत्र आगतः इति निवेदनं कृत्वा प्रसादं प्राप्तवान्। शिवः ततः स्वतेजो अग्नौ निक्षिप्तवान्। अग्निः तं तेजः धर्तुं असमर्थः इन्द्राय निवेदयति, इन्द्रः च गङ्गायाः समीपे तत् तेजः निक्षेपयितुम् उपदिशति। गङ्गा अपि असमर्था स तेजो वहन्तुं कृत्वाः गर्भे तं तेजो निहितं च। कृतिका अपि ततः गर्भवती जाता। पुत्रः गर्भभारं सहितुं असमर्थाः तं त्यक्त्वा गच्छन्ति। ततः शिवपार्वत्योः दृष्टिः तस्मिन् बाले पतिता, शिवः तं स्वतेजोः उत्पन्नं इति ज्ञात्वा आलिङ्गति। सः कुमारः नाम्ना प्रसिद्धः, सहस्त्रशस्त्रविद्यायां निपुणः। इन्द्रस्य याचनया शिवः तं सेनापतित्वेन स्थापितवान्। कुमारः तारकासुरं युद्धे निहत्य देवानां भयाद् मोचितवान्।

४.४.१ कुमारसम्भवम् महाकाव्यस्य स्त्रोतः

शिवपार्वत्योः परिणयकथा पुराणस्मृतिग्रन्थेषु परिलक्ष्यते। अस्याः कथायाः संक्षिप्तरूपं ब्रह्मपुराणे, कालिकापुराणे, शिवपुराणे च प्रातुम् शक्यते। शिवपुराणे तु कथा अतीव विस्तीर्णा दृश्यते। तथापि, रामायणात् अपि महाकविः कालिदासः कथावस्तुं स्वीकृतवान् इति पण्डिताःस्वीकुर्वन्ति, यतः कुमारसम्भवे कतिपयः विषयाः रामायणीयाः इव प्रतीताः। यथा–

१) तपोवनस्य वसन्तागमनम्।

२) कुमारसम्भवे रत्याः विलापः रामायणस्य बालिनः मृत्योः अनन्तरं तारायाः विलापेन तुलनीयः।

३) तारकासुरस्य आख्यानम्।

किन्तु विन्टरनिटस् इति विद्वान् उक्तवान् यत् 'स्कन्दपुराणं' कवेः आदर्शः आसीत्। स्कन्दपुराणस्य 'शङ्करसंहिता' नामके 'शिवरहस्य' इत्यस्मिन् भागे च कुमारसम्भवेन सह अत्यन्तं साम्यं दृश्यते। 'कुमारसम्भवस्य' प्रथमसर्गात् आरभ्य सप्तमसर्गपर्यन्तं शिवरहस्यम् आधारीकृत्य एव रचितम् इति। वाल्मीकिना रचितस्य रामायणस्य बालकाण्डात् एकः श्लोकः उद्धृत्य कालिदासेन 'कुमारसम्भवम्' इति काव्यस्य नामकरणं कृतमिति अनुमितिः संगता इति पण्डिताः वदन्ति। श्लोकः एवम् अस्ति - एष ते राम गङ्गायाः विस्तरोऽभिहितो मया। कुमारसम्भवश्चैव धन्यः पुण्यस्तथैव च।। रामायणम् १.३७.३१.

'कुमारसम्भवम्' महाकाव्यस्य स्त्रोत सम्बन्धे पण्डितानां मध्ये मतभेदः अस्ति। तथापि, कालिदासः कुमारसम्भवस्य कथांशे स्वकीयं कौशलं योजितवान्।

४.४.२ कुमारसम्भवस्य अष्टसर्गाणां सारांशः

'कुमारसम्भवम्' महाकाव्यस्य प्रथमाष्टसर्गाणां सारांशः संक्षेपेण प्रस्तूयते।

प्रथमः सर्गः

प्रथमसर्गे षष्टिः श्लोकाः सन्ति। अस्मिन् सर्गे हिमालयस्य वर्णनं, मेनासह विवाहः, सतीदेहत्यागेन पार्वतीजननं, हिमालये शिवस्य तपस्यायाः वर्णनं, पित्रोपदेशेन पार्वत्याः तपस्याचरणादिकं वर्णितम्। महाकाव्यस्य आरम्भे कविना हिमालयस्य वर्णनेन माङ्गलिकश्लोकपाठः कृतः -

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरो तयोर्निधीवगाह्यः, स्थितः पृथिव्यैव मानदण्डः॥ १॥

अस्यां उत्तरदिशि देवात्मा हिमालयो नाम पर्वतानां राजा स्थितः। स हिमालयो देवतास्वरूपः पूर्वेण पश्चिमेन च सागरौ प्रविश्य स्थितः। पृथिव्याः विस्तारनिर्णयाय मानदण्डवत् इत्यर्थः। हिमालयं वत्सरूपेण कल्पयित्वा अन्ये पर्वताः गो-रूपेण भूमेः दोहनं कृतवन्तः, येन बहूनि उज्ज्वलरत्नानि महौषधयश्च प्राप्यन्ते स्म। दोहनदक्षः मेरुः पर्वतः दोहनकर्ता अभवत्। पृथुः अस्मिन् दोहने उपदेशं कृतवान्। हिमालयो अन्धकारं दिवसप्रकाशात् भयभीतो गुहायाम् अधः स्थापयति। शरणागतस्य सज्जनस्य रक्षणे हिते च, हिमालये स्निग्धः समीरणो गङ्गातोयकणान् देवदारुवृक्षान् स्पृष्ट्वा विक्षिपति। तत्र मयूरपिच्छानि विस्तारितानि शोभाम् आदधति। समीरणे कृतकिलोलाः किराता मनोरञ्जनं कुर्वन्ति। मञ्चस्य सर्वे यत्र उपकरणानि प्राप्यन्ते तस्य हिमालयः स्त्रोतः। पृथिव्याः भारं धारयितुम् अपि आवश्यकं यत् सामर्थ्यं तत् अपि हिमालयस्य अस्ति। प्रजापतिदक्षस्य

मुखात् पतिनिन्दां श्रुत्वा अग्नौ प्रवेशं कृतवती। सा एव सती हिमालयस्य कन्यारूपेण मेनायाः गर्भे पुनः जन्म गृहीता। शोभायुक्तया ज्योतिषा यथा दीपं दीप्यते, मन्दाकिन्याः स्पर्शेन स्वर्गः यथा पवित्रं भवति, तथा पार्वत्या हिमालयः शोभायुक्तः, पवित्रः, विभूषितश्च अभवत्। पित्रा हिमालयेन सा 'पार्वती' इति नाम्ना संबोधिता, यत् सा पर्वतस्य कन्या। महादेवं पतिरूपेण प्राप्तुम् पार्वती तपस्यां कर्तुम् उद्यतवती, तस्याः माता 'उ मा' इति पुनः पुनः प्रतिषेधं कृतवती, अनेन 'उमा' इति नामं तस्याः प्रसिध्यमानम् अभवत्।

द्वितीयः सर्गः

द्वितीयसर्गे देवेभिः ब्रह्मणः स्तुतिः, तारकासुरस्य उत्पीड़नकथा, ब्रह्मणः निर्देशेन असुरनिधनाय उपायश्च वर्ण्यते। अस्मिन्सर्गे चतुःषष्टिः श्लोकाः सन्ति। तारकासुरेण देवान् पराभूतान् कृतवान्। देवानां मालिन्यपूर्णमुखान् दृष्ट्वा चतुर्मुखः ब्रह्मा समुपस्थितः। देवेभ्यः स्तुतिः प्राप्ता। ततः ब्रह्मणा देवानां मुखात् ज्ञातं यत् 'तारक' नामकः कश्चन महासुरः ब्रह्मणः वरदानप्राप्तिः। स एव धूमकेतुवत् जगताम् उत्पातकारणं वर्तते। चन्द्रमाः अपि तं षोडशकलाभिः सेवते, केवलं शिवस्य शीर्षस्थितं अन्तिमं चन्द्रांशुम् स्पर्शयितुं न शक्तवान्। ऋतवः अपि, या क्रमशः प्राप्त्या पूजनं कुर्वन्ति, सन् एकवेलायां पुष्पसमर्पणेन उद्यानपालवत् तारकासुरं सेवन्ते। यज्ञकर्मणः यत् हविः संचितं तत् अपि तारकासुरेण अपहृतम्। ततोऽनन्तरं इन्द्रस्य वज्रायुधमपि तारकासुरस्य कण्ठच्छेदनाय प्रयुक्तं, तथापि वज्रं तस्य कण्ठे हारवत् शोभायमानं बभूव। असुरस्य गजेन इन्द्रस्य ऐरावतहस्तिम् अपि पराजितम् एतस्मात् कारणादेव देवेन्द्रः तम् असुरं हन्तुं सक्षमं सेनापतिं प्रार्थयते यः तारकासुरं पराजयेत् तथा राजलक्ष्मी पुनः स्वकीयं स्थानं प्राप्नोति। एवं देवेभिः तारकासुरस्य विविधोत्पातानां कथाः ब्रह्मणः पुरतः निवेदिताः। तदनन्तरं ब्रह्मा देववृन्दं प्रति उक्तवान् — 'स युद्धे अत्यन्तकुशलं यस्मिन् देवे ते असुरं हन्तुं समर्थं न स्यात्, केवलं महेश्वरस्य वीर्यमेव तं असुरं पराजितुं समर्थं। शिवः तमो गुणं विहाय परमज्योतिः स्थितिमुपगतः, तस्य प्रभावं विष्णोरन्यः कश्चिदपि न जानाति। तस्मात् तं समाधिस्थं महादेवं पार्वत्याः सौन्दर्येण आकृष्टुं प्रयत्नं कर्तव्यम्, यतः शिवस्य वीर्यं धारयितुं केवलं पार्वती एव समर्था अस्ति।' एवं उक्त्वा ब्रह्मा अन्तर्धानम् अभवत्। ततः देवराज इन्द्रः महेश्वरस्य ध्यानभंगाय मदनं तथा वसन्तं स्तुतवान्। अस्य द्वितीयसर्गस्य नामः 'ब्रह्मसाक्षात्कारः' इति ख्यातः अस्ति।

तृतीयः सर्गः

तृतीयसर्गे सप्तसप्ततिः श्लोकाः सन्ति। अस्मिन् सर्गे देवराजेन्द्रेण मदनस्य नियोगः, रुद्रस्य तपोवने अकालवसन्तस्य आगमनः, पार्वत्याः शिवसेवायां नियुक्तिः, तथा मदनस्य भस्मीकरणं इत्येतानि वर्ण्यन्ते। देवराजेन्द्रेण कामदेवः नियुक्तः यत् सः तपस्स्थं महादेवं विचलयेत्, तथा हिमालयस्य कन्यां पार्वतीं प्रति आकर्षयेत्। इन्द्रस्य आदेशान् अनुसरन्, मदनः वसन्तं सहायं कर्तुं, पत्नी रति संगेन महादेवस्य तपोवनं प्राप्नोत्। ततः अत्र

अकालवसन्तस्य आगमनं बभूव। तदा तपस्संलिनस्य महादेवस्य भयङ्करं रूपं दृष्ट्वा, मदनः किंकर्तव्यविमूढः अभवत्। तस्मिन् समये, शिवसेवायाम् व्यग्रं पार्वतीं दृष्ट्वा, मदनः तस्याः सौन्दर्येण प्रेरितः, महादेवस्य तपोविघ्नाय प्रयत्नं कृतवान्। ततः सः पुष्पधनुषः पुष्पबाणं महादेवाय प्रक्षिप्तवान्। परमात्मानं चिन्तासमाधौ स्थितं महादेवं बाणप्रयोगेण तस्य हृदयमाक्रान्तं कृतम्। ततः शिवाय ज्ञातं यत् सः मदनेन स्वधैर्यं विचालितः। क्रोधेन ज्वलन्, सः तस्य ललाटस्थं तृतीयनेत्रं प्रस्फुरितं कृत्वा, तस्मात् एकः उग्रज्योतिः निर्गत्य कामदेवं भस्मीभूतं कृतवान्। अनुगता रतिः अस्याः पतिस्यान्तः अकस्माद् अयं विक्रमः दृष्ट्वा मूर्छिताबभूव। पार्वती अपि एतादृशं चमत्कारं दृष्ट्वा विषण्णा अभवत्, तथा पितुः हिमालयं प्रति प्रतिनिवृत्ता। अनेनैव तृतीयसर्गस्य समाप्तिः अभवत्। अयं सर्ग 'मदनभस्म' अथवा 'कामदहन' इति नाम्ना प्रसिद्धः।

चतुर्थः सर्गः

चतुर्थसर्गे षट्चत्वारिंशत् श्लोकाः सन्ति। अस्मिन्सर्गे रत्याः विलापः, पतिसहचर्याय सहमरणे तस्याः प्रार्थना च वर्ण्यते। एषः सर्गः 'रतिविलापः' इति कथ्यते। शिवेन भस्मीभूतस्य मदनस्य पत्न्याः रत्याः विलापेन सर्गोऽयम् आरब्धः। बहूनि दिनानि विलप्य, रतिः वसन्तं प्रति उवाच — 'त्वं चितां सज्जां कुरु, पतिस्यान्ते मया जीवितुं न इच्छामि।' चितायाः सज्जीकरणे प्रवृत्ते, तदा दैववाणी श्रूयते — 'तव पतिसंयोगविरहः केवलं क्षणस्थायी। पार्वत्याः अनुग्रहात् शिवः त्वं पुनः पतिसंयोगं प्राप्तुं समर्था भविष्यसि।' एवं प्रारब्धा रत्याः पतिप्रतीक्षा।

पञ्चमः सर्गः

पञ्चमसर्गः 'तपःफलोदयः' इति कथ्यते। अस्मिन् सर्गे उमाया तपस्या, उमाया सह शिवस्य छद्मवेशे संवादः, तथा अन्ते चन्द्रशेखरशिवस्य आत्मप्रकाशनं वर्ण्यते। अस्मिन्सर्गे षट्चत्वारिंशत् श्लोकाः सन्ति। अस्मिन्सर्गे पितुः अनुमतिं प्राप्य, पार्वती स्वसखीभिः सह हिमालयस्य उच्चशिखरं प्रति गता। आरब्धा तस्याः कठोरतपस्या कथा। बाह्यरूपेण महादेवं आकर्षयितुं न समर्था सा, अतः तपसा तस्य हृदयमेव जयितुं दृढं संकल्पं कृतवती। शिवमेव पतिरूपेण प्राप्स्येति निश्चयेन, पित्रोः अनुमतिं प्राप्तवती सा एकान्ते गिरिशिखरं प्रति निर्गता। तत्र पार्वती अतिशीतं, तीव्रग्रीष्मं, अनशनं च सह्यमाना नित्यं तपश्चरणं कृतवती। या पूर्वं पुष्पाघातमपि न सहते स्म, सा भूमौ शय्यां करोति। कदाचित् सर्वतो मुखे अग्निं ज्वालयित्वा, उर्ध्वे स्थितं सूर्यं च निरीक्ष्य अनिमेषदृष्टया तं पश्यति। शीतकाले जलं प्राप्य, गर्दभ्यं स्थितं धारणं च करोति, वर्षासमये धारासारवृष्टेः मध्ये स्थित्वा धैर्यं वर्धयति। एवं कृतनिष्ठायाः पार्वत्याः कठोरतपसाम् अतिसन्तुष्टः महादेवः ब्रह्मचारीवेषेण तां पुरतः साक्षात् अभवत्। स तस्या तपस्यायाः प्रयोजनं पृष्टवान्। अनेकविधैः परीक्षितवान्। परन्तु प्रश्नैः विघ्नं सहनं न शक्नुवन्ती पार्वती, शिवेण तत्रैव स्थिरीकृता। ततः शिवेन तया विजयप्राप्तिः जाता। पुनरपि शिवं पतिरूपेण प्राप्तुम् अनुमतिं

पितुः गृहीतुं निवेदनं कृतवती। एवं पञ्चमसर्गः समाप्तः।

षष्ठः सर्गः

कुमारसम्भवस्य षष्ठः सर्गः 'उमा-प्रदानम्' इति प्रसिद्धः। अस्मिन् सर्गे पञ्चनवतिशत-श्लोकाः सन्ति, यत्र सप्तर्षीणां वर्णनं, तेषां शिव-स्तुति, शिवस्य पार्वत्याः सह विवाह-प्रस्तावः तथा हिमालयस्य अनुमोदनम् च प्रतिपाद्यते। कदाचित् पार्वती स्वसखीमुखेन शिवस्य समीपे निवेदनं कृतवती। तया इदम् अभिलषितं यत् तस्य पिता ताम् शिवाय सम्प्रदानस्य प्रबन्धनं कुर्यात्। शिवः तत् सम्भावनीयमिति प्रत्यजिज्ञापयत्। महादेवः ततः सप्तर्षीन् स्मृतवान्। तत्क्षणादेव सप्तर्षयः शिवस्य समीपे आगताः। ते सप्तर्षयः मारिचिः, अत्रिः, अङ्गिराः, पुलहः, पुलस्त्यः, क्रतुः, वशिष्ठश्च। वशिष्ठपत्नी अरुन्धती अपि तत्रासीत्। शिवस्य आदेशानुसारेण सप्तर्षयः हिमालयस्य समीपं गताः शिव-पार्वत्योः विवाह-प्रस्तावं समर्पयन्तः। हिमालयः हर्षेण अनुमतिं दत्तवान्। स पिताः कन्यां सप्तर्षीणां सम्मुखं नीत्वा उवाच, 'अद्य तव महादेवाय दानं प्रतिदत्तवानस्मि।' तदा पार्वती सप्तर्षीः प्रणनाम्।

सप्तमः सर्गः

सप्तमे सर्गे शिव-पार्वत्योः विवाह-कथनं विस्तरेण वर्णितम् अस्ति। अस्मिन् सर्गे पञ्चनवतिशत-श्लोकाः सन्ति। हिमालयः विवाहस्य शुभलग्नं ज्ञातुम् इच्छति स्म। सप्तर्षयः आवेदयामासुः यत् र्त्यहात् परं चतुर्थे दिने शुभलघ्नः भविष्यति। ततः सन्दर्भे हिमालये कैलाशे च उत्पवस्य आयोजनं प्रारब्धम्। महादेवः विवाह-वेषेण अलङ्कृतः अभवत्। केवलं स एव न, अपितु वृषभः अपि व्याघ्रचर्मणि संवेष्टितः कृतः। वृषभ-आरूढः शङ्करः अग्रे अग्रे प्रचलितः, तस्य पृष्ठतः अष्टमातृकाः चलन्ति स्म, अनन्तरं कृष्णवर्णा महाकाली अपि आगच्छत्। वरयात्रायाम् अग्रे सर्वेषां मध्ये शिवस्य अनुचरवर्गः प्रथमं स्थितः। शिवः सप्तर्षीणां प्रति उक्तवान् यत् अत्र सप्तर्षयः पौराहित्यं करिष्यन्ति। गन्धर्वाणां कण्ठे शिवस्य प्रशंसास्तुतयः श्रूयमाणा आसन्। वरयात्रा समारम्भिता। हिमालयस्य 'औषधिप्रस्थ' नगरस्य प्रतिमार्गं पुष्पाणि विकीर्यन्ते स्म। स्वयम् हिमालयः स्वागतार्थम् उपस्थितः अभवत्। पुष्प-मार्गेण शिवः एकस्मिन् सुरम्ये मन्दिरे प्रवेशः कृतवान्। शास्त्रीय-विधिना विवाह-मङ्गलं समारम्भितम्। पार्वती मनसि सौम्यभावेन उपविष्टा अभवद्। शिवः ध्रुव-नक्षत्र-दर्शनार्थं पार्वतीं प्रति अवदत् - 'ध्रुवं नक्षत्रं पश्य'। तदा पार्वती अस्फुट-मधुर-कण्ठेन प्रत्यवदत् - 'पश्यामि'। ततः सा शिवस्य मुखं निरीक्ष्य आसीत्।

अष्टमः सर्गः

अष्टमे सर्गे मुख्यतः शिव-पार्वत्योः विवाहानन्तर-कथायाः निरूपणं कृतम् अस्ति। अस्मिन् सर्गे एकनवतिशत-श्लोकाः सन्ति। पार्वती इदानीं तस्मिन्नवस्थायां नास्ति यत्र सा तपस्विनी आसीत्। बहुकालस्य साधनया सा स्वाराध्यं देवं पतिरूपेण प्राप्तवती। प्रथम-संयोगस्य स आनन्दमयः समयः रोमाञ्च-सहितं गतिं प्राप्नोत्। मासं

यावत् औषधिप्रस्थ-नगरे कालं यापयित्वा, पार्वत्या सह शिवः विचित्रेषु प्रदेशेषु भ्रमति स्म। तद्विषयाः मेरुः, कैलाशः मन्दरः, मलयः इत्यादयः पर्वताः आसन्। एवं परम-आनन्देन शिव-पार्वत्योः कालः गमनं करोति स्म। पार्वत्याः तद्विशेषं परम-प्राप्तिरूपेण विद्यमानम् अभवत्।

४.४.३ कुमारसम्भवमहाकाव्यस्य नामकरणस्य तात्पर्यम्

महाकविकालिदासेन 'कुमारसम्भवम्' इत्यस्य महाकाव्यस्य नामकरणं काव्यस्य मुख्यवस्तुनिर्देशेन कृतम्। शिवपार्वत्योः संयोगेन कुमारस्य वा कार्तिकेयस्य जन्म संकेतितः अस्ति। 'कुमारस्य सम्भवः' (उत्पत्तिः)। कुमारः वा कार्तिकेय एव देवसेनापतिः। तारकासुरवधाय देवसेनापतिं प्राप्य एव काव्यस्य मुख्यवस्तु प्राप्तम्। तारकासुरस्य अत्याचारैः त्रस्ताः भयाकुलाः असहायः देवताः विपदः परिहाराय ब्रह्मणः समीपे प्रार्थनाम् अकुर्वन्। तदा ब्रह्मा देवसेनापतेः विषये न्यवेदयत् यः शिवपार्वत्योः पुत्रः जायते स एव तारकासुरं हन्तुं शक्नोति। एतां प्रार्थनाम् पूरयितुं पार्वती हिमालयस्य कन्यारूपेण जन्म अधिगच्छति। तत्र हिमालये कठोरतपस्यायां रतः महादेवः पार्वत्याः आकर्षणाय प्रयत्नितः अस्ति। अन्ततः शिवपार्वत्योः संयोगः सिध्यति। ततः फलरूपेण देवसेनापतिः कार्तिकेयः जायते। अतः महाकविकालिदासेन नायकस्य नाम्ना काव्यस्य नाम 'कुमारसम्भवम्' इति निर्दिष्टं युक्तम्।

४.४.४ कुमारस्भव महाकाव्यस्य टीका

कुमारसम्भवमहाकाव्यस्य मुख्यः टीकाकारः मल्लिनाथ इति। मल्लिनाथः अष्टसर्गपर्यन्तं टीकां रचितवान्। कुमारसम्भवमहाकाव्ये प्रायः ३० टीकाः उपलब्धाः सन्ति। तासु पञ्चविंशतिटीकाकाराणाम् एव नामानि ज्ञायन्ते। टीकाकारेषु सर्वातिप्रसिद्धः मल्लिनाथः। तस्य कृतायाः टीकायाः नाम 'सञ्जीविनी' इति। अपरम् अन्ये टीकाकाराः - हेमाद्रिः, चरित्रवर्द्धनः, वल्लभः, दिनकरः, भरतसेनः, अरुणगिरिनाथः, नारायणः, सुमति विजयः, विजयगणिः, विजयानन्दः, दक्षिणावर्तः, भोजः, कृष्णभट्टः, गोपिकानाथ कविराजः, प्रभाकरः, जनार्दनः, उदयकरः, भागीरथः, बृहस्पतिमिश्रः, कृष्णपति शर्माः, भवदेव मिश्रः, गुणविनयगणिः, रामचन्द्रः, महेश्वरः इत्यादयः।

४.५ चरित्र-चित्रणम्

कुमारसम्भवमहाकाव्ये प्रमुखतया शिवः, पार्वती, मदनः, रतिः, हिमालयः, सप्तर्षयः च मुख्यचरित्राणि सन्ति। कविः कालिदासः सूक्ष्मतया एतेषां चरित्राणां चित्रणं कृतवान्, यत्र शिवस्य तद्विरक्तं तपस्वित्वं, पार्वत्याः पतिव्रतधर्मे आस्था, मदनक्रियायाः प्रभावः, रतेः पतिव्रतानुरागः,

हिमालयस्य दयालुता, सप्तर्षिणां धर्मज्ञानं च सुव्यक्तरूपेण प्रकटितम् अस्ति। प्रत्येकं चरित्रं तस्य आचार्य, आदर्शतया उपस्थापितम् अस्ति। कुमारसम्भवस्य नायिका पार्वती विद्या, कर्तव्यनिष्ठा, धर्मशीलता च ध्येयदर्शनादि गुणैः समन्विताः।

४.५.१ समीक्षणम्

महाकविना कुमारसंम्भवे शिवस्य, पार्वत्याः च मदनस्य च विविधानि कृत्यानि वर्णयित्वा आत्मानं व्यापृतं कृतम्। शिवस्य द्वैतस्वरूपस्य वर्णने कविना कौशलं प्रदर्शितमस्ति। शिवस्य भयङ्करं 'रौद्र' रूपं तथा शिवरूपं वा कल्याणमयस्वरूपं इति द्वयोरपि रूपयोः प्रकटिः दृष्टा। योगनिष्ठः शिवः स्त्रीभ्यः दुरात् गन्तुम् इच्छति। इन्द्रियनिग्रहं कृत्वा सः योगयुक्तः एकान्ते वासं करोति। तादृशे स्थितौ मदनः पार्वतीं प्रति तं प्रवर्तयितुं प्रयत्नं कुर्वन् क्रोधेन शिवेन भस्मीकृतः। अन्यत एव, शिवः करुयाणस्वरूपः। पार्वत्याः भक्तिपूर्णा श्रद्धायुक्ता तपश्चर्या तं सुगमतया जितवती। तस्मिन् संतुष्टः शिवः तस्याः पतिः भविष्यामीति स्वीकृतवान्। पार्वतीमन्यते यत् यस्मिन् वसन्तागमने मदनप्रेरणया शिवः तस्याः रूपेण आकृष्टः भविष्यति। परन्तु महादेवस्य क्रोधेन पतितं मदनं दृष्ट्वा पार्वती अवगच्छति यत् केवलं रूप–सौन्दर्येण शिवं जेतुं न शक्नोति। अतः सा तपस्यया शिवस्य मनः जेतुं दृढसंकल्पिता अभवत्। भारतीयसंस्कृतेः प्रधानं न भोगः किन्तु त्यागपूर्वकं भोगः– एषा एव भावना महाकाव्येऽपि प्रतिबिम्बिता अस्ति। महाकविकालिदासस्य वांमयेन तदानीन्तन कालस्य भारतीयभूगोलस्य, इतिहासस्य सांस्कृतिकविषये अपि संकेताः प्राप्तुं समर्थाः। 'कुमारसम्भवम्' महाकाव्यस्य मुख्यः रसः शृङ्गारः। मदनदाहे रौद्ररसः, रत्याः विलापे करुणरसः दृश्यते। इन्द्रस्य कामस्य च संवादे तथा युद्धवर्णने वीररसः अपि प्रकाशितः।

४.६ अध्यायस्य असमीया भाषायां सारांशः

মহাকবি কালিদাসৰ 'কুমাৰসম্ভৱম'ৰ এক সংক্ষিপ্ত পৰিচয়-

মহাকবি কালিদাস হৈছে সংস্কৃত সাহিত্যৰ সদাদেদীপযমান এক উজ্বল নক্ষত্ৰ। বিক্ৰমাদিত্যৰ ৰাজৰভাৰ নৱৰত্ন এক অন্যতম ৰত্ন কালিদাসক 'কবিকুলগুৰু' নামেৰেও জনা যায়। তেওঁৰ জন্মস্থান আৰু সময় সম্বন্ধে বিদ্বানসকলৰ মাজত মতবৈচিত্ৰ পৰিলক্ষিত হয়। এচাম পণ্ডিতৰ মতে তেওঁ মধ্যভাৰতৰ উজ্জয়িনী (প্ৰাচীন নাম অৱন্তিকা)ৰ নিবাসী আৰু আন এচামৰ মতে তেওঁ কাশ্মীৰৰ নিবাসী। তেওঁৰ জীৱনচৰিত বিবাদৰ বিষয় হ'লেও তেওঁৰ কৃতিসম্বন্ধে পণ্ডিতসকলৰ মাজত লেশমানো বিবাদ নাই।

কালিদাসৰ ৰচনাৰাজি ঃ

মহাকবি কালিদাসৰ নামত অনেক গ্ৰন্থ প্ৰচলিত হৈ থাকিলেও পণ্ডিতসকলে সাতখন গ্ৰন্থহে কালিদাসৰ বুলি দৃঢ়মত পোষণ কৰে। সেয়া হৈছে —

মহাকাব্য-

ক) কুমাৰসম্ভৱম্

খ) ৰঘুবংশম্

খণ্ডকাব্য-

গ) মেঘদূতম্

ঘ) ঋতুসংহাৰম্

নাটক-

ঙ) মালবিকাগ্নিমত্রম্

চ) বিক্ৰমোৰ্বশীয়ম্

ছ) অভিজ্ঞানশাকুন্তলম্

অভিজ্ঞানশাকুন্তলম্ হৈছে কালিদাসৰ কালজয়ী সৃষ্টি। তেওঁৰ দ্বাৰা ৰচিত কুমাৰসম্ভৱম্ আৰু ৰঘুবংশম্ এই দুখন মহাকাব্যই সংস্কৃত সাহিত্যৰ পঞ্চ মহাকাব্যৰ অন্তৰ্গত।

কুমাৰসম্ভৱ মহাকাব্যৰ বিষয়বস্তু

কুমাৰসম্ভৱ মহাকাব্যখন ☐☐টা (সোতৰটা) সৰ্গত বিভক্ত। অৱশ্যে, পণ্ডিতসকলে প্ৰথম আঠটা সৰ্গহে কালিদাসৰ ৰচনা বুলি কৈছে। ইয়াৰ কাৰণ এয়ে যে, প্ৰথম আঠটা সৰ্গৰ কাব্যিক সৌন্দৰ্যৰ তুলনাত ☐☐পৰা ☐☐ নং লৈকে থকা সৰ্গৰ সাহিত্যিক সৌন্দৰ্য নিম্নখাপৰ। 'কুমাৰসম্ভৱ' এই নামটোত কুমাৰ শব্দই শিৱ-পাৰ্ৱতীৰ পুত্ৰ কাৰ্ত্তিকক আৰু 'সম্ভৱ' শব্দই 'জনমক' বুজাইছে। গতিকে, 'কুমাৰৰ জন্ম' অৰ্থাৎ কাৰ্ত্তিকৰ জন্ম আৰু তেওঁৰ বীৰকৰ্মৰ বৰ্ণনা মহাকবিয়ে এই মহাকাব্যখনত কৰিছে।

তাৰকাসুৰৰ বধৰ কাৰণে কুমাৰ (কাৰ্ত্তিক)ৰ জন্মই হৈছে 'কুমাৰসম্ভৱ'ৰ মূল বিষয়। তাৰকাসুৰৰ অত্যাচাৰত অতীষ্ঠ হৈ দেৱতাসকল ব্ৰহ্মাৰ ওচৰ চাপে। তেতিয়া ব্ৰহ্মাই উপদেশ দিয়ে যে শিৱ আৰু পাৰ্বতীৰ মিলনৰ ফলত উদ্ভৱ হোৱা পুত্ৰৰ হাততহে তাৰকাসুৰৰ মৃত্যু সম্ভৱ। বৰ্তমান মহাদেৱ যোগ সমাধিত ৰত আৰু হিমালয়ৰ কন্যা পাৰ্বতীয়ে তেওঁক শুশ্ৰূষা কৰি আছে, পাৰ্বতীৰ প্ৰতি আকৃষ্ট কৰি তেওঁৰ সৈতে মিলন হ'লেহে সন্তান সম্ভৱ হ'ব আৰু সেই সন্তানেহে তাৰকাসুৰক বধ কৰিব পাৰিব। ইয়াৰ পাছতে দেৱৰাজ ইন্দ্ৰই এখন সভা আহ্বান কৰি কামদেৱক (মদনক) মাতি আনি শিৱ আৰু পাৰ্বতীৰ মিলন ঘটাবলৈ আদেশ দিলে। মদনে, সখা বসন্ত আৰু পত্নী ৰতিদেৱীক লগত লৈ শিৱৰ সমাধি স্থানত উপস্থিত হ'ল আৰু বসন্তৰ সহায়ত অকাল বসন্ত সৃষ্টি কৰি শিৱৰ মন পাৰ্বতীৰ প্ৰতি আকৃষ্ট কৰিবলৈ যত্নপৰ হ'ল। বসন্তৰ চঞ্চলতাত মহাদেৱৰ সমাধি ভংগ হ'ল আৰু মদনক কামবাণ নিক্ষেপ কৰা দেখা পাই ক্ৰোধান্বিত হৈ কপালস্থ তৃতীয় চকুৰ পৰা অগ্নি নিৰ্গত কৰি কামদেৱক ভস্মীভূত কৰে। পতিহীনা ৰতিৰ বিলাপে পাৰ্বতীৰ কোমল অন্তৰতো কাৰুণ্যৰ আলোড়ন তুলিলে। নিজৰ দৈহিক সৌন্দৰ্যৰে শিৱক আকৃষ্ট কৰিব নোৱাৰি


পার্বতীয়ে পিতৃৰ আজ্ঞালৈ শিৱক পতিৰূপে পাবৰ বাবে কঠোৰ তপস্যাত মগ্ন হয়। পার্বতীৰ তপস্যাত সন্তুষ্ট হৈ শিৱই বাওনা ব্রাহ্মণৰ বেশ ধাৰণ কৰি পার্বতীৰ পৰীক্ষা কৰিলে আৰু শেষত আত্মপ্রকাশ কৰি পার্বতীক জয়ী হোৱা বুলি স্বীকাৰ কৰিলে। ইয়াৰ পাছতে শিৱই পার্বতীৰ পাণি গ্রহণৰ প্রার্থনা কৰিবলৈ সপ্তর্ষিক হিমালয়লৈ প্রেৰণ কৰে। হিমালয়ে আনন্দেৰে জীয়েকক শিবলৈ বিয়া দিবলৈ সন্মতি স্থাপন কৰিলে। শিৱ পার্বতীৰ মিলনত দেবসেনাপতি জন্মাৰ সম্ভাৱনাই দেখা দিলে। এই কাহিনীকে কালিদাসে আঠটা সর্গত বিভক্ত কৰিছে। পৰৱর্তী নটা সর্গৰ কাহিনীৰ সাৰমর্ম হৈছে- বিবাহৰ পাছত শিৱ পার্বতী সম্ভোগ ক্রিয়াত বহুদিন পাৰ কৰাত দেৱবৃন্দ ধৈর্যচ্যুত হ'ল। অগ্নিক কপৌ চৰাইৰ ৰূপত শিৱ আৰু পার্বতীৰ লীলাধামলৈ ঘটনাৰ বুজ ল'বলৈ পঠালে। অগ্নিৰ আগমনত শিৱ ক্রোধান্বিত হ'ল। কিন্তু অগ্নিয়ে দেৱতাসকলৰ অনুৰোধ ক্রমেহে তালৈ অহা বুলি নিবেদন কৰাত শিৱ প্রসন্ন হ'ল আৰু নিজৰ আমোঘ তেজোবিন্দু অগ্নিত নিক্ষেপ কৰিলে। অগ্নিয়ে সেই তেজ ধাৰণ কৰিবলৈ অসমর্থ হৈ ইন্দ্রক জনোৱাত ইন্দ্রই তেজ আকাশী গঙ্গাত নিক্ষেপ কৰিবলৈ ক'লে। গঙ্গায়ো দুর্বহ তেজ ধাৰণ কৰিবলৈ অসমর্থ হৈ গঙ্গাস্নান কৰিবলৈ অহা কৃত্তিকাৰ গর্ভত ন্যস্ত কৰিলে। ফলত কৃত্তিকা গর্ভৱতী হয়। সেই গুৰুভাৰ বহন কৰিব নোৱাৰি বেতসবনত ত্যাগ কৰি গুচি গ'ল। তেনে সময়তে শিৱ আৰু পার্ৱতীয়ে বিমানেৰে যাওঁতে শিশুটিৰ ওপৰত তেওঁলোকৰ দৃষ্টি পৰিল। শিৱই নিজৰ তেজৰ পৰা উৎপন্ন বুলি জানি শিশুটিক তুলি নিলে। শিশুটি ছয় দিনতে সকলো অস্ত্র-শস্ত্রত পার্গত হৈ পৰিল। তেওঁ 'কুমাৰ' নামে জনাজাত হ'ল। ইন্দ্রাদিৰ অনুৰোধক্রমে শিৱই তেওঁক দেৱ সেনাপতি পাতিলে। কুমাৰে অর্থাৎ কার্ত্তিকে তাৰকাসুৰক যুদ্ধত বধ কৰি ইন্দ্রক চিন্তামুক্ত কৰিলে।

কুমাৰসম্ভৱ মহাকাব্যৰ ওপৰত মুঠ [illegible]টা টীকা পোৱা যায়। ইয়াৰ ভিতৰত পঁচিশজন টীকাকাৰৰ নামহে পোৱা যায়। টীকাকাৰসকলৰ ভিতৰত সকলোতকৈ প্রখ্যাত হৈছে মল্লিনাথ। তেওঁৰ টীকাৰ নাম হৈছে 'সঞ্জীৱনী'। মহাকবি কালিদাসে 'কুমাৰসম্ভৱ' মহাকাব্যৰ আঠটা সর্গলৈকে টীকা ৰচনা কৰিছে। ইয়াৰোপৰি অন্যান্য টীকাকাৰসকলৰ নাম হ'ল- হেমাদ্রি, চৰিত্রবর্দ্ধন, বল্লভ, দিনকৰ, ভৰতসেন, অৰুণগিৰিনাথ, নাৰায়ণ, সুমতি বিজয়, বিজয়গণি, বিজয়ানন্দ, দক্ষিণাবর্ত, ভোজ, কৃষ্ণভট্ট, গোপিকানাথ কবিৰাজ, প্রভাকৰ, জনার্দ্দন, উদয়কৰ, ভগীৰর্থ, বৃহস্পতি মিশ্র, কৃষ্ণপতি শর্মা, ভৱদেৱ মিশ্র, গুণবিনয়গণি, ৰামচন্দ্র, মহেশ্বৰ আদি।

কুমাৰসম্ভৱ মহাকাব্যৰ মুখ্য চৰিত্রসমূহ হৈছে শিৱ, পার্বতী, মদন, ৰতি, হিমালয় আৰু সপ্তর্ষি। কবি কালিদাসে এই সকলো চৰিত্রৰ সূক্ষ্ম বিশ্লেষণ কৰিছে। শিৱৰ তপস্যাৰ অন্তর্ভুক্তি, পার্বতীৰ পতিভক্তি, মদনৰ শক্তি, ৰতিদেৱীৰ পতিব্রতা প্রেম, হিমালয়ৰ দয়ালুতা আৰু সপ্তর্ষিৰ ধর্মজ্ঞান আদি সঠিকভাৱে বর্ণনা কৰা হৈছে। সকলো চৰিত্রক এক আদর্শ ৰূপত প্রদর্শিত কৰা হৈছে। পার্বতীক এই কাব্যৰ নায়িকা হিচাপে উপস্থাপন কৰা হৈছে, যাক বিদ্যা, কর্তব্যনিষ্ঠা আৰু ধর্মৰ মূর্তিমান ৰূপত দর্শোৱা হৈছে।

মহাকবি কালিদাসে কুমাৰসম্ভৱত শিৱ, পার্বতী আৰু মদনৰ বিবিধ কার্যৰ বর্ণনা নিজকে ব্যাপৃত কৰিছে। শিৱৰ দ্বৈতৰূপ বর্ণনাত কবিয়ে নিপুণতা প্রদর্শন কৰিছে। শিৱৰ ভয়ানক 'ৰৌদ্র'

ৰূপ আৰু শৈৱৰূপ বা কল্যাণময় ৰূপ দুয়োটি ৰূপ প্ৰকাশ পাইছে। যোগত প্ৰবৃত্ত শিৱই নাৰীৰ পৰা আতৰি ফুৰিবলৈ বিচাৰে। ইন্দ্ৰিয় নিগ্ৰহ কৰি তেওঁ যোগযুক্ত হৈ নিভৃতে বাস কৰিছে। তেনে অৱস্থাত মদনে তেওঁক পাৰ্বতীৰ প্ৰতি প্ৰলুব্ধ কৰিবলৈ যত্ন কৰাত ক্ৰোধাবিষ্ট হৈ মদনক ভস্মীভূত কৰিলে। আনহাতে শিৱকল্যাণৰ প্ৰতিমূৰ্তি। পাৰ্বতীৰ ভক্তিপূৰ্ণা, শ্ৰদ্ধাময়ী তপশ্যাই তেওঁক সহজে জয় কৰিছে। পাৰ্বতীৰ প্ৰতি সন্তুষ্ট হৈ তেওঁৰ স্বামী হ'বলৈ সন্মত হৈছে। পাৰ্বতীয়ে ভাবিছিল বসন্তৰ আগমনত মদনৰ প্ৰৰোচনাত পাৰ্বতীৰ ৰূপত শিৱ আসক্ত হৈ পৰিব। কিন্তু মহাদেৱৰ ক্ৰোধত পতন হোৱা মদনক দেখি পাৰ্বতীয়ে নিজৰ ৰূপ-সৌন্দৰ্যৰে যে শিৱক জয় কৰিব নোৱাৰিব সেই কথা জানিব পাৰিলে। সেয়েহে তেওঁ তপস্যাৰ দ্বাৰা শিৱৰ মন জয় কৰিবলৈ দৃঢ়সংকল্প ল'লে। ভাৰতীয় সংস্কৃতি ভোগ প্ৰধান নহয় ত্যাগৰ মহিমাৰে মণ্ডিত। এই কথাই মহাকাব্যখনিত প্ৰতিফলিত কৰিছে। মহাকবি কালিদাসে সমকালীন ভাৰতবৰ্ষৰ ভৌগোলিক, ঐতিহাসিক তথা সাংস্কৃতিক তথ্যৰ আভাস দিছে। 'কুমাৰসম্ভৱ' মহাকাব্যৰ প্ৰধান ৰস শৃঙ্গাৰ, মদনদাহত ৰৌদ্ৰৰস, ৰতিৰ বিলাপত কৰুণ ৰস দেখা যায়। ইন্দ্ৰ আৰু কামদেৱৰ কথোপকথনত আৰু যুদ্ধৰ বৰ্ণনাত বীৰৰস প্ৰকাশ পাইছে।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: महाकाव्यस्य आरम्भः प्रथमतः कुत्र दृश्यते ?

.....

प्रश्नः २: काव्यस्य प्रमुखे द्वे वर्गे किम् ?

.....

प्रश्नः ३: 'कुमारसम्भवम्' महाकाव्य कस्य वर्गस्य अन्तर्गतं भवति ?

.....

प्रश्नः ४: महाकाव्यस्य लक्षणमेकं वदतु।

.....

प्रश्नः ५: कालिदासं विहाय कयोऽपि द्वयोः नवरत्नयोः नाम लिखतु ?

.....

प्रश्नः ६: कुमारसम्भवस्य आदौ कविः कं वन्दते ?

.....

प्रश्नः ७: कुमारसम्भवमहाकाव्यं कतिषु सर्गेषु विभक्तः अस्ति ? पण्डिताः कतिषु सर्गाः कालिदासेन रचितं मन्यन्ते ?

.....

प्रश्नः ८: पञ्चमहाकाव्यनां नामानि लिखतु ?

.....

प्रश्नः ९: कुमारसम्भवस्य स्रोतभूतं ग्रन्थद्वयं किम् ?

.....

प्रश्नः १०: कुमारसम्भवस्य तृतीयसर्गे कतिः श्लोकाः सन्ति ?

.....

प्रश्नः ११: रामायणे सह कुमारसम्भवस्य के विशेषाः तुलनीयाः ?

.....

प्रश्नः १२: कालिदासस्य अन्यत् महाकाव्यं किम् ?

.....



४.७ अध्यायात् किमवगतम्

अस्मिन् अध्याये कुमारसम्भवस्य वर्णनात् –

- संस्कृतसाहित्ये महाकाव्यस्य महत्वं तथा तस्य लक्षणानि अवगन्तुं शक्यते।
- महाकविकालिदासस्य विषये संक्षेपेण ज्ञातुं शक्यते।
- कुमारसम्भवमहाकाव्ये वर्णितं प्रथमाष्टसर्गाणां सारं, कथानकं च ज्ञातुं शक्यते।
- काव्ये प्रमुखरसाः – शृङ्गार, वीर, करुणा, शान्ति इत्यादयः अपि ज्ञायते।



४.९ ज्ञानाधिक्यम्

१) M. R. Kale. Kumarasambhavam- Motilal Banarasidass Publishers.

२) History of Samikrta Literature. V. Varadachari, 2nd ed. 1960

३) সংস্কৃত সাহিত্যেৰ ইতিহাস - ধীৰেন্দ্ৰ নাথ বন্দোপাধ্যায় পশ্চিমবঙ্গ ৰাজ্য পুস্তক পর্যৎ ৰিয় সংস্কৰণ ড° বঙ্কিম চেটার্জী ষ্ট্রিট কলিকত্ত-

৪) সংস্কৃত সাহিত্যসম্ভাৰ-নং নৱপত্ৰ প্রকাশন, ৰিয় সংস্কৰণ ড° বঙ্কিম চেটার্জী ষ্ট্রিট। বছৰ কলিকত্ত-

৫) সংস্কৃত সাহিত্যৰ বুৰঞ্জী-হৰমোহন দেৰ গোস্বামী, পাণবজাৰ, চন্দ্রপ্রকাশ, গুৱাহাটী.....

৬) সংস্কৃত সাহিত্যৰ জিলিঙনি-কামাখ্যাচৰণ ভাগৱতী ৰম প্রকাশ, গ্রন্থপীঠ, গুৱাহাটী।

৭) সংস্কৃত সাহিত্যৰ ইতিবৃত্ত- ড° থানেশ্বৰ শর্মা ৰম প্রকাশ , চন্দ্রপ্রকাশ, গুৱাহাটী।

৮) কুমাৰসম্ভৱ-তৃতীয় সর্গ- ড° ইন্দিৰা শইকীয়া বৰা, ৰিয় প্রকাশ প্রকাশিকা, পাণবজাৰ, গুৱাহাটী।



४.८ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : वैदिकसाहित्येषु।

प्रश्नः २ उत्तरम् : दृश्यकाव्यम्, श्रव्यकाव्यम्।

प्रश्नः ३ उत्तरम् : श्रव्यकाव्यस्य।

प्रश्नः ४ उत्तरम् : सर्गबन्धः महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।।

प्रश्नः ५ उत्तरम् : धन्वन्तरिः, क्षपणकः।

प्रश्नः ६ उत्तरम् : महादेवपार्वतीं च।

प्रश्नः ७ उत्तरम् : सप्तदश सर्गाः। पण्डिताः कालिदासस्य रचना अष्ट सर्गान् एव मन्यन्ते।

प्रश्नः ८ उत्तरम् :

१) कुमारसम्भवः (कालिदासः),
२) रघुवंशः (कालिदासः),
३) किरातार्जुनीयम् (भारविः),
४) नैषधचरितम् (श्रीहर्षः),
५) शिशुपालवधः (माघः)।

प्रश्नः ९ उत्तरम् : शिवपुराणम्, स्कन्दपुराणम्।

प्रश्नः १० उत्तरम् : षट्सप्ततिः (७६)।

प्रश्नः ११ उत्तरम् :

१) तपोवनस्य वसन्तागमनम्।
२) रतिः विलापः (रामायणे तारायाः विलापः तुलनीयः)।
३) तारकासुरस्य आख्यानम्।

प्रश्नः १२ उत्तरम् : रघुवंशम्।



४.१० अभ्यासप्रश्नाः

क) वस्तुधर्मी प्रश्नः:

प्रश्नः १: महाकाव्यम् किम्? महाकाव्येन सह कुमारसम्भवस्य तुलनीयाः पक्षाः स्पष्टीकुरुत।

ख) लघुप्रश्नः:

प्रश्नः १: कालिदासस्य विषये विस्तरेण लिखतु।

ग) रचनात्मकः प्रश्नः

प्रश्नः १: कुमारस्भवमहाकाव्ये प्रमुखचरित्राणां विषये निबन्धं लिखतु।

*** ***** ***

अध्यायः ५ : कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः १-१५)

अध्यायस्य संरचना

५.१ उद्देश्यम्

५.२ परिचयः

५.३ तृतीयसर्गस्य सारांशः

६.४ तृतीयसर्गस्य नामकरणस्य महत्वम्

५.५ तृतीयसर्गस्य (१-१५) श्लोकानां संस्कृतपाठः

- ५.५.१ श्लोकानाम् अन्वयपाठः
- ५.५.२ श्लोकानां शब्दार्थः
- ५.५.३ श्लोकानाम् असमीयानुवादः
- ५.५.४ व्याकरणगतटिप्पणी

५.६ विशेषश्लोकानां भावार्थः

५.७ अध्यायात् किमवगतम्

५.८ ज्ञानाधिक्यम्

५.९ अग्रगत्याः निरूपणम्

५.१० अभ्यासप्रश्नाः

५.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- 'कुमारसम्भवम्' इति महाकाव्यस्य तृतीयसर्गस्य विषयं ज्ञातुं शक्नुवन्ति।
- अस्य महाकाव्यस्य तृतीयसर्गस्य नामकरणस्य महत्वं अवगन्तुं शक्नुवन्ति।
- श्लोकानान्तर्गतानां दुरूहशब्दसमूहनां व्याकरणविधानं अवगन्तुं शक्नुवन्ति।
- कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य श्लोकानां (१-१५) संस्कृतपाठः पठितुं शक्नुवन्ति। ततः गद्यपाठः शब्दार्थः असमीयानुवादः च पठितुं शक्नुवन्ति।
- कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्थितांशरेकस्य (१-१५) श्लोकानां व्याख्याविषये ज्ञातुं शक्नुवन्ति।

५.२ परिचयः

पूर्वस्मिन् अध्याये भवान् महाकवि कालिदासस्य जीवनस्य संक्षिप्तं विवरणं च, तस्य कृतिः कुमारसम्भवम् महाकाव्यस्य विषयं, महाकाव्यस्य परिभाषां, उत्पं च, कुमारसम्भवस्य चरित्रचित्रणं च पठितवान्। 'कुमारसम्भवम्' इति महाकाव्यं सप्तदश (१७)। एषः महाकाव्यः सर्गात्मकम् पञ्चमहाकाव्येषु अन्यतमं मन्यते। तत्र अष्टसर्गाः कालिदासस्य लेखनं सन्ति, अन्यः

नवसर्गाः कालिदासेन न विरचिताः इति पण्डितानां अभिप्रायः। अतः टीकाकारः मल्लिनाथः अरुणगिरिः च कालिदासस्य रचितानां प्रथमानां अष्टसर्गाणां टीकां विरचितवान्। सृष्टिकर्तुः ब्रह्मदेवस्य वरप्रसादेन तारकासुरः प्रवलो भूत्वा सकलान् देवान् पीडयामास। तारकवधोपायं उद्भावयितुं देवराजः कामदेवं सस्मार। ब्रह्मणः सूचनानुसारं महादेवस्य वीर्यसमुद्भवः पुत्र एव तारकासुरं अभिभवितुं शक्नुयात्। परन्तु महादेवः तस्मिन् समये तपसि निरतवान्। समाधिस्थं महादेवं पार्वतीं प्रति आकर्षयितुं इन्द्रः कथं कामदेवं आदेशं कृतवान्, कामदेवः देवराजस्य आदेशं शिरसि धृत्वा प्रियसहचरेण वसन्तेन सह देवकार्यं साधयितुं हिमालयदिशि कथं गमनं कृतवान् तस्मिन् विषये अध्यायेऽस्मिन् वर्णनमस्ति। अपि च, श्लोकानां (१-१५) संस्कृतपाठं, गद्यपाठं, शब्दार्थं, अनुवादं व्याख्यां च अस्मिन् अध्याये वर्णनं क्रियते।

५.३ तृतीयसर्गस्य सारांशः

इदानीं भवतः कुमारसंभवमहाकाव्यस्य तृतीयसर्गस्य सारांशः ज्ञातुं शक्यते। कदाचित् देवाः प्रबलप्रतापिशत्रोः तारकासुरस्य उपद्रवेन भयाकुलाः अभवन्। देवाः विजयलाभाय शिवस्य वीर्यसम्भूतः एकः सेनानायकः प्राप्नुं कामयन्तः आसन्। प्रजापति ब्रह्मणा उक्तं यत् केवलं शिवपार्वत्योः पुत्रः तारकासुरं हन्तुं शक्नोति। किन्तु तदा महादेवः गम्भीरतपस्यायां मग्नः आसीत्। केवलं समाधिस्थ महादेवस्य तपः भंक्त्वा पार्वत्याः सह मिलनः सम्पाद्येण एव देवानां इप्छितः सेनानायकः प्राप्नुवन्ति। एतस्मिन् कार्ये देवराज इन्द्रः कामदेवं उपयुक्तः इति मन्यते स्म। तस्मिन्नेव हेतोः इन्द्रः एकः विशेषः सभामाहूयत। तस्मिन् सभायां अन्यदेवताभिः सह कामदेवः अपि आगत्य उपविष्टः आसीत्। पूर्वे कस्यापि कार्यस्य निमित्ते कामदेवस्य आवश्यकता नाभवत्, किन्तु तस्मिन्नेव दिने इन्द्रस्य सम्पूर्णः ध्यानम् अन्यदेवैः अपि उपेक्ष्य केवलं कामदेवे एव स्थितम्। अपि च इन्द्रः कामदेवं स्वस्य आसनसमीपे एव आदरेण उपवेशयत्।

एवमप्रत्याशितानुग्रहेण कामदेवः अतीव आह्लादितः अभवत्। इन्द्राय स्वजीवनस्यापि मूल्यं दत्त्वा यथासम्भवकर्म कर्तुं इति प्रतिज्ञां कृत्वा कामदेवः इन्द्रं स्वस्य सामर्थ्यविषये व्यक्तीक्रियत्। यदि तीव्रशत्रुं प्रति इन्द्रः संकटे पतति तर्हि तं शत्रुं विनाश्य विमूढः इन्द्रः चिन्तामुक्तः भवति इति प्रतिज्ञां कृतवान्। यदि प्रेमसम्बन्धे इन्द्रः पीडितः, तत्रापि तं सरलतां मोचयितुं विचारं कृतवान्। अपि च इन्द्रस्य वज्रः विश्रान्ति प्राप्नुयात् इति कामदेवः वज्रस्य स्थानं स्वीकर्तुं प्रार्थितवान्। देवानां परमावश्यकं विषयं प्रति कामदेवेन स्वशक्तेः प्राकट्यं कृतमासीत्, यत्र देवपतिः इन्द्रः अतीव आह्लादितः अभवत्। कारणं, देवाः शत्रुविषयार्थं शिवस्य वीर्यात् जायमानं सेनापतिं वाञ्छन्ति। तस्मिन्नेव काले अतीव आवश्यक-विषयः आसीत् महादेवस्य तपस्याभङ्गं कृत्वा तं पार्वतीं प्रति आकृषयितुम्। इन्द्रः एतस्य कर्मणः हेतु कामदेवं उपयुक्तं इति मन्यते। अतः एतस्मिन् महत्वपूर्णकर्मे नियोगं कर्तुमिच्छति। कामदेवस्य कर्णगतिः शिवस्य प्रतिकूलम् अस्ति। परमात्मनि ध्यानस्थितं तं मन्त्रनिधिं महादेवं केवलं कामदेवस्य वशीकर्तुं बाणेण शक्यते। ततः इन्द्रः कामदेव एकान्तसमाधिसंयुतेन तं महादेवं हिमालयकन्यापार्वतीं प्रति आकर्षणं कृत्वा देवकार्य साधयितुं


प्रयत्नं कर्तुं आदेशं कृतवान्। स्त्रीषु मध्ये पार्वती एव शिववीर्यं धारयितुं सामर्थ्याः इति प्रजापतिः ब्रह्मा उक्तवान्। सा हिमालयकन्या पार्वती अपि पितुः अनुमतिं प्राप्य हिमालयस्य ऊर्ध्वभूमौ महादेवस्य शुश्रूषां कृतवती। एतं संवादं अप्सरायाः मुखात् देवराजः ज्ञातवान्। कारणं हि अप्सराः देवतानां गुप्तचराः सन्ति। अनेन प्रकारेण कार्यसिद्धये देवाः कामदेवं आज्ञापयन्ति। यथा बीजः अंकुरिताय जलस्य प्रतीक्षां करोति तथैव कार्यसाधनाय देवताः कामदेवस्य प्रतीक्षां कुर्वन्ति, कारणं हि एषः कार्ये देवानां शस्त्रां असमर्थाः विद्यन्ते।

अनन्तरं कामदेवः स्वपत्नीं रतिं तथा सखा-वसन्तं आत्मनो जीवनस्य मूल्यं दत्वा देवकार्यं सिद्धं कर्तुं दृढनिश्चयेन हिमालये स्थितं शिवस्य आश्रमे उपस्थितवान्। वसन्तऋतुः तस्मिन्नेव आश्रमे विराजमानः अभवत्। अकालवसन्तस्य आगमनेन तत्र प्राकृतिकवातावरणे आकस्मिक-परिवर्तनम् अभवत्। आश्रमस्य वृक्षलताः नूतनरूपे शोभयितुं प्रारब्धाः। अपि च अन्तरीक्षस्य ग्रह-नक्षत्राणां गमनेऽपि सहसा परिवर्तनं दृष्टम्। सूर्यः दक्षिणायनात् उत्तरायणं प्रति गतवान्। आम्रवृक्षाः कोमलपर्णैः पुष्पैश्च सुशोभिताः अभवन्। तेषां गन्धेन आकृष्टाः मधुपाः भ्रमराः चतुर्दिशः गुञ्जायमानाः अभवन्। एवम् मन्यते यथा कामदेवस्य नामांकिताय भ्रमरान् वसन्तः प्रेरितवान्। अकालवसन्तस्य प्रभावः जडचेतनजगते अपि विस्तृतवान्। वसन्तपवनेन मृगाः मत्ताः अभवन्। नवाम्रकिसलयभक्षणेन कोकिलाः मधुरस्वरेण गायन्तः अभवन्। तेषां गीतध्वनेन मनस्विनीनां मानोऽपि निवृत्तः। तत्र प्राकृतिकवातावरणस्य सहसा परिवर्तनेन शिवस्य आश्रमस्य समाधिस्थानां ऋषीणां चित्तमपि विचलिता जाताः। महत्तया प्रयत्नेन ते विक्षिप्तं मनः संयमितवन्तः। वसन्तऋतुः शिवस्य आश्रमे प्रवेश्य तत्र स्थिताः दम्पत्याः प्रेमरसपूर्णाः अभवन्। भ्रमराः स्वप्रियं अनुसृत्य एकस्मिन्नेव पात्रे मधुं पातुम् आरब्धवन्तः। कृष्णमृगः मृगीं सीङ्गाभ्यां स्पृष्ट्वा प्रेमं प्रकाशितवान्। चक्रवाकपक्षिणः अर्धभक्षितं मृणालखण्डं स्वपत्न्या सह सेवनं कृतवन्तः। अकालवसन्तस्य प्रभावेन तत्र स्थितस्य शिवस्य आश्रमः शान्तः संमुखीभूतः अभवत्। एवमेव कामदेवः शिवस्य आश्रमे उपस्थितवान् तथा तपस्यारतः महादेवस्य भयंकररूपं दृष्ट्वा सः किंकर्तव्यविमूढः अभवत्। तस्मिन्नेवकाले महादेवस्य शुश्रूषायां प्रवृत्तां पार्वतीं कामदेवः अपश्यत्। पार्वत्याः अप्रतिमं सौन्दर्यं दृष्ट्वा तस्याः आधारं कृत्वा सः महादेवस्य तपः भङ्गं कर्तुं चकार। परमतत्त्वे मग्नः सन् महादेवस्य तपस्या समाप्तिः अभवत्। तस्मिन्नेव क्षणे कामदेवः कामबाणं विससर्ज। महादेवः सहसा आकस्मिककम्पनं अनुभवत्। सः चतुर्दिशं निरीक्ष्य कामदेवम् अपश्यत्। धैर्यभङ्गस्य कारणेन तं एव ज्ञात्वा क्रोधितः अभवत्। तत्क्षणं ललाटस्थित-तृतीयात् नेत्रात् देदीप्यमानः उद्गतज्वालः कामदेवं भस्मावशेषं चकार। कामदेवस्य पत्नी रतिदेवी एवं दुःखं सहितुं अशक्ता मूर्छिता जाता। पार्वती अपि तादृशीं दशां विलोक्य दृश्य स्थिरा भवितुं अशक्ता जाता। तदा हिमालयः तां स्वकन्यां पार्वतीं स्वगृहं निनयन्। इत्यनेन 'कुमारसम्भवम्' महाकाव्ये 'कामदहन' नामकः तृतीयः सर्गः समाप्तम्।

५.४ तृतीयसर्गस्य नामकरणस्य महत्वम्

कुमारसम्भवमहाकाव्ये प्रत्येकसर्गस्य नाम वर्णितविषयस्य आधारोपरि चयनं कृतम् अस्ति। एवम् उक्तं यस्मिन् महाकाव्ये सर्गाणां नाम वर्णितविषयस्य परिप्रेक्ष्येण निर्णयं कर्तव्यम् अर्थात् 'सर्गोपादेय कथया सर्गनाम तु इति। ततः महाकवि कालिदासः तृतीयसर्गस्य नाम 'मदनदहन' इति निर्दिष्टम् अकरोत्।

तृतीयसर्गे देवराजः इन्द्रः कामदेवम् अथवा मदनं तपस्यारत-महादेवस्य तपस्यां भङ्गं कर्तुं गिरीराजहिमालयस्य कन्यां पार्वतीं महादेवं प्रति आकर्षयितुं आज्ञापितम्। इन्द्रस्य आज्ञया बसन्तं सहायतया पत्नी-रतिदेव्या सह कामदेवः महादेवस्य तपस्यास्थानं आगतवान्। तदा महादेवस्य समाधिस्थाने अकालबसन्तेऽवभातम्। एवमेव कामदेवः शिवस्य आश्रमे उपस्थितवान् तथा तपस्यारत-महादेवस्य भयङ्कर-रूपदर्शनं कृत्वा विचलितोऽभूत्। तस्मिन्नेवकाले महादेवस्य शुश्रूषायां प्रवृत्तां पार्वतीं कामदेवः अपश्यत्। पार्वत्याः अप्रतिमं सौन्दर्यं दृष्ट्वा ताम् आधारं कृत्वा सः महादेवस्य तपः भङ्गं कर्तुं चकार चिन्तयाम। परमतत्त्वे मग्नः सन् महादेवस्य तपस्या समाप्तिः अभवत्। तस्मिन्नेव क्षणे कामदेवः कामबाणं विससर्ज। महादेवः सहसा आकस्मिककम्पनम् अनुभवन्। सः चतुर्दिशं-निरीक्ष्य आत्मनि बाणप्रयोगं कर्तुमुद्यतं कामदेवम् अपश्यत्। धैर्यभङ्गस्य कारणेन सः क्रोधितः अभवत्। तत्क्षणं महादेवस्य ललाटस्थित-तृतीयनेत्रेण कामदेवः भस्मसात्कृतः। एतत्पर्वम् कारणेण सर्गस्य नाम 'मदनदहन' इति उपयुक्तं भवति।



अग्रगत्याः निरीक्षणम्

प्रश्नः १: कुमारसम्भवमहाकाव्यस्य तृतीयसर्गे इन्द्रस्य सहस्रचक्षुः किमर्थं कामदेवस्य उपरि पतितः ?

.....

प्रश्नः २: मदनः देवकार्यं सिद्ध्यर्थं कं कं नीतवान् ?

.....

प्रश्नः ३: शिवस्य आश्रमे अकालवसन्तस्य प्रभावः पशु-पक्षिणां उपरि किमर्थं क्रियते ?

.....

प्रश्नः ४: शिवस्य तृतीयनेत्रेण मदनं भस्मीकृतं दृष्ट्वा रतिः किमवस्थां प्राप्तवती ?

.....

प्रश्नः ५: पार्वती शिवस्य समाधिस्थानेषु किमकरोत् ?

.....

५.५ कुमारसम्भवस्य तृतीयसर्गस्य श्लोकानां (१-१५) संस्कृतपाठः

अधुना भवान् कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य (१-१५) श्लोकानां संस्कृतपाठः पठितुं शक्नोति। श्लोकाः अधः उल्लिखिताः -



वासवेन+आसन+सन्निकृष्टम्+इतः

तस्मिन् मघोनस्त्रिदशान् विहाय सहस्रमक्ष्णां युगपत् पपात।
प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु ॥ १ ॥
स वासवेनासनसन्निकृष्टमितो निषीदेति विसृष्टभूमिः।
भर्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैनमेवम् ॥ २ ॥



यावत्+भवति+आहितसायकस्य

आज्ञापय ज्ञातविशेष! पुंसां लोकेषु यत्ते करणीयमस्ति।
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितमाज्ञया ते ॥ ३ ॥
केनाभ्यसूया पदकाङ्क्षिणा ते नितान्तदीर्घैर्जनिता तपोभिः।
यावद्भवत्याहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्ती ॥ ४ ॥
असम्मतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात् प्रपन्नः।
बद्धश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रुचतुरैः कटाक्षैः ॥ ५ ॥



सिन्धोः + तटौ + इव + ओघः

अध्यापितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते।
कस्यार्थधर्मौ वद पीडयामि सिन्धोस्तटावोघ इव प्रवृद्धः ॥ ६ ॥
कामेकपत्नीव्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टाम्।
नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयंग्राहनिषक्तबाहुम् ॥ ७ ॥
कयासि कामिन्! सुरतापराधात् पादानतः कोपनयावधूतः।
तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरम् ॥ ८ ॥
प्रसीद विश्राम्यतु वीर वज्रं! शरैर्मदीयैः कतमः सुरारिः।
बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ॥ ९ ॥



त्वयि+उपपन्नम्+एतद्+उभे

तव प्रसादात् कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥ १० ॥
अथोरुदेशादवतार्य पादमाक्रान्तिसम्भावितपादपीठम्।
सङ्कल्पितार्थे विवृतात्मशक्तिमाखण्डलः काममिदं बभाषे ॥ ११ ॥
सर्वं सखे! त्वय्युपपन्नमेतदुभे ममास्त्रे कुलिशं भवांश्च।
वज्रं तपोवीर्यमहत्पु कुण्ठं त्वं सर्वतोगामि च साधकं च ॥ १२ ॥



यज्ञांशभुजम्+इदानीम्+
उच्चेद्विषाम्+इप्सितम्+एतत्+एव

अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये।
व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः ॥ १३ ॥
आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पम्।
निबोध यज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सितमेतदेव ॥ १४ ॥
अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः।
स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा ॥ १५ ॥

५.५.१ श्लोकानाम् अन्वयपाठः

अधुना 'कुमारसम्भवम्' इति महाकाव्यस्य तृतीयसर्गस्य उपरि उल्लिखितानां श्लोकानां अन्वयः पठितुं शक्यते –

१) मघोनः अक्ष्णां सहस्रं त्रिदशान् विहाय (परित्यज्य) तस्मिन् (कामदेवे) युगपत् पपात। प्रायः प्रभुणाम् आश्रितेषु गौरवं प्रयोजनापेक्षितया चलं (भवति)।। १।।

२) स वासवेन आसन्नसन्निकृष्टम् इतः निषीद इति विसृष्टभूमिः (सन्) भर्तुः प्रसादं मूर्ध्ना प्रतिनन्द्य मिथः एनं एवं वक्तुं प्राक्रमत्।। २।।

३) पुंसां ज्ञातविशेष आज्ञापय, लोकेषु ते यत् करणीयमस्ति। संस्मरणप्रवृत्तं ते अनुग्रहं आज्ञया संवर्धितं इच्छामि।। ३।।

४) पदकाङ्क्षिणा केन (जनेन) नितान्तदीर्घैः तपोभिः ते अभ्यसूया (ईर्षा) जनिता, यावत् सः आहितसायकस्य मत्कार्मुकस्य निदेशवर्ती भवति (भविष्यति)।। ४।।

५) तव असम्मतः कः पुनर्भवक्लेशभयात् मुक्तिमार्गं प्रपन्नः (सः) सुन्दरीणाम् आरेचितभ्रुचतुरैः कटाक्षैः बद्धः (सन्) चिरं तिष्ठतु।। ५।।

६) उशनसा नीतिम् अध्यापितस्य अपि ते कस्य द्विषः अर्थधर्मौ प्रयुक्तरागप्रणिधिः (अहं) प्रवृद्धः ओघः सिन्धोः तटौ इव पीडयामि वद।। ६।।

७) एकपत्नीव्रतदुःखशीलां चारुतया लोलं मनः प्रविष्टां नितम्बिनीं मुक्तलज्जाम् कां (सतीं) कण्ठे स्वयं ग्राहनिषक्तबाहुम् इच्छसि।। ७।।

८) (हे) कामिन्! सुरतापराधात् पादानतः (सन्) कोपनया कया अवधूतः असि? तस्याः शरीरं दृढानुतापं प्रवालशय्याशरणं करिष्यामि।। ८।।

९) (हे) वीर! प्रसीद वज्रं विश्राम्यतु, मदीयैः शरैः मोघीकृतबाहुवीर्यः कतमः सुरारिः कोपस्फुरिताधराभ्यः स्त्रीभ्यः अपि बिभेतु।। ९।।

१०) तव प्रसादात् कुसुमायुधः अपि एकं मधुम् एव सहायं लब्ध्वा पिनाकपाणेः हरस्य अपि धैर्यच्युतिं कुर्याम्। अन्ये धन्विनः मम के।। १०।

११) अथ आखण्डलः उरुदेशात् पादम् आक्रान्तिसम्भावितपादपीठं (यथा तथा) अवतार्य संकल्पितार्थे विवृतात्मशक्तिं कामम् इदं बभाषे।। ११।।

१२) (हे) सखे! एतत् सर्वं त्वयि उपपन्नम्, कुलिशं भवान् च मम उभे अस्त्रे (भवतः)। तपोवीर्यमहत्सु (जनेषु) वज्रं कुण्ठम्। त्वं सर्वतोगामि साधकं च (अस्त्रं भवति)।। १२।।

१३) हे सखे! ते सारम् अवैमि। अतः खलु आत्मसमं त्वां गुरुणि कार्ये नियोक्ष्ये कृष्णेन भूधरताम् अवेक्ष्य देहोद्वहनाय शेषः (सर्पः) व्यादिश्यते।। १३।।

१४) वृषाङ्के बाणगतिं आशंसता त्वया नः कार्यं प्रतिपन्नकल्पम्, इदानीम् उच्चैर्द्विषां यज्ञांशभुजां (देवानाम्) एतत् इप्सितं निबोध।। १४।।

१५) हि अमी देवाः जयाय भवस्य वीर्यप्रभवं सेनान्यम् उशन्ति, ब्रह्माङ्गभूः ब्रह्मणि योजितात्मा स च (भवः) त्वदेकेषुनिपातसाध्यः।। १५।

५.५.२ श्लोकानां शब्दार्थ :

अधुना 'कुमारसम्भवम्' इति महाकाव्यस्य तृतीयसर्गस्य (१-१५) श्लोकानां शब्दार्थं पठितुं शक्यते -

श्लोकः १

मघोनः अक्ष्णां सहस्रं तस्मिन् कामदेवे पपात (ইন্দ্ৰৰ সহস্ৰ চকু কামদেৱৰ ওপৰত পৰিল), त्रिदशान् विहाय तस्मिन् पपात (ইন্দ্ৰৰ চকু আন দেৱতাসকলৰ পৰা পাৰ হৈ) प्रयोजनापेक्षिता प्रभूणाम् आश्रितेषु गौरवं प्रायः चलं भवति (ইন্দ্ৰই কামদেৱৰ পৰা কাম বিচাৰিছে, সেই কাৰণে তেওঁ আন দেৱতাসকলতকৈ কামদেৱৰ ওপৰত অধিক গুৰুত্ব প্ৰদান কৰিছে।) প্ৰায়েই দেখা যায় গৰাকীসকলে আশ্ৰিতসকলৰ ওপৰত কেতিয়াবা অধিক গুৰুত্ব দিয়ে) ।

श्लोकः २

स (कामः) मिथः एनम् (इन्द्रं) एवं वक्तुं प्राक्रमत् (কামদেৱে অতি সংগোপনে ইন্দ্ৰক এনেদৰে ক'বলৈ ধৰিলে) भर्तुः प्रसादं मुर्ध्ना प्रतिनन्द्या (কামদেৱে গৰাকীৰ আশীৰ্বাদ শিৰেৰে গ্ৰহণ কৰিলে) स वासवेन बिसृष्टभूमिः (कामदेवः इन्द्रस्य निकटं आसनं प्राप्नोति) आसन सन्निकृष्टम् इतः निषीद इति (তেওঁক) (কামদেৱক ইন্দ্ৰৰ আসনৰ একেবাৰে কাষত বহিবলৈ দিলে) ।

श्लोकः ३

हे पुंसां ज्ञातविशेष (হে সর্বং ইন্দ্ৰ) आज्ञापय लोकेषु ते यत् करणीयमस्ति (আদেশ কৰক, এই জগতত আপোনাৰ বাবে কি কৰিবলগীয়া আছে ?) संस्मरणप्रवृत्तम् ते अनुग्रहम् आज्ञया संवर्धितम्, इच्छामि (আপুনি মোক স্মৰণ কৰি দেখুৱা অনুগ্ৰহ আজ্ঞা পালনৰ দ্বাৰা বৃদ্ধি কৰিবলৈ ইচ্ছা কৰো)

श्लोकः ४

पदकाङ्क्षिणा केन (जनेन) नितान्तदीर्घैः तपोभिः (আপোনাৰ এই পদৰ আকাংক্ষা কৰি কোনো ব্যক্তিয়ে দীৰ্ঘ কালধৰি তপস্যা কৰিছে নেকি?) यावत् सः आहितसायकस्य मत्कार्मुकस्य (তেওঁক মোৰ এই ধনুত সংযোজন কৰা বাণৰ দ্বাৰা) निदेशवर्ती भवति (আপোনাৰ বশৱৰ্তী কৰিম)।

श्लोकः ५

तव असम्मतः कः पुनर्भवक्लेशभयात् मुक्तिमार्गं प्रपन्नः (আপোনাৰ সন্মতি নোলোৱাকৈ পুনর্জন্ম ক্লেশৰ ভয়ত কোনোৱে মুক্তিমার্গৰ আশ্ৰয় লৈছে নেকি?) सुन्दरीणाम् आरेचितभ्रूचतुरैः कटाक्षैः बद्धः (सन्) चिरं तिष्ठतु (সেই জনকো সুন্দৰ

চেলাউৰিযুক্ত সুন্দৰী নাৰীৰ কটাক্ষ চাৱনিৰে চিৰকাল সংবদ্ধ কৰি ৰাখিব পাৰিম)।

শ্লোক: ৬

উশনসা নীতিম্ অধ্যাপিতস্য অপি তে (শুক্রাচার্যৰ নীতিৰ দ্বাৰা দীক্ষিত হ'লেও), অপি তে কস্য দ্বিষ: (আপোনাৰ যদি কোনো শত্রু আছে), অর্থধর্মৌ (অর্থ আৰু ধর্ম), প্রযুক্তরাগপ্রণিধি: (বিষয়াভিলাষযুক্ত চোৱাংচোৱা পঠাই), (অহং) প্রবৃদ্ধ: ওঘ: সিন্ধো: তটৌ ইব পীডযামি বদ (প্রবাহমান নদীৰ টোৰে যিদৰে পাৰভাঙি পেলায়, ময়ো নাশ কৰিব পাৰো, যদিহে আপুনি কয়)।

শ্লোক: ৭

এক পত্নীব্রতদু:খশীলাং (পতিব্রতা ধর্মত দৃঢ়ব্রতী), চারুতয়া লোলং মন: প্রবিষ্টাং কাং (সুন্দৰীৰ সৌন্দর্যৰ প্রতি মন আকর্ষিত হৈছে নেকি ?), নিতম্বিনীং মুক্তলজ্জাং (সুন্দৰীৰ লজ্জা নাশ কৰিব পাৰো), কণ্ঠে স্বযং গ্রাহনিষক্তবাহুম্ ইচ্ছসি (স্বইচ্ছাৰে আপোনাৰ কণ্ঠালিঙ্গন কৰাব পাৰো)।

শ্লোক: ৮

হে কামিন্ (হে কামী), সুরতাপরাধাত্ পাদানত: (সুৰত কর্মত প্রবৃত্ত হৈ ভৰিত ধৰা সত্ত্বেও), সন্ কোপনযা কযা অবধূত: অসি ? (কোনো খঙাল স্বভাৱৰ নাৰীৰ দ্বাৰা তিৰস্কৃত হৈছে নেকি ?), তস্যা: শরীরং দৃঢানুতাপং (তেওঁৰ শৰীৰত কামনাৰ তাপ বৃদ্ধি কৰি), প্রবালশয্যাশরণং করিষ্যামি (তেওঁকো প্রবাল শয্যাত আশ্রয় লোৱাব পাৰো)।

শ্লোক: ৯

(হে) বীর প্রসীদ (হে বীৰবৰ প্রসন্ন হওক), বজ্রং বিশ্রাম্যতু (আপোনাৰ বজ্রক বিশ্রাম দিয়ক), মদীযৈ: শরৈ: মোঘীকৃতবাহুবীর্য: কতম: সুরারি: (আপোনাৰ কোন দানব শত্রুক মোৰ শৰেৰে পৰাজিত কৰিব পাৰো), কোপস্ফুরিতাধরাভ্য: স্ত্রীভ্য: অপি বিভেতু (খঙত কঁপি থকা ওঠৰ স্ত্রীৰ পৰাও ভয় খায়)।

শ্লোক: ১০

তব প্রসাদাত্ (আপোনাৰ অনুগ্রহত), কুসুমাযুধ: অপি একং (ফুল অস্ত্র হ'লেও), মধুমেব সহাযং লব্ধ্বা (বসন্তক যদি সহায় হিচাবে পাওঁ), পিনাকপাণে: হরস্য অপি (পিনাকপাণি মহাদেবকো), ধৈর্যচ্যুতিং কুর্যাম্ (ধৈয্যচ্যুতি ঘটাব পাৰো), অন্যে ধন্বিন: মম কে ? (অন্য ধনুর্ধৰৰ প্রতি মই ভ্রুক্ষেপ নকৰো)।

শ্লোক: ১১

অথ আখণ্ডল: উরুদেশাত্ পাদম্ (ইয়াৰ পিচত ইন্দ্রই উৰুৰ পৰা ভৰিখন নমাই), আক্রান্তি সম্ভাবিত পাদপীঠম্ (পাদপীঠত স্থাপন কৰিলে), অবতার্য সঙ্কল্পিতার্থে বিবৃতাত্মশক্তিং (ইপ্সিত বিষয়ত কামদেৱে নিজ শক্তি ব্যক্ত কৰাত), কামম্ ইদং বভাষে (কামদেবক এনেদৰে ক'বলৈ ধৰিলে)।

श्लोकः १२

हे सखे (হে সখি), एतत् सर्वं त्वयि उपपन्नं (তুমি যি কৈছা সকলো উপযুক্ত কথা), कुलिशं भवान् च मम उभे अस्त्रे (মোৰ বাবে উভয়েই অস্ত্ৰ, যেনে মোৰ বজ্ৰ আৰু তুমি), तपोवीर्यमहत्सु वज्रं कुण्ठं (তপোবীৰ্য জনৰ প্ৰতি বজ্ৰ নিষ্ফল), त्वं सर्वतोगामि साधकं च (তুমি সৰ্বত্ৰগামী আৰু কাৰ্যকৰী)।

श्लोकः १३

हे सखे! ते सारम् अवैमि (তোমাৰ শক্তিৰ বিষয়ে জানো), अतः खलु आत्मसमं त्वां (সেই কাৰণে নিজৰ দৰে ভাবি তোমাক), गुरुणि कार्ये नियोक्षे (গুৰুতৰ কৰ্মত নিয়োগ কৰিবলৈ ওলাইছো), कृष्णेन भूधरतामवेक्ष्य (বিষ্ণুৱে পৃথিৱীৰ ভাৰ ধাৰণ কৰিবলৈ সমৰ্থ বুলি জানিয়েই), देहोद्वहनाय शेषः व्यादिश्यते (অনন্তনাগক দেহৰ ভাৰ ধাৰণ কৰিবলৈ নিয়োগ কৰিছিল)।

श्लोकः १४

वृषाङ्के बाणगतिं आशंसता (মহাদেৱৰ ওপৰত বাণৰ গতি প্ৰকাশ কৰাৰ ফলত), त्वया नः कार्यं प्रतिपन्न कल्पम् (তুমি আমাৰ কাৰ্যটো এক প্ৰকাৰ স্বীকাৰ কৰাৰ দৰে হ'ল), इदानीं उच्चैद्विषां यज्ञांशभूजां देवानां (এতিয়া প্ৰচণ্ড শত্ৰুৰ সন্মুখীন হোৱা যজ্ঞাংশভোজী দেৱতাসকলৰ), एतत् इप्सितं निबोध (ইপ্সিত বা প্ৰয়োজনীয় বস্তু এইটোৱেই)।

श्लोकः १५

हि अमी देवाः जयाय (এই দেৱতাসকলে জয়ৰ বাবেই), भवस्य वीर्यप्रभवः सेनान्यम् उशन्ति (মহাদেৱৰ বীৰ্যৰ পৰা এজন দেব সেনাপতি পাবলৈ ইচ্ছা কৰিছে), ब्रह्माङ्गभुः ब्रह्मणि योजितात्मा स च (भवः) (সেই মহাদেবে নিজকে পৰমব্ৰহ্মত আত্মা সংযোগ কৰি পৰমাত্মাত একাত্ম হৈছে), त्वदेकेषुनिपातसाध्यः (তোমাৰ একেপাত শৰেই বশ হোৱাৰ যোগ্য)।



ज्ञातव्यम्

उपरि उल्लिखितानां श्लोकानां कश्चित् संस्कृतशब्दानां सम्यक् ज्ञानाय एतत् प्रदत्तम्।

श्लोकसंख्या ३

लोकेषु = 'लोकेषु' इति त्रिभुवनं बोधयति। स्वर्गं मर्त्यं च तथा पातालं एकत्र त्रिभुवनं भवति।

श्लोकसंख्या ६

उषणस् = उषणस् इति शुक्राचार्यस्य नाम अस्ति। गीतायां कवीनां मध्ये सः श्रेष्ठः इति वर्तते। 'कवीनामुशना कविः' (गीता-१०/३७)। तस्य पितुर्नाम काव्यः। सः परवर्तीरकाले

दैत्यानां गुरुः शुक्रग्रहस्य अधिष्ठातृ देवता च इति प्रकटितः भवति।

श्लोकसंख्या १०

कुसुमायुध = कुसुमायुधः इति कामदेवस्य वा मदनः नाम अस्ति। 'कुसुम' इत्यस्य अर्थः पुष्पः अस्ति, 'आयुध' इत्यस्य अर्थः बाणः। कामदेवं तस्मात् 'पुष्पधन्वा' इत्यपि उच्यते। कामदेवस्य बाणः पञ्चभिः पुष्पैः निर्मितः भवति। यथा- अरविन्द, अशोक, च्युत (आम्रपुष्पः), नवमल्लिका, नीलोत्पलम्।

अरविन्दमशोकञ्च च्युतन्वतनवमल्लिका।

नीलोत्पलञ्च पञ्च एते पञ्च बाणस्य सायकाः।

श्लोकसंख्या १३

'शेषः' इति सर्पाणां राजा अस्ति। अन्य नाम अनन्तः। अष्टप्रकारेषु सर्पेषु अनन्तः सर्पेषु श्रेष्ठं भवति। भगवान् विष्णुः अनन्तनागस्य पृथिवीधारणसामर्थ्ययम् निरीक्ष्य निजदेहं नागराजतल्पे निधाय योगनिद्रामाश्रितः प्रलये अतिष्ठत्।

अष्ट सर्पाः - १) अनन्त, २) वासुकी, ३) पद्म, ४) महापद्म, ५) तक्षक, ६) कूलीर, ७) कर्कट, ८) शङ्खः।

अनन्त वासुकी पद्मः महापद्मश्च तक्षकः।

कूलीरः कर्कटः शङ्खोह्यष्टनागाः प्रकीर्तिताः।

५.५.३ श्लोकानाम् असमीयानुवादः

अधुना भवान् कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य (१-१५) श्लोकानां असमीयानुवादाः अपि पठितुं शक्नोति। यथा -

- কামদেৱ আহি পোৱাৰ লগে লগে ইন্দ্ৰৰ হাজাৰ চকু আন সকলো দেৱতাক এৰি একেলগে তেওঁৰ ওপৰত পৰিল। প্ৰায়েই গৰাকীসকলে প্ৰয়োজন অনুযায়ী আশ্ৰিত ব্যক্তিসকলক গুৰুত্ব দিয়ে।
- (তেতিয়া) ইন্দ্ৰই তেওঁৰ সিংহাসনৰ ওচৰতে থকা বিশিষ্ট আসনখনত 'ইয়াতে বহা' এইবুলি কৈ বহিবলৈ ঠাই এৰি দিলে। এইদৰে প্ৰভুৰ এনে অনুগ্ৰহ কামদেৱে শিৰোধার্য কৰি গোপনে ইন্দ্ৰক ক'বলৈ আৰম্ভ কৰিলে।
- হে সর্বং ইন্দ্র! এই জগতত আপোনাৰ যিখিনি কৰিবলগীয়া আছে (সেয়া) মোক আদেশ কৰক। আপুনি মোক স্মৰণ কৰি দেখুওৱা অনুগ্ৰহ আপোনাৰ আদেশ পালনৰ দ্বাৰা বৃদ্ধি কৰিবলৈ ইচ্ছা কৰোঁ।
- (হে দেৱৰাজ!) আপোনাৰ এই পদ লাভৰ ইচ্ছাত কোনো ব্যক্তিয়ে দীৰ্ঘকাল ধৰি তপস্যা কৰি আপোনাৰ মনত উদ্বেগ জন্মাইছে নেকি? আপুনি যদি আজ্ঞা কৰে (তেন্তে) মোৰ এই ধনুৰে তেওঁক বশৱৰ্তী কৰি আপোনাৰ শৰণাগত কৰিব

পাৰোঁ।

) আপোনাৰ সন্মতি নোলোৱাকৈ কোনোৱে পুনর্জন্মৰ কষ্টৰ ভয়ত মুক্তিমার্গৰ আশ্রয় লৈছে নেকি? (আদেশ কৰক) সেই জনকো সুন্দৰ চেলাউৰিযুক্ত সুন্দৰীৰ কটাক্ষ চাৱনিৰ দ্বাৰা চিৰকাল সংবদ্ধ কৰি ৰাখিব পাৰিম।

) প্রবাহমান নদীৰ টোৰে যেনেদৰে পাৰ ভাঙি পেলায় ঠিক তেনেদৰেই ময়ো আপোনাৰ শত্রু যিজন স্বয়ং উশনসৰ (শুক্রাচার্যৰ) নীতিৰ দ্বাৰা দীক্ষিত হ'লেও মোৰ বিষয়াভিলাস যুক্ত চোৰাংচোৱা পঠাই তেওঁৰ ধর্ম তথা অর্থ নাশ কৰিম যদিহে আপুনি আদেশ দিয়ে।

আপোনাৰ মন কোনো সুন্দৰ নাৰীয়ে তেওঁৰ সৌন্দর্যৰে আকর্ষিত কৰিছে নেকি? কিন্তু তেওঁ পতিব্রতা ধর্মত দৃঢ়ব্রতী বাবেই আপোনাৰ প্রতি অনাসক্ত। যদি আপুনি অনুমতি দিয়ে তেন্তে তেওঁকো লজ্জাহীনা কৰি স্বইচ্ছাৰে আপোনাৰ কণ্ঠালিঙ্গন কৰাব পাৰোঁ।

) হে কামী! কামনাবশতঃ পাদানত হোৱা সত্বেও কোনো খণ্ডাল স্বভাৱৰ নাৰীৰ দ্বাৰা আপুনি তিৰস্কৃত হৈছে নেকি? যদি আপুনি আদেশ দিয়ে তেন্তে তেঁওৰ শৰীৰত কামনাৰ তাপ বৃদ্ধি কৰি তেওঁকো প্রবাল শয্যাত আশ্রয় লোৱাব পাৰো।

) হে বীৰবৰ প্রসন্ন হওক, আপোনাৰ বজ্রক বিশ্রাম দিয়ক। কওক, আপোনাৰ কোন দানৱশত্রুক মোৰ বাণেৰে পৰাজিত কৰিব পাৰো। মই তেওঁক এনেকুৱা কৰিম যাতে তেওঁ খণ্ডত ওঠ কপি থকা তিৰোতাৰ পৰাও ভীত হয়।

) হে দেৱৰাজ! আপোনাৰ অনুগ্রহত যদি ফুলক অস্ত্র হিচাপে আৰু বসন্তক সহায়ক হিচাপে পাওঁ তেনেহ'লে সেই পিনাকধাৰী মহাদেৱৰো (মই) ধৈর্য্যচ্যুতি ঘটাব পাৰো। আন ধনুর্দ্ধৰৰ প্রতিতো মই ভ্রুক্ষেপেই নকৰো।

) তেতিয়া ইন্দ্রই তেওঁৰ উৰুৰ পৰা ভৰিখন নমাই পাদপীঠত স্থাপন কৰিলে আৰু ইঙ্গিত বিষয়ত কামদেৱে নিজ শক্তি ব্যক্ত কৰাত কামদেৱক এনেদৰে ক'বলৈ ধৰিলে।

) হে সখী! তুমি যি কৈছা সেই সকলোবিলাক উপযুক্ত কথা, সেইবিলাকে তোমাৰেই শোভা প্রকাশ কৰিছে। মোৰ বাবে বজ্র আৰু তুমি উভয়েই অস্ত্র। কিন্তু তপোবীর্য জনৰ ওচৰত বজ্র নিষ্ফল হয়। কিন্তু; তুমিতো সর্বত্রগামী আৰু কার্যকৰী। অর্থাৎ তুমিতো সকলোতে বিৰাজ কৰা আৰু সকলো কামেই কৰিব পাৰা।

) হে সখী! তোমাৰ শক্তিৰ বিষয়ে নিশ্চয়কৈ জানোহক। সেইকাৰণে নিজৰ দৰে ভাবি তোমাক এটা গুৰুতৰ কামত নিযুক্ত কৰিবলৈ ওলাইছো। কিয়নো, পৃথিবীৰ ভাৰ ধাৰণ কৰিবলৈ সমর্থ বুলি জানিয়েই বিষ্ণুৰে শেষনাগক তেওঁৰ দেহৰ ভাৰ ধাৰণ কৰিবলৈ আদেশ কৰিছিল।

- মহাদেৱৰ ওপৰত বাণৰ শক্তি প্ৰকাশ কৰাৰ ফলত তোমাৰ দ্বাৰা আমাৰ কাৰ্যটো প্ৰায় সম্পন্ন কৰাৰ দৰেই হ'ল। এতিয়া প্ৰচণ্ড শত্ৰুৰ সন্মুখীন হোৱা যজ্ঞাংশভোজী দেৱতাসকলৰ ইপ্সিত বা প্ৰয়োজনীয় বস্তু এইটোৱেই।
- এই দেৱতাসকলে জয়ৰ বাবেই মহাদেৱৰ বীৰ্যৰ পৰা পৰা সৃষ্টি হোৱা এজন দেবসেনাপতি পাবলৈ ইচ্ছা কৰিছে। সেই মহাদেৱে (যিজনে) নিজকে পৰমব্ৰহ্মত নিজৰ আত্মা সংযোগ কৰি পৰমাত্মাত একাত্ম হৈছে তেওঁ তোমাৰ (কামদেৱৰ) একেপাত শৰতেই বশ হোৱাৰ যোগ্য।



अग्रगति निरीक्षणम्

प्रश्न ६: कुमारसम्भवस्य तृतीयसर्गस्य प्रथमश्लोके 'मघोन' शब्देन कः सूच्यते ?

.....

प्रश्न ७: द्वितीयश्लोके 'वासव' शब्दः कस्य अर्थं प्रकाशयति ?

.....

प्रश्न ८: 'सुरारि' शब्दस्य कोऽर्थः ?

.....

प्रश्न ९: 'कुलिशं' इति शब्देन किं सूच्यते ?

.....

प्रश्न १०: 'वृषांक' इति शब्दस्य कोऽर्थः ?

.....

५.५.४ व्याकरणगतटिप्पणी

अधुना भवान् कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य (१-१५) श्लोकानां व्याकरणगतटिप्पणी पठितुं शक्नोति-

श्लोकः १

व्युत्पत्तिः

विहाय = वि - √हा + ल्यप्

पपात = √पत् + लिट् + अ

प्रयोजनापेक्षिणः = प्रयोजन + अप् + √ईक्ष् + णिनि

गौरवम् = गुरु + अण् + भावे

विभक्ति निर्णय :

तस्मिन् = अधिकरणे सप्तमी

मघोनः = शेषे षष्ठी

आश्रितेषु = अधिकरणे सप्तमी

समासः

त्रिदशान् = तिस्रः दशाम् येषां ते, तान् त्रिदशा, बहुव्रीहिसमास

श्लोकः २

व्युत्पत्ति :

निषीद = नि - √सद् + लोट् हि

बिसृष्ट = बि - √सृज् + क्त कर्मणि

प्रतिनन्द्य = प्रति - √नन्द + ल्यप्

वक्तुम् = √वच् + तुमुन्

प्राक्रमत = प्र - √क्रम् + लङ् + त

विभक्ति निर्णय :

वासवेन = अनुक्ते कर्त्तरि तृतीया

इतः = अधिकरणे सप्तमी

मुर्ध्ना = करणे तृतीया

समास :

बिसृष्टभूमिः = बिसृष्टाभूमिः यस्मै, बहुव्रीहिसमास

श्लोकः ३

व्युत्पत्ति :

आज्ञापय = आ-√ज्ञा + णिच् लोट् हि

अस्ति = √अस् + लट् + ति

अनुग्रहम् = अनु-√ग्रह् + अप् भावे

संस्मरण = सम् +√स्मृ + ल्युट् भावे

प्रवृत्तम् = प्र-√वृत् + क्त

इच्छामि = √इष् + लट् मि

सम्बर्द्धितम् = सम् + √वृध् + णिच् + क्त कर्मणि

विभक्ति निर्णयः

आज्ञया - करणे तृतीया।

समास :

ज्ञातविशेषः = ज्ञातः विशेषः येन स, बहुव्रीहिसमास

श्लोकः ४

व्युत्पत्तिः

पदकाङ्क्षणा = पद + काङ्क्ष + णिनि कर्तरि

आहित = आ-√धा + क्त कर्मणि

विभक्ति निर्णयः

तपोभिः = करणे तृतीया

समासः

मत्कार्मुकम् = मम कार्मुकम्, षष्ठी तत्पुरुष

आहितसायकस्य = आहितः सायकः यस्मिन् तत्, तस्य बहुव्रीहिसमास

श्लोकः ५

व्युत्पत्तिः

असम्मतः = न + सम् + √मन् + क्त वर्तमाने कर्मणि

भवः = भू + √अच् + कर्तरि

प्रपन्नः = प्र √प्रद + क्त कर्तरि

बद्धः = √बद्ध + क्त कर्त्तरि

तिष्ठतु = √स्था लोट् तु

आरोचित = आ – √रिच् + णिच् + क्त कर्मणि

विभक्ति निर्णयः

क्लेशभयात् = हेतौ पञ्चमी।

कटाक्षैः = करणे तृतीया।

चिरम् – व्याप्तार्थे द्वितीया।

समासः

मुक्तिमार्गम् = मुक्तेः मार्गः (षष्ठी तत्पुरुषः) तम्।

असम्मतः = न सम्मतः, नञ तत्पुरुषः

श्लोकः ६

व्युत्पत्तिः

अध्यापितस्य = अधि + √इ + णिच् + क्त कर्मणि

प्रणिधिः = प्र-णि + √धा कि

प्रयुक्तः = प्र-√युज + क्त कर्मणि

पीडयामि = √पीड + णिच् + लट् मि

विभक्ति निर्णयः

द्विषः = शेषे षष्ठी

समासः

प्रयुक्तः प्रणिधिः = राग एव प्रणिधिः = प्रयुक्तः रागप्रणिधिः येन, बहुव्रीहि

अर्थधर्मौ = अर्थश्च धर्मश्च, द्वन्द्वसमास

श्लोकः ७

व्युत्पत्तिः

प्रविष्टम् = प्र-√विश् + क्त कर्तरि स्त्रियाम्

इच्छसि = √इष् + लट् सि

निष्पन्नः = नि -√सञ्ज् + कर्मणि क्तः

विभक्ति निर्णयः

चारुतया = हेतौ तृतीया

कण्ठे = आधारोऽधिकरणे सप्तमी

समासः

मुक्तलज्जाम् = मुक्ता लज्जा यया सा ताम्, बहुव्रीहि समास

श्लोकः ८

विभक्ति निर्णयः

कया = अनुक्ते कर्त्तरि तृतीया

सुरतापराधात् = हेतौ सप्तमी

व्युत्पत्तिः

असि = √अस् + लट् सि

अवधूतः = अर + √धू + क्त कर्मणि

करिष्यामि = √कृ + लृट् स्यामि

समासः

पादानतः = पादयोः आनतः, सप्तमी तत्पुरुषः

दृढानुतापः = दृढः अनुतापः यस्य तत्, वहुव्रीहि

श्लोकः ९

व्युत्पत्तिः

प्रसीद = प्र-√सद् + लोट् हि

विश्राम्यतु = वि-√श्रम् + लोट् + तु

विभेतु = √भी + लोट् तु

विभक्ति निर्णयः

शरैः = अनुक्ते कर्त्तरि तृतीया, स्त्रीभ्यः = अपादाने पञ्चमी

समासः

मोघीकृतबाहुवीर्य्यः= मोघीकृतं बाहुवीर्यं यस्य, बहुव्रीहि समास। बाहोः वीर्यम्, षष्ठी तत्पुरुष

श्लोकः १०

व्युत्पत्तिः

प्रसादात् प्र-$\sqrt{}$सद् + घञ् भावे तस्मात्

सहायम् = सह अयते इति = सह + अय + अच् कर्तरि = सहाय

लब्धा = $\sqrt{}$लभ + क्त्वाच्

कुर्याम् = $\sqrt{}$कृ + विधिलिङ्ग्याम्।

धन्विनः = धन्व + इनि

विभक्ति निर्णयः

प्रसादात् = हेतौ पञ्चमी

समासः

कुसुमायुधः = कुसुमम् आयुधं यस्य, बहुव्रीहि समास

पिणाकपाणिः = पिनाक पाणौ यस्य सः, बहुव्रीहि समास

धैर्यच्युतिम् = धैर्यस्य च्युतिः, षष्ठी तत्पुरुषः; ताम्

श्लोकः ११

व्युत्पत्तिः

अवतार्य्य = अव + $\sqrt{}$तृ + णिच् + ल्यप्

आक्रान्ति = आ-$\sqrt{}$क्रम् + क्तिन् भावे

सङ्कल्पितार्थ = सम्- $\sqrt{}$कृप + णिच् + क्त कर्मणि

वभाषे = $\sqrt{}$भाष् + लिट् ए

विवृत = वि - $\sqrt{}$वृ + क्त

विभक्ति निर्णयः

सङ्कल्पितार्थे = विषयाधिकरणे सप्तमी

समासः

उरुदेशात् = उरोः देशः= षष्ठी तत्पुरुषः, तस्मात्

सङ्कल्पितार्थ = संकल्पितः अर्थ, तस्मिन्, कर्मधारय समास

विवृतात्मशक्तिम् = विवृता आत्मशक्तिः येन सः, बहुव्रीहि समास

श्लोकः १२

व्युत्पत्तिः

त्वयि = अधिकरणे

उपपन्नम् = उप-पद + क्त कर्तरि

साधकम् = साध् न्वुल् कर्तरि

समासः

तपोवीर्य्यम् = तपसः वीर्यम्, षष्ठी तत्पुरुष समास

सर्वोतोगामि = सर्वतः गच्छति, उपपदतत्पुरुषं इति तत्

श्लोकः १३

व्युत्पत्तिः

अवैमि = अव + √इ + लट् मि

नियोक्षे = नि-√युज् + लृट् उत्तमपुरुष एकवचन

व्यादिश्यते = वि-आ + √दिश् लट् ते कर्मणि

उद्वहनाय = उद् + √वह् + ल्युट् भावे

अवेक्ष्य = अव-√ईक्ष्य् + ल्यप्

विभक्ति निर्णयः

कार्ये = अधिकरणे सप्तमी

देहोद्वहनाय = तादर्थ्ये चतुर्थी

समासः

देहोद्वहनाय = देहस्य उद्वहनम्, षष्ठी तत्त्वपुरुष, तस्मै

श्लोकः १४

व्युत्पत्तिः

आशंसता = आ- √शंस् + शतृ, तृतीया एकवचन

प्रतिपन्नम् = प्रति - √पद + क्त कर्मणि

निवोध = नि-√बुध् + लोट् हि

यज्ञांशभुजः = यज्ञांश भुञ्जते इति = यज्ञांश + भूज् + किप् कर्तरि

विभक्ति निर्णयः

बृषाङ्के = अधिकरणे सप्तमी

समासः

उच्चैद्विषाम् = उच्चैः द्विषः येषाम् ते, बहुव्रीहि समास

वाणगतिम् = वाणानां गतिः, षष्ठी तत्पुरुषः, ताम्

श्लोकः १५

व्युत्पत्तिः

भवस्य = भू + अच् कर्त्तरि

जयाय = जि + अच् + भावे

उशन्ति = वश् + लट् + अन्ति

योजितात्मा = युज् + णिच् + क्त कर्मणि

विभक्ति निर्धारणः

ब्रह्मणि = अधिकरणे सप्तमी

समासः

वीर्य्यप्रभवः = वीर्य्य प्रभवः यस्य, बहुव्रीहि समास

योजितात्मा = योजितः आत्मा यथा सः, बहुव्रीहि समास



अग्रगत्याः निरीक्षणम्

प्रश्न ११: कुमारसम्भवस्य तृतीयसर्गस्य प्रथमश्लोके 'गौरवः' इति शब्दस्य अर्थः कः ?

.....

प्रश्न १२: 'अवैमि' इति शब्दस्य व्युत्पत्तिः का ?

.....

५.६ विशेषश्लोकानां भावार्थः

(क) तस्मिन् मघोनस्त्रिदशान् बिहाय सहस्रमक्ष्णां युगपत्पपात।
प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवं आश्रितेषु।।

देवतानां राज्ञः इन्द्रस्य सहस्रं चक्षुः कामदेवं प्रति पतति। स्वामी भृत्यं आवश्यकान् अधिकं स्नेहं करोति। ततः क्रमेण अन्तर्धानं भवति।

भृत्याः निम्नवर्गीयकर्मचारिणः वा स्वामिना उपेक्षिताः भवन्ति। ते तान् तुच्छान् पश्यन्ति। तेषां मते भृत्याः कदापि किमपि आश्चर्यकार्यं कर्तुं न शक्नोति, स्वामिनः एतादृशः मनोभावः। 'कुमारसम्भवम्' - महाकाव्यस्य तृतीय सर्गस्य प्रथमश्लोके देवराजः इन्द्रोऽपिमदनं (कामदेव) प्रति तादृशान् भानान् प्रकटयति। देवराजेन्द्रस्य राजसभायां कामदेवः चतुर्थः देवतावर्गः आसीत्। तदर्थं सः इन्द्रस्य समीपे गुरुत्वं न प्राप्नोति। किन्तु भयानकतारकासुरं वधाय सेनापतेः प्रयोजनम् आसीत्। केवलं शिव-पार्वत्योः पुत्रः तारकासुरं हन्तुं शक्नोति। तस्मिन् समये महादेवः कठोर तपस्यायां मग्नं आसीत्। केवलं कामदेवः तां तपस्यां भग्नं कर्तुं शक्नोति। अतः कामदेवस्य प्रयोजनम् आसीत्। तदा इन्द्रः राजसभायां कामदेवं प्रति पश्यति। सः कामदेवम् आहूय तस्य पार्श्वे उपविष्टुं प्रार्थितवान्। ततः कामदेवः भृत्यवत् राज्ञः आदेशं याचते।

अर्थात कामदेवः कदापि इन्द्रात् सम्मानं न प्राप्नोति, केवलं महादेवस्य तपस्यां भग्नाय इन्द्रः कामदेवं सम्मानं कृतवान्।

ख) अवैमि ते सारमतेः खलु त्वां कार्ये गुरु-कण्यात्मसमान नियोगे।
व्यादिष्यते भूधरतम्बेक्ष्यकृष्णेन देहोद्वहनाय शेषः।।

देवराजः इन्द्रः कामदेवं 'मित्रम्' इति सम्बोधनं कृत्वा अवदत् - महादेवस्य तपस्यां भग्नाय कामदेवरेव उपयुक्तः अस्त्रः भवति। इन्द्रस्य अस्त्र वज्रः अति शक्तिशाली परन्तु महादेवस्य तपस्या-भग्नाय समर्थः नासीत्। कामदेवस्य गति अप्रतिरोध्यः कार्यकरश्च अर्थात् तस्य अस्त्रपुष्पवाणं सर्वतः पतति। तदर्थं इन्द्रः कामदेवम् अस्मिन् कार्ये नियुक्तवान्। कामदेवः महादेवस्य तपस्यां

भग्नं कृत्वा तं पार्वतीं प्रति आकृष्टं कारयति। कारणं शिव-पार्वत्याः पुत्ररेव देवतानां तारकासुरात् रक्षितुं समर्थः भवति। यथा- भगवान् विष्णुः शेषनागस्य शक्तिं च पृथिवी-धारणस्य शक्तिं ज्ञात्वा तस्य शरीरस्य भारवहनाय आदेशं यच्छति स्म। तथैव देवराजः कामदेवस्य तस्मिन् कार्ये उपयुक्तं विचिन्त्य देवकार्यं सिध्द्यर्थं नियोजितवान्। देवतानां जयलाभाय महादेवस्य वीर्यसम्भूत-देवसेनापतेः कामना करोति। तदर्थम् इन्द्रः कामदेवं महादेवस्य तपस्यां भग्नितुं निर्देशं करोति।



५.७ अस्मात् अध्यायात् किमवगतम्

अस्मिन् अध्यायः अध्ययनं कृत्वा वयम् -

- श्लोकानां (१-१५) संस्कृतपाठगद्यपाठश्च ज्ञातुं शक्नुमः।
- प्रत्येकस्य श्लोकस्य अर्थं, असमीयानुवादं च अवगन्तुं शक्नुमः।
- प्रत्येकस्य श्लोकस्य व्याकरणसम्बन्धिनी टिप्पणीः तथा श्लोकानां विषयवस्तुम् अवगतम्।
- महत्त्वपूर्णश्लोकानां भावार्थविषये ज्ञातुं शक्नुमः।
- महत्त्वपूर्णश्लोकानां अर्थं ज्ञातवान्।
- 'कुमारसम्भवम्' महाकाव्यस्य तृतीयसर्गे 'मदनदहन' इति विषयं ज्ञातुं शक्नुमः।
- 'कुमारसम्भवम्' महाकाव्यस्य तृतीयसर्गस्य नामकरणस्य महत्वं ज्ञातुं शक्नुमः।



५.८ ज्ञानाधिक्यम्

१) काले, एम्. आर. कुमारसम्भवम् अफ कालिदास, मतिलाल बानारसीदास पाब्लिशार्स प्राइवेट लिमिटेड, दिल्ली।
२) देवगोस्वामी, हरमोहनः, संस्कृतसाहित्यर बुरञ्जी, चन्द्रप्रकाशः, गुवाहाटी।
३) बन्ध्योपाध्याय, धीरेन्द्रनाथः, संस्कृत साहित्येर इतिहासः, पश्चिमबङ्गराज्य पुस्तकबोर्डः, बंकिम चटर्जी मार्गः, कोलकाता-७०००७३।
४) शर्मा, थानेश्वरः। संस्कृतसाहित्यर इतिवृत्त, चन्द्रप्रकाशः, गुवाहाटी।
५) संस्कृतसाहित्यसम्भारः, द्वितीयखण्डः। अनुवादकः सुरारिमोहनः, तृतीयः सर्गः।
६) शइकिया बरा, इन्दिरा, कालिदासकृतः कुमारसम्भवम्, प्रकाशिका, पानबजारः, गुवाहाटी।



५.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : इन्द्रस्य सहस्रं चक्षुः कामदेवं प्रति पतति, यतः तारकासुरं हन्तुं देवसेनापतेः

आवश्यकता आसीत्। एषः कार्यः केवलं कामदेवस्य साहाय्येन भवितुं शक्नोति।

प्रश्नः २ उत्तरम् : कामदेवस्य सखा वसन्तः तथा पत्नि रतिदेवी।

प्रश्नः ३ उत्तरम् : मृगाः आनन्देन मोहिताः वृक्षेभ्यः पतितानां शुष्कपत्राणां उपरि धावन्ति स्म। कोकिलाः मधुरस्वरेण गीतं गायन्ति स्म। कृष्णमृगः मृगीं शृङ्गेन स्पृष्टवान्। चक्रवाकः मृणालखण्डं स्वपत्नीसहितं खादितवान्। एतद्रूपेण महादेवस्य आश्रमे पशुपक्षिणां मध्ये अकालवसन्तस्य प्रभावः जातः।

प्रश्नः ४ उत्तरम् : महादेवः समाधिस्थः आसीत्, तदा कामदेवः कामबाणं छित्त्वा तस्य समाधिं खण्डितवान्। ततः तस्य मनसि चञ्चलभावं प्राप्तम्। कारणं ज्ञातुं महादेवः सर्वत्र दृष्टवान्। तदा कामदेवः महादेवस्य क्रोधेन दग्धवान्। कामदेवस्य दहनं दृष्ट्वा रतिः मूर्च्छितवती।

प्रश्नः ५ उत्तरम् : पार्वती महादेवं पतिरूपेण प्राप्तुं इच्छन्ती तस्य आश्रमे उपस्थित्वा तं सेवितवती।

प्रश्नः ६ उत्तरम् : देवराज इन्द्रः।

प्रश्नः ७ उत्तरम् : देवराज इन्द्रः।

प्रश्नः ८ उत्तरम् : देवतानां शत्रुं अर्थात् तारकासुरं निर्दिशतः।

प्रश्नः ९ उत्तरम् : वज्रम्।

प्रश्नः १० उत्तरम् : शिवस्य अपरनाम।

प्रश्नः ११ उत्तरम् : आदरः वा स्नेहः।

प्रश्नः १२ उत्तरम् : अव+इ+ (गतौ) + लट् लकारः मि इति।



५.१० अभ्यासप्रश्नाः

क) वस्तुधर्मी-प्रश्नाः (प्रत्येकप्रश्नस्य उत्तरं ५० शब्दे लिखतु)

प्रश्नः १: कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य नामकरणस्य तात्पर्यं संक्षेपेण लिखतु।

ख) संक्षिप्तप्रश्नाः (प्रत्येकप्रश्नस्य उत्तरं १५० शब्दे लिखतु)

प्रश्नः २: कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य सारांशं लिखतु।

ग) निबन्धप्रश्नाः (प्रत्येक प्रश्नस्य उत्तरं ३०० शब्दे लिखतु)

प्रश्नः १: कुमारसम्भवस्य तृतीयसर्गे इन्द्र-कामदेवयोः संवादस्य वर्णनं प्रकटयतु।

प्रश्नः २: 'तस्मिन् मघोनस्त्रिदशान् विहाय सहस्रमक्ष्णां युगपत्पपात।
प्रयोजनाक्षया प्रभुणां प्रायश्चित्तं गौरवं आश्रितेषु'।।
उपरोक्तश्लोकस्य भावार्थं विस्तरेण लिखतु।

*** ***** ***

अध्यायः ६ : कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः १६-३०)

अध्यायस्य संरचना

६.१ उद्देश्यम्

६.२ परिचयः

६.३ तृतीयसर्गस्य (१६-३०) श्लोकानां संस्कृतपाठः

- ६.३.१ श्लोकानाम् अन्वयपाठः
- ६.३.२ श्लोकानां शब्दार्थः
- ६.३.३ श्लोकानाम् असमीयानुवादः

६.४ व्याकरणगतटिप्पणी

६.५ विशेषश्लोकानां भावार्थः

६.६ अध्यायात् किमवगतम्

६.७ ज्ञानाधिक्यम्

६.८ अग्रगत्याः निरूपणम्

६.९ अभ्यासप्रश्नाः

६.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- कुमारसम्भवम् महाकाव्यस्य तृतीयसर्गस्य श्लोकानां (१६-३०) संस्कृतपाठः पठितुं शक्नुवन्ति। ततः गद्यपाठःशब्दार्थःअसमीयानुवादः च पठितुं शक्नुवन्ति।
- कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्थितांशरेकस्य विषयवस्तुविषये भवन्तः विचारं प्राप्नुवन्ति।
- श्लोकानान्तर्गतानां दुरूहशब्दसमूहनां व्याकरणविधानं अवगन्तुं शक्नुवन्ति।
- कुमारसम्भवस्य तृतीयसर्गस्थितं अकालवसन्तवर्णनं पठितुं शक्नुवन्ति।

६.२ परिचयः

भवद्भिः पूर्वमेव कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य (१-१६) श्लोकान् अध्ययनं कृतम्। अस्मिन् अध्याये इन्द्रकामदेवयोः सम्भाषणं अपि पठितम्।

अध्यायेऽस्मिन् तृतीयसर्गस्य (१६-३०) एतेषां श्लोकानां अध्ययनं कर्तुं शक्नुवन्ति। श्लोकानां संस्कृतपाठेन सह शब्दार्थं असमीयानुवादं च पठितुं शक्नुवन्ति, अपि च दुरूहशब्दानां व्याकरणात्मकम् अध्यायनं च ज्ञातुं शक्नुवन्ति। इतोऽपरि अकालवसन्ते प्रकृतौ जायमाना क्रिया, शिवस्य समाधिभङ्गात् च मदनदेवस्य स्थितिविषयकयं ज्ञानं समुपलभ्यते।

६.३ कुमारसम्भवस्य तृतीयसर्गस्य (१६-३०) श्लोकानां संस्कृतपाठः

अधुना भवान् कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य (१६-३०) श्लोकानां संस्कृतपाठः पठितुं शक्नोति।

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व।
योषित्पु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम् ॥ १६ ॥
गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम्।
अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः ॥ १७ ॥
तदृच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव।
अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः ॥ १८ ॥
तस्मिन् सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वम्।
अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ॥ १९ ॥
सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम्।
चापेन ते कर्म न चातिहिंस्रमहो बतासि स्पृहणीयवीर्यः ॥ २० ॥
मधुश्च ते मन्मथ साहचर्यादसावनुक्तोऽपि सहाय एव।
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य ॥ २१ ॥
तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे।
ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः ॥ २२ ॥
स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः।
अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम ॥ २३ ॥
तस्मिन्वने संयमिनां मुनीनां तपः समाधेःप्रतिकूलवर्ती।
सङ्कल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे ॥ २४ ॥
कुवेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिःश्वासमिवोत्पसर्ज ॥ २५ ॥
असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि।
पादेन नापैक्षत सुन्दरीणां सम्पर्कमासिञ्जितनूपुरेण ॥ २६ ॥
सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे।
निवेशयामास मधुद्विरेफान्नामाक्षराणीव मनोभवस्य ॥ २७ ॥
वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥ २८ ॥
बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥ २९ ॥
लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार ॥ ३० ॥



क्षम+इति+आत्मभुवा +उपदिष्टम्



मधु = वसन्त
मन्मथ= कामदेव



स्थाण्वाश्रम = शिवाश्रम



अभिमान = अहङ्कार



मनोभव= कामदेव



लग्नद्विरेफाञ्जन-भक्ति चित्र = वसन्तस्य शोभा कृष्णभ्रमररूपकाजलरेखाः इव

६.३.१ श्लोकानाम् अन्वयपाठः

अधुना 'कुमारसम्भवम्' इति महाकाव्यस्यतृतीयसर्गस्य उपरि उल्लिखितानां श्लोकानां अन्वयःपठितुं शक्यते –



विश्वसृजः = विधाता

१६) यतात्मने तस्मै हिमाद्रेः प्रयतां तनूजां रोचयितुं यतस्व, योषित्पु तद्वीर्यनिषेकभूमिः सा एव क्षमा (योग्या) इति आत्मभुवा उपदिष्टम्।

१७) नगेन्द्रकन्या च गुरोः (पितुः) नियोगात् अधित्यकायां तपस्यन्तं स्थाणुम् अन्वास्ते इति अप्सरसां मुखेभ्यः मया श्रुतम्। सः वर्गः मत्प्रणिधिः।

१८) तत् सिद्ध्यै गच्छ, देवकार्यं कुरु, अयम् अर्थः अर्थान्तरभाव्य एव। (तथापि) बीजाङ्कुरः उदयात् प्राक् अम्भः इव त्वाम् उत्तमं प्रत्ययम् अपेक्षते।



मन्मथ =कामदेव

१९) सुराणां विजयाभ्युपाये तस्मिन् अस्त्रगतिः तव एव नाम, त्वं कृती, हि अप्रसिद्धम् अपि अनन्यसाधारणम् एव कर्म पूंसां यशसे।

२०) एते सुराः समभ्यर्थयितारः (भवन्ति)। कार्यं त्रयाणाम् अपि पिष्टपानाम्, कर्म ते चापेन, अतिहिंस्रं च न, अहो बत स्पृहणीयवीर्यः असि।

२१) हे मन्मथ! असौ मधुः च ते साहचर्यात् अनुक्तः अपि सहाय एव, समीरणः हुताशनस्य नोदयिता भव इति केन व्यादिश्यते।



माधव = बसन्त

२२) तथा इति भर्तुः शेषाम् (मालाम्) इव आज्ञां मूर्ध्ना आदाय मदनः प्रतस्थे। इन्द्रः ऐरावतास्फलनकर्कशेन हस्तेन तदङ्गं पस्पर्श।

२३) सः अभिमतेन सख्या माधवेन रत्या च साशङ्कम् अनुप्रयातः (सन्) अङ्गव्यय प्रार्थितकार्यसिद्धिः हैमवतं स्थाण्वाश्रमं जगाम।

२४) तस्मिन् वने संयमिनां मुनीनां तपः समाधेः प्रतिकूलवर्ती मधुः सङ्कल्पयोनेः अभिमानभूतम् आत्मानम् आधाय जजृम्भे।



द्विरेफ = भ्रमर

२५) उष्णरश्मौ (सूर्ये) समयं विलंघ्य कुबेरगुप्तां दिशं (उत्तरदिशं) गन्तुं प्रवृत्ते (सति) दक्षिणा दिक् मुखेन गन्धवहं (वायुं) व्यलीकनिःश्वासम् इव उत्पसर्ज।

२६) अशोकः सद्यः स्कन्धात् प्रभृति एव सपल्लवानि कुसुमानि असूत आसिञ्चितनूपुरेण सुन्दरीणां पादेन सम्पर्कं न अपैक्षत (न अपेक्षितवान्)।

२७) मधुः प्रवालोद्गमचारुपत्रे नवचुतबाणे समाप्तिं नीते सद्यः मनोभवस्य नामाक्षराणि इव द्विरेफान् निवेशयामास।

२८) कर्णिकारं वर्णप्रकर्षे सति निर्गन्धतया चेतः दुनोति स्म, प्रायेण विश्वसृजः प्रवृत्तिः गुणानां सामग्र्यविधौ पराङ्मुखी।

२९) अविकासभावात् बालेन्दुवक्राणि अतिलोहितानि पलाशानि सद्यः वसन्तेन समागतानां वनस्थलीनां नखक्षतानि इव बभुः।

३०) मधुश्रीः लग्नद्विरेफाञ्जन भक्तिचित्रं तिलकं मुखे (आदौ) प्रकाश्य (पश्चात्) बालारुणकोमलेन रागेण चुत प्रवालोष्ठम् अलञ्चकार।

६.३.२ श्लोकानां शब्दार्थः

अधुना 'कुमारसम्भवम्' इति महाकाव्यस्य तृतीयसर्गस्य (१६-३०) श्लोकानां शब्दार्थं पठितुं शक्यते -

श्लोकः १६

यतात्मने तस्मै हिमाद्रेः प्रयतां तनुजां (মহাদেৱলৈ হিমালয়ৰ পৱিত্ৰ কন্যাক (পার্বতীক) আকর্ষণ কৰিবলৈ যত্ন কৰা হওক), योषित्पु (স্ত্রীসকলৰ ভিতৰত), तद्वीर्य्यं निषेकभूमिः (শিৱবীর্যধাৰণ কৰিব পৰা), सैव (পার্বতীয়েই) क्षमेत्यात्माभुवोपदिष्टम् (কেবল সমর্থ, এই কথা ব্রহ্মাই (প্রজাপতিয়ে) কৈছে)।

श्लोकः १७

नगेन्द्रकन्या गुरोः (पितुः) नियोगात् (হিমালয়ৰ কন্যা পার্বতীয়ে পিতৃৰ দ্বাৰা নিযুক্তি পোৱাত), अधित्यकायां तपस्यन्तं स्थानुम् (হিমালয়ৰ উচ্চ শিখৰত মহাদেৱক তপস্যা কৰি আছে), अन्वास्ते इति अप्सरसां मुखेभ्यः मया श्रुतम् (এই কথা মই অপ্সৰাসকলৰ পৰা জানিব পাৰিছো), स वर्गः मत्प्राणिमिः (কাৰণ, তেওঁলোক মোৰেই গুপ্তচৰ)।

श्लोकः १८

तत् सिद्ध्यै गच्छ (সেই কাৰণে সিদ্ধিৰ বাবে যোৱা), देवकार्यं कुरु (দেৱতাসকলৰ বাবে কর্ম কৰা), अयम् अर्थः अर्थान्तरभाव्य एव (এই কামটো অন্য এটা কামৰ দ্বাৰা সফল হোৱাৰ যোগ্য), (तथापि) बीजाङ्कुरः उदयात् प्राक् अम्भ इव (যিদৰে গজালি ওলোৱাৰ আগতে বীজে পানীৰ বাবে অপেক্ষা কৰে), उत्तमं प्रत्ययं त्वां अपेक्षते (তোমাকেই উত্তম কাৰণৰূপে অপেক্ষা কৰি আছে)।

श्लोकः १९

सुराणां विजयाभ्युपाये (দেৱতাসকলৰ বিজয় লাভৰ বাবে), तस्मिन् अस्त्रगतिः तव एव (তোমাৰেই অস্ত্ৰৰ গতি আছে), त्वं कृती (তুমি কীর্তিমান), अप्रसिद्धम् अपि अनन्यसाधारणं कर्म (আনে কৰিব নোৱাৰা এটা কাম অপ্রসিদ্ধ হ'লেও) पुंसां यशसे हि (পুৰুষৰ বাবে যশস্যাৰ কাৰণ হয়)।

श्लोकः २०

एते सुराः समभ्यर्थयितारः (भवन्ति) (এই দেৱতাসকল তোমাৰ সন্মুখত অর্থী), कार्यं त्रयाणाम् अपि विष्टपानाम् (भुवनानां भवति) (কামটোও ত্রিভুৱনৰ মঙ্গলৰ কাৰণে), कर्म ते चापेन (साध्यम्) (এই কামটোও তোমাৰ ধনুৰ দ্বাৰাই সিদ্ধ হ'ব), अतिहिंस्रं च न (অতি হিংস্ৰও নহয়) त्वं स्पृहणीय वीर्यः असि (তোমাৰ পুৰুষার্থ (শক্তি) প্রশংসনীয়)

শ্লোকঃ ২১

হে মন্মথ (হে কামদেৱ), অসৌ মধুঃ চ তে সাহচর্য্যাদ্ অনুক্তঃ অপি সহায এব (সাহচর্য গুণ থকাৰ বাবে বসন্ত তোমাৰ সহায়ক হ'বই), সমীরণঃ হুতাশনস্য নোদয়িতা ভব (অগ্নিক জ্বলোৱা বুলি বতাহক), ইতি (এই বুলি) কেন ব্যাদিশ্যতে (কোনেনো আদেশ দিয়ে)।

শ্লোকঃ ২২

ভর্তুঃ শেষাম্ (মালাম্) ইব আজ্ঞাং মূর্ধ্নাং আদায (গৰাকীৰ আদেশ ফুলৰ মালা শিৰেৰে গ্রহণ কৰাৰ দৰে), মদনঃ প্রতস্থে (কামদেৱে প্রস্থান কৰিলে), ইন্দ্রঃ ঐরাবতাস্ফালন কর্কশেন হস্তেন (ঐৰাৱতক পৰিচর্যা কৰাৰ বাবে খহতা হোৱা হাতেৰে) তদঙ্গং পস্পর্শ (তেওঁৰ (কামদেৱৰ) শৰীৰ স্পর্শ কৰিলে)।

শ্লোকঃ ২৩

সঃ অভিমতেন সখ্যা (কামদেৱে মনোবাঞ্ছিত সখী) মাধবেন রত্যা চ সাশঙ্কম্ (বসন্তক আৰু প্রিয়তমা পত্নী ৰতিকলৈ আশঙ্কাৰে), অঙ্গব্যয় প্রার্থিত কার্যসিদ্ধিঃ (দেহৰ ক্ষতি কৰি হ'লেও কার্য সিদ্ধিৰ বাবে), হৈমবতং স্থাণ্বাশ্রমং জগাম (হিমালয়ৰ উচ্চ শিখৰত শিৱৰ তপস্যাভূমিত উপস্থিত হ'লগৈ)।

শ্লোকঃ ২৫

তস্মিন্ বনে (সেই আশ্রমত) সংযমিনাং মুনীনাং (সংযমী মুনিসকলৰ), তপঃ সমাধেঃ প্রতিকূলবর্তী (তপস্যা সমাধিৰ বাবে প্রতিকূল), মধুঃ সঙ্কল্পযোনেঃ (কামদেৱৰ অহংকাৰ স্বৰূপ বসন্ত ঋতুৱে), আত্মানম্ আধায় জজৃম্ভে (নিজকে প্রকাশ কৰি আবির্ভাৰ হ'ল)।

শ্লোকঃ ২৫



স্কন্ধাত্ = প্রকাণ্ডত গা-গছৰ পৰা

উষ্ণরশ্মৌসময়ং বিলঙ্ঘ্য (সূর্যই সময় উলংঘা কৰি), কুবেরগুপ্তাং দিশংগন্তুং প্রবৃত্তে (সতি) (উত্তৰ দিশলৈ যাবলৈ উদ্যত হ'ল), দক্ষিণা দিক্ মুখেন গন্ধবহং ব্যলীক নিঃশ্বাস ইব (দক্ষিণ দিশৰূপী নায়িকাই যেন মুখেৰে দুখৰ নিঃশ্বাসৰ দৰে বতাহ), উৎপসর্জ (ত্যাগ কৰিছিল)।

শ্লোকঃ ২৬

অশোকঃ সদ্যঃ স্কন্ধাত্ প্রভৃতি এব সপল্লবানি (অশোক গছবিলাকে আনকি গা-গছৰ পৰাও পল্লৱেৰে সৈতে), কুসুমানি অসূত (ফুলবোৰৰ জন্ম দিছিল), আসিঞ্জিতনূপুরেণ সুন্দরীণাং পাদেন ন অপৈক্ষত (সুন্দৰী ৰমণীসকলৰ নূপুৰেৰে ধ্বনিত হৈ থকা পাদস্পর্শ অপেক্ষা কৰা নাছিল)।

শ্লোকঃ ২৭

মধুঃ প্রবালোদ্গমচারুপত্রে (বসন্তই বাণ নির্মাণকাৰী কোমল কুঁহিপাত), নবচূতবাণে সমাপিং নীতে (মনোৰম পাখিবিশিষ্ট নতুন বাণ নির্মাণ কৰি), সদ্যঃ মনোভবস্য নামাক্ষরাণি

ইব দ্বিরেফান্ নিবেশয়ামাস (ধনুর্ধাৰী কামদেৱৰ নামৰ অক্ষৰৰূপত তাতে কালভ্ৰমৰমালা যেন নিবেশিত হ'ল)।

নবচূতবাণে = নবচুতেঃ একবাণে

শ্লোকঃ ২৮

কর্ণিকারং বর্ণপ্রকর্ষে সতি (মদাৰফুল বৰ্ণত উৎকৃষ্ট হোৱা সত্বেও), নির্গন্ধতয়া চেতঃ দুনোতি স্ম (গোন্ধ নোহোৱা বাবে মনক নিৰানন্দিত কৰে), প্রায়েণ বিশ্বসৃজঃ প্রবৃত্তিঃ গুণানাং সামগ্র্যবিধৌ পরাঙ্মুখী (গুণসমূহৰ একীকৰণৰ ক্ষেত্রত সৃষ্টিকর্ত্তাৰ ইচ্ছা প্রায়েই বিপৰীতমুখী)।

শ্লোকঃ ২৯

অবিকাসভাবাত্ বালেন্দুবক্রাণি অতিলোহিতানি পলাশানি সদ্যঃ (অতি ৰঙা ৰঙৰ পলাশ ফুলবিলাক সম্পূর্ণকৈ ফুলি নুঠা বাবে কাচি জোনৰ নিচিনাকৈ বেঁকা হৈছিল), বসন্তেন সমাগতানাং বনস্থলিনাং নখক্ষতানি ইব বভুঃ (এনে লাগিছিল যেন সেইবিলাক এইমাত্র বসন্তৰ সৈতে লগ লগা বনস্থলীৰূপ নায়িকাৰ গাৰ নখৰ আঁচোৱহে আছিল)।

বালেন্দুঃ = বালঃ (নবোদিতঃ) ইন্দুঃ। (নতুকৈ হোৱা চন্দ্রমা)

শ্লোকঃ ৩০

মধুশ্রীঃ লগ্নদ্বিরেফাঞ্জনভক্তিচিত্রং তিলকং মুখে (আদৌ) প্রকাশ্য (পশ্চাত্) (বসন্তৰশোভা, কালভ্ৰমৰৰূপ অঞ্জনৰেখা চিত্রিত শুভ তিলপুষ্প প্রথমে বিকশিত কৰি), বালারুণ কোমলেন রাগেন চুত প্রবালোষ্ঠম্ অলঙ্চকার (পিছত নতুনকৈ ওলোৱা সূর্যৰ কিৰণৰ দৰে ৰঙা আম্রপুষ্পৰূপ ৰঙা অধৰক (ওঠক) অলঙ্কৃত কৰিছিল)।



ज्ञातव्यम्

শ্লোকঃ ১৩ – নগেন্দ্রকন্যা = হিমালয়স্য কন্যা পার্বতী।

শ্লোকঃ ২২ – শেষামিব = 'শেষম্' ইতি শব্দঃ পুষ্পমালায়াঃ বোধকঃ। পুষ্পমালাং শিরসা যথা স্বীকৃতং, তথৈব দেবরাজস্য ইন্দ্রস্য আজ্ঞাং কামদেবেন শিরসা স্বীকৃতম্।

শ্লোকঃ ২৫ – কুবেরগুপ্তম্ = কুবেরঃ ধনপতেঃ নাম। সঃ উত্তরে দিশায়াঃ অধিপতিঃ অস্তি।

৬.৩.৩ শ্লোকানাম্ অসমীয়ানুবাদঃ


অধুনা ভবান্ কুমারসম্ভবমহাকাব্যস্য তৃতীয়সর্গস্য (১৬-৩০) শ্লোকানাং অসমীয়ানুবাদাঃ অপি পঠিতুং শক্নোতি। যথা –

- মহাদেৱলৈ হিমালয়ৰ পবিত্র কন্যাক (পার্বতীক) আকর্ষণ কৰিবলৈ যত্ন কৰা হওক। স্ত্রীসকলৰ ভিতৰত মহাদেৱৰ বীর্য গর্ভত ধাৰণ কৰিবলৈ কেৱল তেওঁৱেই (পার্বতীয়েই) সমর্থ, (এই কথা ব্রহ্মা অর্থাৎ প্রজাপতিয়ে কৈছে)।
- হিমালয়ৰ কন্যা পার্বতীয়ে পিতৃৰ দ্বাৰা নিযুক্তি পোৱাত হিমালয়ৰ উচ্চ শিখৰত তপস্যাৰত মহাদেৱক পৰিচর্যা কৰি আছে। এই কথা মই অঙ্গৰাসকলৰ মুখৰ

পৰা জানিব পাৰিছোঁ। কিয়নো, সিহঁত মোৰেই প্ৰতিনিধি।

- গতিকে (কার্য) সিদ্ধিৰ বাবে যোৱা। দেৱতা সকলৰ বাবে কর্ম কৰা, দেৱতাৰ কার্য (যদিও) এই কামটো অন্য এটা কামৰ দ্বাৰা সফল হোৱাৰ যোগ্য, তথাপি যিদৰে গজালি ওলোৱাৰ আগতে বীজে পানীৰ বাবে অপেক্ষা কৰে, ঠিক সেইদৰেই এই কামটোৱেও তোমাকেই উত্তম কাৰণ ৰূপে অপেক্ষা কৰি আছে।
- দেৱতাসকলৰ বিজয়লাভৰ কাৰণ মহাদেৱৰ ওপৰত তোমাৰেই অস্ত্রগতিৰ সম্ভাবনা আছে। সেয়ে তুমি কীর্তিমান। আনে কৰিব নোৱাৰা কাম এটা অপ্রসিদ্ধ হ'লেও পুৰুষৰ বাবে সেয়া যশস্যাৰ কাৰণ হয়।
- এই দেৱতা সকল তোমাৰ সম্মুখত অর্থী অর্থাৎ (যাচক) আৰু কামটোও ত্রিভুৱনৰ মঙ্গলৰ বাবে। এই কামটোও তোমাৰ ধনুৰ দ্বাৰাই সিদ্ধ হ'ব আৰু অতি প্রাণঘাতকো নহয়, তোমাৰ পুৰুষার্থ অতীৱ প্রসংশনীয়।
- হে কামদেৱ ! সাহচর্য গুণ থকাৰ বাবে বসন্ত তোমাৰ সহায়ক হ'বই অর্থাৎ তুমি নকলে বা নিবিচাৰিলেও সহায়ক হ'ব। যিদৰে 'অগ্নিক জ্বলোৱা' বুলি বতাহক ববলৈ কোনেনো আদেশ দিয়ে।
- তাৰ পিছত কামদেৱে 'এয়ে হ'ব' এইবুলি কৈ গৰাকীৰ অর্থাৎ ইন্দ্রৰ আদেশ ফুলৰ মালা গ্রহণ কৰাৰ দৰেই শিৰোধার্য কৰি প্রস্থান কৰিলে। ইন্দ্রই ঐৰাৱতক (হাতীক) পৰিচর্যা কৰি খহতা হোৱা হাতেৰে তেওঁৰ অর্থাৎ কামদেৱৰ পিঠিত হাতফুৰাই আশীর্বাদ দিলে।
- কামদেবে মনোবাঞ্ছিত সখী বসন্তক আৰু প্রিয়তমা পত্নী ৰতিদেৱীক লগত লৈ আশঙ্কাৰে নিজ দেহৰ ক্ষতি কৰি হ'লেও কার্যসিদ্ধিৰ বাবে হিমালয়ৰ উচ্চ শিখৰত শিৱৰ তপস্যা ভূমিত উপস্থিত হ'লগৈ।
- সেই আশ্রমত সংযমী মুনিসকলৰ তপস্যা সমাধিৰ বাবে প্রতিকূল, কামদেৱৰ অভিমান স্বৰূপ বসন্ত ঋতুৱে নিজকে প্রকাশিত কৰি আবির্ভাৱ হ'ল।
- সূর্যই সময় উলংঘা কৰি উত্তৰ দিশলৈ যাবলৈ উদ্যত হোৱাত দক্ষিণ দিশ ৰূপী নায়িকাই যেন মুখেৰে দুখৰ নিশ্বাসৰ দৰে বতাহ ত্যাগ কৰিছিল।
- আশোক গছবিলাকে আনকি গা-গছৰ পৰাও পল্লবেৰে সৈতে ফুলবোৰৰ জন্ম দিছিল, সুন্দৰী ৰমণীসকলৰ নুপুৰেৰে ধ্বনিত হৈ থকা পাদস্পর্শৰ বাবে অপেক্ষা কৰা নাছিল।
- বাণনির্মাণকাৰী বসন্তই নতুন অংকুৰৰূপ মনোৰম পাখিবিশিষ্ট চূতবাণ নির্মাণ কৰি ধনুর্ধাৰী কামদেৱৰ নামৰ অক্ষৰৰূপত তাতে কালভ্রমৰমালা যেন বহুৱাই দিলে।
- মদাৰফুল বৰণত উৎকৃষ্ট হোৱা সত্বেও গোন্ধহীন বাবে মনক নিৰানন্দিত কৰে। গুণবিলাকৰ একীকৰণৰ ক্ষেত্রত সৃষ্টিকর্ত্তাৰ ইচ্ছা প্রায়েই বিপৰীত মুখী হয়।

- অত্যন্ত ৰক্ত বৰণৰ পলাশ ফুলবিলাক সম্পূৰ্ণকৈ ফুলি নুঠা বাবে কাঁচি জোনৰ নিচিনাকৈ বেঁকা হৈছিল। এনেকুৱা লাগিছিল যেন সেইবিলাক এইমাত্ৰ বসন্তৰ সৈতে লগ লগা বনস্থলীৰূপ নায়িকাৰ গাৰ নখৰ আঁচোৰহে আছিল।
- বসন্তৰশোভা, কালভ্রমৰৰূপ অঞ্জনৰেখা চিত্রিত শুভ্র তিলপুষ্প প্রথমে বিকশিত কৰি পাছত নতুনকৈ ওলোৱা সূর্যৰ কিৰণৰ দৰে ৰঙা আম্রপুষ্পৰূপ ৰঙা অধৰক অলঙ্কৃত কৰিছিল।



अग्रगति निरीक्षणम्

प्रश्नः १: कामदेवस्य पत्नि का अस्ति ?

.....

प्रश्नः २: कामदेवः केन सह शिवस्य आश्रमं गतवान् ?

.....

प्रश्नः ३: 'स्थाणु' इति शब्देन कः बोध्यते ?

.....

प्रश्नः ४: उष्मरश्मि कस्य नाम लेखतु ?

.....

प्रश्नः ५: 'द्विरेफ' इति किमर्थं बोधयति ?

.....

६.४ व्याकरणगतटिप्पणी

अधुना भवान् कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य (१६-३०)श्लोकानां व्याकरणगतटिप्पणी पठितुं शक्नोति-

श्लोकः १६

व्युत्पत्तिः

प्रयताम् = प्र + यम् + क्त कर्त्तरि स्त्रियाम्

तनुजाम् = तनु + जन + ड टाप्, द्वितीया एकवचन

यतस्व = यत् + लोट् मध्यमपुरुष एकवचन

निषेकः = नि- सिच् घञ्

आत्मभुवा = आत्मना भवतीति आत्मन् + भू + क्विप् + कर्त्तरि।

विभक्ति निर्णय :

योषित्सु = निर्धारणे सप्तमी।

तस्मै = 'रुच्यर्थानां प्रीयमाणः' योगे चतुर्थी।

समासः

यतात्मने = यत आत्मा तस्मै यस्य बहुव्रीहि समासः, तस्य।

तद्वीर्य = तस्य वीर्यम् = षष्ठी तत्पुरुष समासः।

हिमाद्रेः = हिमस्य अद्रिः, षष्ठी तत्पुरुष समासः, तस्य।

श्लोकः १७

व्युत्पत्तिः

नियोगात् = नि - युज् + घञ्।

तपस्यन्तम् = तपस् + क्यङ् + शतृ, द्वितीया एकवचन।

अन्वास्ते = अनु- आस् + लट् + ते।

विभक्ति निर्णय :

नियोगात् = हेतौ पञ्चमी।

मुखेभ्यः = अपादाने पञ्चमी।

समासः

मत्प्रणिधिः = मम प्रणिधिः = षष्ठी तत्पुरुष समासः।

नगेन्द्रकन्या = नगानाम् इन्द्रः, षष्ठी तत्पुरुष समासः।

नगेन्द्रकन्या = नगेन्द्रस्य कन्या, षष्ठी तत्पुरुष समासः।

श्लोकः १८

व्युत्पत्तिः

सिद्ध्यै = सिध् + क्तिन् भावे।

अपेक्षते = अप-इक्ष् + लट् + ते।

उदयात = उद् + इ + अच् भावे।

विभक्ति निर्णय :

सिद्ध्यै = ताद्यर्थे चतुर्थी।

उदयात् = प्राक् शब्दयोगे पञ्चमी।

समासः

देवकार्यम = देवानां कार्यम, षष्ठी तत्पुरुष समासः।

बीजाङ्कुरः= बीजेन साध्य अङ्कुरः, मध्यपदलोपि तत्पुरुष समासः।

श्लोकः १९

व्युत्पत्तिः

विजयभ्युपाये= वि - जि- अच् भावे।

अभ्युपाये = अभि- अप + इ + अच्।

कृती = कृत + इनि - कृतिन् प्रथमा एकवचन।

विभक्ति निर्णय :

तस्मिन् = अधिकरणे सप्तमी।

यशसे = तादर्थे चतुर्थी विभक्ति।

समासः

अप्रसिद्धम् = न प्रसिद्धम्, नञ् तत्पुरुष समासः।

अस्त्रगतिः = अस्त्रस्य गतिः, तत्पुरुष समासः।

विजयाभ्युपाये = विशिष्ट जयः, प्रादि तत्पुरुष समासः,

विजयः, विजयस्य अभ्युपायः, तत्पुरुष समासः।

श्लोकः २०

व्युत्पत्तिः

समभ्यर्थयितारः = सम् – अभि + अर्थ् + णिच् कर्तरि।

असि = अस् + लट् + सि।

विभक्ति निर्णय :

चापेन = करणे तृतीया।

स्पृहनीय = स्पृह् + अनीय।

विष्टपानाम् = सम्बन्धे षष्ठी।

समासः

स्पृहणीयवीर्यः = स्पृहणीयं वीर्य यस्य, बहुव्रीहि समासः।

श्लोकः २१

व्युत्पत्तिः

मन्मथः = मन् + क्विप, मथ (भ्वादि) अच् कर्तरि।

हुताशनस्य = हुत + अश् + ल्यट् कर्त्तरि बहुलकात्।

नोदयिता = नुद्–निच् + तृच, प्रथमा एकवचन।

भव = भु+ लोट् हि।

व्यादिश्यते = वि–आ + दिश् + लट् ते कर्मणि।

उक्त = वच् + क्त।

विभक्ति निर्णय :

साहचर्यात = हेतौ पञ्चमी।

समासः

हुताशनम् = हुतम् अश्नाति, उपपद् तत्पुरुष समासः।

अनुक्तः= न उक्तः, नञ् तत्पुरुष।

श्लोकः २२

व्युत्पत्तिः

आदाय = आ-दा + ल्यप्।

प्रतस्थे = प्र-स्था + लिट् + ए।

पस्पर्श = स्पृश् + लिट् अ।

विभक्ति निर्णय :

मूर्ध्ना = करणे तृतीया।

समासः

तदङ्गम् = तस्य अङ्गम्, षष्ठी तत्पुरुष।

श्लोकः २३

व्युत्पत्तिः

अभिमतेन = अभि + मन् + क्त कर्तरि।

हैमवतम् = हिम + वतुप्, हिमवत् + अण्।

जगाम = गम् + लिट् अ।

अनुप्रयातः = अनु - प्र + या + क्त।

विभक्ति निर्णय :

सख्या = कर्तरि तृतीया।

समासः

साशङ्कम् = आशङ्कया सह वर्तमानम्, तुल्ययोगे बहुव्रीहि समासः।

अङ्गव्यय = अङ्गस्य व्ययः, षष्ठी तत्पुरुष समासः।

स्थाण्वाश्रमम् = स्थाणोः आश्रमः, षष्ठी तत्पुरुष समासः, तम्।

श्लोकः २४

व्युत्पत्तिः

संयमिनां = सम् + यम् + इनि, षष्ठी वहुवचन

समाधेः = सम् - आ + धा कि

प्रतिकूलवर्ती = प्रतिकूल + वृत् + णिनि

आधाय =आ - धा + ल्यप्

जजृम्भे = जृम्भ् + लिट् + ए

विभक्ति निर्णय :

वने = अधिकरणे सप्तमी।

समासः

तपः समाधेः = तपसः समाधिः, षष्ठी तत्पुरुष समासः।

प्रतिकूलवर्ती = प्रतिकूलं वर्तते, उपपद् तत्पुरुष समासः।

श्लोकः २५

व्युत्पत्तिः

विलङ्घ्य = वि – लङ्घ् + णिच् + ल्यप्।

उत्पसर्ज =उत् + सृज् + लिट् अ।

गन्धवहम् = गन्ध + वह् + अच्, द्वितीया एकवचन।

विभक्ति निर्णय :

ऊष्णरश्मौ = भावे सप्तमी।

मुखेन = करणे तृतीया।

समासः

ऊष्णरश्मौ = ऊष्णाः रश्मयः यस्य, बहुव्रीहि समासः, सः तस्मिन्।

व्यलीकनिश्वासम् = व्यलीकेन निःश्वासः, तृतीया तत्पुरुष, तम्।

गन्धवहम् = गन्धस्य वहम्, षष्ठी तत्पुरुष समासः।

श्लोकः २६

व्युत्पत्तिः

असूत = सू + लङ् त।

अपैक्षत = अप + ईक्ष् + लङ् त।

आसिञ्चित् = आ – सिञ्च् + क्त कर्त्तरि।

विभक्ति निर्णय :

स्कन्धात् प्रभृति = प्रभृति शब्दयोगे पञ्चमी।

पादेन = सह शब्दयोगे तृतीया।

समासः

सपल्लवानि = पल्लवैः सह वर्तमानानि, तुल्ययोगे बहुव्रीहि समासः , तानि।

श्लोकः २७

व्युत्पत्तिः

उद्गम = उद्–गम् + अप भावे।

निवेशयामास = नि – विश् + णिच् + लिट् अ।

मनोभवः = मनस् + भू + अच् कर्त्तरि।

विभक्ति निर्णय :

नवचूतबाणे = भावे सप्तमी।

मनोभवस्य = शेषे षष्ठी।

समाप्तिं = कर्मणि द्वितीया।

समासः

प्रवालोद्गम चारुपत्रे = प्रवालोद्गमाः चारुपत्रे यस्य, बहुव्रीहि समासः।

तस्मिन् प्रवालोद्गमः = प्रवालस्य उद्गमः, षष्ठी तत्पुरुष समासः।

मनोभवस्य = मनसि भवः, सप्तमी तत्पुरुष समासः, तस्य।

श्लोकः २८

व्युत्पत्तिः

श्लोकः ५१

व्युत्पत्ति :

पश्यन् = दृश + शतृ, प्रथमा एकवचन।

अलक्षयत = लक्ष् + णिच् + लङ् द।

अघृष्यम्= न + घृष् + यत्, द्वितीया एकवचन।

विभक्ति निर्णय :

मनसा- करणे तृतीया

स्वहस्तात् - अपादाने पञ्चमी।

समास :

माध्वसम्नन्नहस्तः = मन्नौ हस्तौ यम्य, बहुव्रीहि समासः।

सन्नहस्तः = माध्वसेन सन्नहस्तः,तृतीया तत्पुरुषःसमासः।

अयुग्मनेत्रम् = अयुग्मानि नेत्राणि यस्य सः, बहुव्रीहि, तम्।

श्लोक : ५२

व्युत्पत्ति :

भूयिष्ठम् = बहु + इष्ठन, द्वितीया एकवचन।

सन्धुक्षयन्ती = सम् + धुक्ष् + निच् + शतृ + ङीप्, प्रथमा एकवचन।

अनुप्रयाता = अनु- प्र + या +क्त + टाप्, प्रथम पुरुष एकवचन।

अदृश्यत = दृश् + लङ् प्रथम पुरुष एकवचन (कर्मणि)।

विभक्ति निर्णय :

वपुर्गुणेन = करणे तृतीया

समासः

निर्वाणभूयिष्ठाम् - निर्वाणेन भूयिष्ठः, तृतीया तत्पुरुषः, तम्।

स्थावरराजकन्या = स्थावरराजस्य कन्या, षष्ठी तत्पुरुष।

श्लोक : ५३

व्युत्पत्ति :

आकृष्ट = आ – कृष् + क्त।

वहन्ती = वह् + शतृ + ङीप् प्रथम पुरुष एकवचन।

निर्भत्पित = निर् – भर्त्स + क्त।

समास :

अशोकनिर्भत्पितपद्मरागम् = अशोकेन निर्भत्पिताः पद्मरागा येन,वहुव्रीहि समासः, तत्।

आकृष्टहेमद्युतिकर्निकारम् = हेम्नः द्युतिः, षष्ठी तत्पुरुषः। आकृष्टाः हेमेद्युतिः यैः, बहुव्रीहिसमासः, तानि, आकृष्टहेमद्युतीनि। आकृष्टहेमद्युतीनि कर्णिकारानि यस्मिन्, बहुव्रीहि समासः, तत्।

मुक्तकलापीकृतसिन्धुवारम् = मुक्तानां कलापाः, षष्ठी तत्पुरुषः। मुक्ताकलापाः, मुक्ताकलापीकृतानि सिन्धुवाराणि यस्मिन्, बहुव्रीहि, तत्।

बसन्तपुष्पाभरणम् = बसन्तस्य पुष्पानि, षष्ठी तत्पुरुष, वसन्तपुष्पानि। बसन्तपुष्पाण्येव आभरणम्, कर्मधारय, बसन्तपुष्पाभरणम्।

श्लोकः ५४

व्युत्पत्ति :

आवर्जिता = आ – वज् + क्त + टाप् प्रथमपुरुष एकवचन

सञ्चारिणी= सम् + चर् + णिनि + ङीप्, प्रथमा एकवचन

वसाना = वस् + कर्तरि शानच् + टाप् प्रथमपुरुषः एकवचन

विभक्ति निर्णय :

स्तनाभ्याम् = करणे तृतीया।

समास :

तरुणार्करागम् = तरुणश्चासौ अर्कः, कर्मधारय समासः, तरुनार्कः। तरुनार्कस्य राग इव रागो यस्य, वहुव्रीहि समासः, तत्।

पर्याप्तपुष्पस्तवकनम्रा = पर्याप्तः पुष्पस्तवकम्, कर्मधारय समासः। तेन अवनम्रा, तृतीय तत्पुरुष।

श्लोक : ५५

व्युत्पत्ति :

न्यासीकृताम् = न्यास + षिव् (अभूततद्भावे) + कृ + क्त, कर्तरि स्त्रियाम्।

अवलम्बमाना = अव + लम्ब + शानच् + टाप्, प्रथमा एकवचन।

सथानविदा = स्थान + विद् + क्विप्, तृतीया एकवचन।

विभक्ति :

नितम्बात् = अपादाने पञ्चमी।

स्थानविदा स्मरेण = अनुक्ते कर्तरि तृतीया।

समास :

केशरदामकाञ्चीम् = केशराणां दाम, षष्ठी तद्पुरुष, केशरदाम, केशरदाम एव काञ्ची, कर्मधारय, ताम्।

स्थानविदा = स्थानं वेत्ति, उपपद तत्पुरुष, तेन ।

श्लोक : ५६

व्युत्पत्ति :

आसन्न = आ – सद् + क्त।

निवारयन्ती = नि–वृ + निच् + शतृ + ङीप्, प्रथमा एकवचन।

विवृध्द = वि – वृध् + क्त।

निश्वासः = नि – श्वस् + घञ्

समास :

सुगन्धिनिश्वासविवृद्धतृष्णम् = शोभनगन्धः येषाम्,बहुव्रीहि समासः, ते। सुगन्धयः सुगन्धय च ते निश्वासाः, कर्मधारय समासः, सुगन्धिनिश्वासाः ।विशेषेन वृद्धाः प्रादि तत्पुरुष, विवृद्धाः। तृष्णा यस्य = वहुव्रीहि समासः, सः, विवृद्धतृष्णः सुगन्धिनिश्वासैः विवृद्धतृष्णः, तृतीया तत्पुरुष, तम्। द्विरेफः द्वौ रेफौ यस्य, वहुव्रीहि समासः।

प्रतिक्षणम् = क्षणं क्षणं प्रति, अव्ययीभाव समासः।

द्विरेफः= द्वौ रेफौ यस्य, वहुव्रीहि, समासः।

श्लोक : ५७

व्युत्पत्ति :

वीक्ष्य = वि – ईक्ष् + ल्यप् ।

आदधानाम् =आ – धा + शानच् + टाप् ।

आशशंसे =आ – शंस् + लिट् ए ।

कार्य = कृ + ण्यत्।

विभक्ति निर्णयः

जितेन्द्रियशूलिनि = अधिकरणे सप्तमी ।

समास :

सर्वावयवानवद्याम् = न अवद्या नञ् तत्पुरुष।

सर्वावयवेषु अनवद्या, सप्तमी तत्पुरुष, सर्वावयवानवद्या, ताम्।

जितेन्द्रिये = जितानि इन्द्रियानि येन, बहुव्रीहि समासः, सः जितेन्द्रियः, तस्मिन्।

श्लोक : ५८

व्युत्पत्ति :

भविष्यतः = भू + लृट् – भविष्य+शतृ, षष्ठी एकवचन।

समासःसाद = सम् – आ + सद् + लिट् प्रथमपुरुष एकवचन ।

उपारराम = उप – आ + रम् + लिट् प्रथमा एकवचन।

दृष्ट्वा = दृश् + क्त्वाच्।

विभक्ति निर्णय :

योगात् = अपादाने पञ्चमी।

अन्तः= अधिकरणे सप्तमी।

समास :

प्रतिहारभूमिम् = प्रतिहारस्य भूमिः, षष्ठी तत्पुरुष, प्रतिहारभूमिः, ताम् ।

परमात्मसंज्ञम् = परमश्चासौ आत्मा, कर्मधारयसमासः, परमात्मा, परमात्मा संज्ञा यस्य,

बहुव्रीहि समासः, तत् ।

श्लोक : ५९

व्युत्पत्ति :

बिभेद = भिद् + लिट् प्रथम पुरुष एकवचन ।

विमुक्तिः = वि + मुच् + क्तिन प्रथमपुरुष एकवचन।

विभक्ति निर्णय :

अधः = अधिकरणे सप्तमी।

फणाग्रैः= अनुले कर्तरि तृतीया।

समास :

भुजंगाधिपतेः = भुजङ्गानाम् अधिपतिः, षष्ठी तत्पुरुष। भुजंगाधिपतिः तस्य धृतभूमिभागः

= भूमेः भागः, षष्ठी तत्पुरुष, भूमिभागः, धृतः भूमिभागः यस्य सः,बहुव्रीहि समासः।

श्लोक : ६०

व्युत्पत्ति :

प्रणिपत्य = प्र – नि + पत् + ल्यप् ।

शशंस = शंस् + लिट् अ।

उपेताम् = उप+इ+क्त+टाप् ।

प्रवेशयामास = प्र – विश् + णिच् + लिट् अ।

विभक्ति निर्णय :

शुश्रुषया = हेतौ तृतीया।

तस्मै = क्रियायोगे चतुर्थी ।

समास :

भ्रुक्षेप = भ्रूवः क्षेपः,षष्ठी तत्पुरुष।

शैलसुताम् = शैलस्य सुता, षष्ठी तत्पुरुष, ताम्।

८.५ विशेषश्लोकानां व्याख्या

क) अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम्।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम्।। ४८।।

उत्पः - श्लोकोऽयं महाकवि-कालिदासेन विरचितं 'कुमारसम्भवम्' महाकाव्यस्य 'मदनदहन' इति नाम तृतीयसर्गात् उद्धृतः।

प्रसङ्गः- हिमालयस्य उच्चशिखरे ध्यानरतस्य महादेवस्य वर्णन-प्रसङ्गे उक्तश्लोकः उद्धृतः।

व्याख्या- योगस्थित-महादेवः स्वस्य शरीरस्य अन्तःस्थं वायुन् नियम्य कायशीरग्रीवं समं धारयन् निश्चलः आसन्। अतः महादेवस्य आकृतौ परिवर्तनं दृष्टम्। उक्तश्लोके महादेवस्य रूपं वर्षोद्योगरहितमेघेन, तरङ्गसम्पर्कशून्यसागरेण, स्थिरप्रदीपेन च सह उपमितम्। ध्याने निमग्नं महादेवं दृष्ट्वा एकः भयङ्करः मेघसदृशः परिलक्षते। सामान्यतः वर्षाकाले एकखण्डं मेघं अन्येषु ऋतुषु अपेक्षासु अधिकं गम्भीरं दृश्यते। न बृष्टिं भवति किन्तु गभीरः मेघः जनानां चित्तेषु भयस्य सृष्टिं करोति। ध्यानरत-महादेवस्य अस्वाभाविकं असामान्यं च रूपं बोधयितुं कविना तं मेघेन सह तुलनायाम् उपन्यस्तम्।

अन्यथा, समुद्रस्य प्रकृति चञ्चलः तरङ्गयुक्ताः च , तरङ्गैः समुद्रे रमणीय-वातावरणः सृजन्ति। विशालतरङ्गसमूहाः समुद्रस्य स्वाभाविकः धर्मः। अस्यविपरीतं तु सागरस्य अस्वाभाविकता। उत्तालतरङ्गैः चञ्चलं कृता एकः सागरः यदि अकस्मात् शान्तं भवति, तदा तस्य दर्शने जनानां मनसि भयस्य उत्पत्ति इति स्वाभाविकम्। तस्मात् ध्यानरत-महादेवं तरङ्गरहितेन समुद्रेण सह उपमितम्। अग्नेशिखायाः चञ्चलता स्वाभाविकः धर्मः। यदि एकस्य दीपस्य शिखा स्थिरा भवेत्, तदा सा दृश्यः अतीव भयङ्करः भवति। तथैव तपस्यायां रत महादेवं दृष्ट्वा कामदेवः किंकर्तव्यविमूढः अभवत्। महाकविना कालिदासेन एवम् ध्यानरत-महादेवस्य रूपः वर्णितम्।
उक्तश्लोके मालोपमा नामक अलङ्कारः प्रयुक्तम्।

ख) मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम्।। ५०।।

उत्पः -श्लोकोऽयं महाकवि-कालिदासेन विरचितं 'कुमारसम्भवम्' महाकाव्यस्य 'मदनदहन' इति नाम तृतीयसर्गात् उद्धृतः।

प्रसङ्गः - महादेवस्य समाधिस्थरूपस्य वर्णन-प्रसङ्गे श्लोकस्य अवतारणा कृतम्।

व्याख्या - हिमालयस्य उच्चशिखरे ध्यानरत-महादेवस्य ध्यानभङ्गं कृत्वाहिमालयकन्या पार्वत्यां प्रति आकर्षयितुम् इन्द्रस्य आज्ञा शिरसि धृत्वा कामदेवः स्वसख्या वसन्तेन च पत्न्या रतिदेव्या सह मिलित्वा देवकार्य सिद्ध्यर्थं महादेवस्य आश्रमे प्रविष्टः।

महादेवस्य ध्यानरतरूपस्य वर्णनं कृत्वा कामदेवः कथयति यत् - शरीरस्य नवद्वाराणिनिषिद्धं कृत्वा 'मनः'इति इन्द्रियं समाधिना च वशं कृत्वा तथा हृदये स्थापित्वा तत्त्वज्ञैः यः 'अक्षरब्रह्मस्वरूपः' परमात्मा ज्ञायते, तं परमतत्त्वं स्वात्मनि दृष्ट्वा महादेवं दृष्टवान्।

नवद्वाराणि यथा-द्वे नेत्रे, द्वेनासिके, एकम् मुखम्, द्वे कर्णे, एकः पायुः, एकः उपस्थः - एतानि नवद्वाराणि निरोधयितुम् अतीव कठिनः। किन्तु परमेश्वरः महादेवः एतानि सर्वाणि द्वाराणि रोधयित्वा आत्मनि परमात्मानं दर्शनं कृतवान्। ध्यानरतं तं महादेवं क्षेत्रविदाः अर्थात् तत्वज्ञाः 'अक्षरब्रह्म' इत्याहु। तथा कामदेवः ध्यानरत-महादेवं दृष्टवान्।

कामदेवः ध्यानरतरुपं महादेवं दृष्ट्वा अत्यन्तं भीतः अभवत्। महादेवस्य तादृश रूपः सः स्वकल्पनायामपि न दृष्टम्। तस्मात् भयेन विह्वलः तस्य हस्तौ शिथिलौ अभूताम् अपि च धनुः बाणश्च हस्ताभ्यां पतितौ अपि सः ज्ञातुं अशक्तः।

उक्तश्लोके व्यतिरेकालङ्कारस्य प्रयोगः दृष्टः।



८.६ अध्यायात् किमवगतम्

अस्मिन् अध्यायःअध्ययनं कृत्वा वयम् -

- श्लोकानां (४६-६०) संस्कृतपाठगद्यपाठश्च ज्ञातुं शक्नुमः।
- प्रत्येकस्य श्लोकस्य अर्थं, असमीयानुवादं च अवगन्तुं शक्नुमः।
- प्रत्येकस्य श्लोकस्य व्याकरणसम्बन्धिनी टिप्पणीः तथा श्लोकानां विषयवस्तुम् अवगतम्।
- महत्त्वपूर्णश्लोकानां भावार्थविषये ज्ञातुं शक्नुमः।
- महत्त्वपूर्णश्लोकानां अर्थं ज्ञातवान्।



८.७ ज्ञानाधिक्यम्

१) दि कुमारसम्भवम् अव् कालिदास (केण्टो १-८) मतिलाल बानारसीदास, दिल्ली।
२) कालिदासस्य कुमारसम्भवम् (केण्टो १-८) नाग पाब्लिशार्स, जवाहरनगर, दिल्ली-७।
३) कुमारसम्भवम् (१-५) सर्ग, महाकवि कालिदासेण प्रणीतम्। सम्पादना - श्रीमद्गुरुनाथ विद्यानिधि भट्टाचार्य, संस्कृत पुस्तकभाण्डार, कलिकता-७००००६।
४) संस्कृत साहित्यसम्भार (Vol. 2), नवपत्र प्रकाशन, कलिकता-७०००७३।
५) संस्कृतसाहित्यसम्भारः, द्वितीयखण्डः। अनुवादकः सुरारिमोहनः, तृतीयः सर्गः।
६) शइकिया बरा, इन्दिरा, कालिदासकृतः कुमारसंभवम्, प्रकाशिका, पानबजारः, गुवाहाटी।



८.८ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : पद्मरागमणीनां स्थाने रक्ताशोकपुष्पाणि, सुवर्णस्य स्थाने कर्णिकारपुष्पाणिमुक्तानां स्थाने सिंधुवारपुष्पाणि च, वसन्तऋतोरनेकविविधपुष्पाभरणं वहन्त्याः पार्वत्याः परिधानं अभवत्।

प्रश्नः २ उत्तरम् :'लीला अरविन्दः' इति शब्देन पद्मपुष्पं सूच्यते। प्राचीनकाले राजकन्याः हस्ते एकं कमलपुष्पं धारयन्तिस्म। एषः एकः आभिजात्यसूचकचिह्नः अस्ति। लीलारविन्द लीलाकमल वा शब्दयोः अर्थः समानः। पार्वती वसन्तऋतौ पुष्पं धारयति स्म। पुष्पगन्धेन आकर्षिताः भ्रमराः पार्वत्याः मुखे पतन्ति। तदा पार्वती तस्याः हस्ते स्थिता लीलाकमलेन भ्रमरान् पुनः पुनः अपसरयति स्म।

प्रश्नः ३ उत्तरम् :'भुजङ्गाधिपतिः' इति शब्देन शेषनागं वा अनन्तनागं बोधयति। महादेवस्य समाधेः पश्चात् प्राणवायुः शनैः शनैः निर्गतः। तदा शंकरस्य भारात् कम्पिता पृथिव्याम् शेषनागः अत्यन्तकष्टेन धृतवान्।

प्रश्नः ४ उत्तरम् :'अनन्यभाजम्ः' इत्यस्य अर्थः - यः केवलं एकामेव भार्या इच्छति। एका भार्या कामयते यत् तस्याः पतिः केवलं तामेव इच्छेत्। एषः पतिव्रता स्त्रियाः स्वभावः।

प्रश्नः ५ उत्तरम् :'ईश्वरव्याहृतयः' - 'ईश्वर' इत्यस्य अर्थः 'ऋषिः' अर्थात् 'महानुभावः।' 'व्याहृत' इत्यस्य अर्थः 'उक्तिः' वा 'वचनम्।' तेन 'ईश्वरव्याहृत' इत्यस्य अर्थेन 'आध्यात्मिकं' तेजोयुक्तं वचनं बोधयति। एतादृशः 'सत्यवचनस्य' फलं कालेन लभ्यते।

प्रश्नः ६ उत्तरम् : 'वृषभध्वजः' इति शब्देन महादेवं सूचयति।



८.९ अभ्यासप्रश्नाः

क) वस्तुधर्मी-प्रश्नाः (प्रत्येकप्रश्नस्य उत्तरं ५० शब्दे लिखतु)

प्रश्न १: अधोलिखितेषु (५१-६३) श्लोकस्य विषयवस्तु लिखतु।

प्रश्न २: अधोलिखितेषु शब्देषु व्याकरणगतटिप्पणीं लिखतु-

निर्वाणम्, सन्धुक्षयन्ती, तरुणार्करागमम्, केसरदामकाञ्चीम्, लीला-अरविन्दम्, परमात्मसंज्ञम्।

ख) संक्षिप्तप्रश्नाः (प्रत्येकप्रश्नस्य उत्तरं ३००-५०० शब्देषु लिखतु)

प्रश्न १: कुमारसम्भवम् महाकाव्यस्य तृतीयसर्गे शिवाश्रमं प्रति आगच्छन्त्याः पार्वत्याः यत् वर्णनं अस्ति तद् लिखतु।

ग) निबन्धप्रश्नाः (प्रत्येकस्य उत्तरं ३००-५०० शब्देषु लिखतु)

प्रश्न १: अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम्।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम्।।
उपरि उल्लिखितः श्लोकस्य सप्रसङ्गम् व्याख्या कुरुत।

प्रश्न २: अधोलिखितस्य श्लोकस्य स्वविस्तारं लिखतु-
'न हीश्वरव्याहृतयः कदाचित् कुर्वन्ति लोके विपरीतमर्थम्'।

*** ***** ***

अध्यायः ९ : कुमारसम्भवम् (तृतीयः सर्गः, श्लोकाः ६१-७६)

अध्यायस्य संरचना

९.१ उद्देश्यम्

९.२ परिचयः

९.३ तृतीयसर्गस्य (६१-७६) श्लोकानां संस्कृतपाठः

- ९.३.१ श्लोकानां अन्वयपाठः
- ९.३.२ श्लोकानां शब्दार्थः
- ९.३.३ श्लोकानां असमीयानुवादः

९.४ व्याकरणगतटिप्पणी

९.५ विशेषश्लोकानां भावार्थः

९.६ अध्यायात् किमवगतम्

९.७ ज्ञानाधिक्यम्

९.८ अग्रगत्याः निरूपणम्

९.९ अभ्यासप्रश्नाः

९.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य श्लोकानां (६१-७६) संस्कृतपाठः पठितुं शक्नुवन्ति। ततः गद्यपाठः शब्दार्थः असमीयानुवादः च पठितुं शक्नुवन्ति।
- कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्थितांशरेकस्य विषयवस्तुविषये भवन्तः विचारं प्राप्नुवन्ति।
- श्लोकानान्तर्गतानां दुरूहशब्दसमूहनां व्याकरणविधानं अवगन्तुं शक्नुवन्ति।
- भवन्तः ६१-७६ श्लोकानां केषाञ्चन व्याख्यानस्य अर्थस्य च ज्ञानं प्राप्तुं शक्नुवन्ति।

९.२ परिचयः

भवद्भिः अष्टम अध्याये कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य (४६-६०) श्लोकान् अध्ययनं कृतम्। एतेषु श्लोकेषु पार्वती महादेवस्य आश्रमं आगच्छति च शिवस्य सम्मुखे बसन्तपुष्पैः संमुखीभावं दर्शयति इति ज्ञातवन्तः।

अस्मिन् अध्याये भवान् पार्वत्या महादेवाय माला प्रदायितुं समये कामदेवेन 'संमोहन' नामकं अस्त्रं संयोगसमये महादेवस्य मनः क्षणं चञ्चलं जातम्। किन्तु संयमी महादेवः तत् कारणं ज्ञातुं चतुर्दिशं पश्यन् धनुष्मन्तं कामदेवं दृष्टवान्। अकस्मात् क्रोधेन तृतीयनेत्रात् निर्गताग्निः कामदेवं भस्मीकृतवान्। एतेन कर्मणा कामदेवस्य पत्नी रति देवी मूर्छिताऽभवत्। अपि च महादेवः स्त्रीणां

सन्निधिं त्यक्त्वा अनुचरैः सह तत् स्थानं परित्यजति। पश्चात्पिता हिमालयः पार्वतीं तस्य निकटात् लभते।

अपि च श्लोकानां संस्कृतपाठः, प्रत्येकशब्दस्य अर्थःच असमीयानुवादः पठितुं शक्यते। श्लोकानां कठिनशब्दानां व्याकरणगत-टिप्पणीनां ज्ञानं अपि लभ्यते। एषः अंशः कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य अन्तिमभागः अस्ति। यत्र महादेवः कामदेवम् भस्मीकुरुते, तस्मात् कारणादिव एषः सर्गः 'कामदहन' इत्यपि उच्यते, इत्यपि ज्ञातुं शक्यते।

९.३ कुमारसम्भवस्य तृतीयसर्गस्य श्लोकानां (६१-७६) संस्कृतपाठः

अधुना भवान् कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य (६१-७६) श्लोकानां संस्कृतपाठः पठितुं शक्नोति।

तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलूनः शिशिरात्ययस्य।
व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः॥ ६१॥
उमाऽपि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम्।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ॥ ६२॥
अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन।
न हीश्वरव्याहृतयः कदाचित्पुष्णन्ति लोके विपरीतमर्थम् ॥ ६३॥
कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद्वह्निमुखं विविक्षुः।
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श ॥ ६४॥
अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण।
विशोषितां भानुमतो मयूखैर्मन्दाकिनी पुष्करबीजमालाम् ॥ ६५॥
प्रतिग्रहीतुं प्रणयिप्रियत्वात्त्रिलोचनस्तामुपचक्रमे च।
संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ॥ ६६॥
हरस्तु किञ्चित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥ ६७॥
विवृण्वती शैलसुताऽपि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन॥ ६८॥
अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद्बलवन्निगृह्य।
हेतुं स्वचेतोविकृतेर्ददृक्षुर्दिशामुपान्तेषु ससर्ज दृष्टिम् ॥ ६९॥
स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम्।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ ७०॥
तपःपरामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य।
स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ॥ ७१॥

क्रोधं प्रभो! संहर संहरेति यावद्गिरः खे मरुतां चरन्ति।
तावत्प वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार॥ ७२॥
तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव॥ ७३॥
तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य।
स्त्रीसन्निकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः॥ ७४॥
शैलात्मजाऽपि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथञ्चित्॥ ७५॥
सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम्।
सुरगज इव विभ्रत्पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद्वेगदीर्घीकृताङ्गः॥ ७६॥

९.३.१ श्लोकानाम् (६१-७६) अन्वयपाठः

अधुना 'कुमारसम्भवम्' इतिमहाकाव्यस्य तृतीयसर्गस्य उपरि उल्लिखितानां श्लोकानां अन्वयःपठितुं शक्यते -

६१) तस्याः सखीभ्यां स्वहस्तलूनः पल्लवभङ्गभिन्नः शिशिरात्ययस्य पुष्पोच्चयः प्रणिपातपूर्वं त्र्यम्बकपादमूले व्यकीर्यत।

६२) उमा अपि नीलालकमध्यशोभि नवकर्णिकारं विस्रंसयन्ती कर्णच्युतपल्लवेन मूर्ध्ना वृषभध्वजाय प्रणामं चकार।

६३) सा भवेन अनन्यभाजं पतिम् आप्नुहीति तथ्यम् एभ अभिहिता हि। ईश्वर व्याहृतयः (भगवदुक्तयः) कदाचित् लोके विपरीतम् अर्थं न हि पुष्णन्ति (फलन्ति)।

६४) कामः तु बाणावसरं प्रतीक्ष्य पतङ्गवत् वह्निमुखं विविक्षुः उमासमक्षं हरबद्धलक्ष्यः सन् शरासनज्यां मुहुः आममर्श (परामृष्ट बाण)।। ६४।।

६५) अथ गौरी तपस्विने गिरिशाय ताम्ररुचा करेण, भानुमतः (सूर्यस्य) मयूखैः विशोषितां मन्दाकिनीपुष्करबीजमालाम् उपनिन्ये।। ६५।।

६६) त्रिलोचनः प्रणयिप्रियत्वात् तां प्रतिगृहीतुम् उपचक्रमे, च पुष्पधन्वा संमोहनं नाम अमोघं बाणं धनुषि समधत्त।। ६६।।

६७) हरः तु चन्द्रोदयारम्भे अम्बुराशिः इव किञ्चित् परिलुप्तधैर्यः (सन्) बिम्बफलाधरोष्ठे उमामुखे विलोचनानि व्यापारयामास।। ६७।।

६८) शैलसूता अपि स्फुरद्बालकदम्बकल्पैः अङ्गैः भावं विवृण्वती (प्रकाशयन्ती)

चारुतरेण पर्यस्तविलोचनेन मुखेन साचीकृता तस्थौ।। ६८।।

६९) अथ अयुग्मनेत्रः (विषमलोचनः शिवः) च वशित्वात् इन्द्रियक्षोभं पुनः बलवत् निगृह्य स्वचेतोविकृतेः हेतुं दिदृक्षुः दिशाम् उपान्तेषु दृष्टिं ससर्ज।। ६९।।

७०) स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसम् आकुञ्चितसव्यपादं चक्रीकृतचारुचापं प्रहर्तुम् अभ्युद्यतम् आत्मयोनिं ददर्श।। ७०।।

७१) तपः परामर्शविवृद्धमन्योः भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य तृतीयात् अक्ष्णः स्फुरन् उदर्चिः कृशानुः सहसा निष्पपात किल (निश्चक्राम खलु)।। ७१।।

७२) हे प्रभो! क्रोधं संहर संहर, इति मरुतां (देवताणां) गिरः यावत् खे (आकाशे) चरन्ति, तावत् भवनेत्रजन्मा सः वह्निः मदनं भस्मावशेषं चकार।। ७२।।

७३) तीव्राभिषङ्गप्रभवेण (दुःसहदुःखोत्पन्नेन) इन्द्रियाणां वृत्तिं संस्तम्भयता मोहेन अज्ञातभर्तृव्यसना रतिः मुहूर्त्तं कृतोपकारा इव बभूव।। ७३।।

७४) तपस्वी भूतपतिः तपसः विघ्नं तं वज्रः वनस्पतिम् इव आशु अवभज्य स्त्रीसन्निकर्षं परिहर्त्तुं इच्छन् समूहः अन्तर्दधे भूतेपतिः सभूतः।। ७४।।

७५) शैलात्मजा अपि उच्छिरसः (महतः) पितुः अभिलाषम् आत्मनः ललितं वपुः च व्यर्थं समर्थ्य सख्योः समक्षम् एवं (जातं) इत्यधिकजातलज्जा शून्या (उत्पाहशून्याच) भवनाभिमुखी कथञ्चित् जगाम।। ७५।।

७६) सपदि अद्रिः रुद्रसंरम्भभीत्या मुकुलिताक्षीम् अनुकम्प्यां दुहितरं दोर्भ्याम् आदाय दन्तलग्नां पद्मिनीं विभ्रत् सुरगजः इव वेगदीर्घीकृताङ्गः (सन्) प्रतिपथगतिः आसीत्।। ७६।।

९.३.२ श्लोकानां शब्दार्थः

अधुना 'कुमारसम्भवम्' इतिमहाकाव्यस्यतृतीयसर्गस्य (६१-७६) श्लोकानां शब्दार्थं पठितुं शक्यते -

श्लोकः ६१

तस्याः सखीभ्यां स्वहस्तलूनः पल्लवभङ्गभिन्नः शिशिरात्ययस्य पुष्पोच्चयः (পার্বতীৰ সখী দুগৰাকীয়ে নিজ হাতে চিঙা বসন্ত ঋতুৰ পল্লৱযুক্ত ফুলৰ থোপাসমূহ), प्रणिपातपूर्वं त्रम्बकपादमूले व्यकीर्यत (মহাদেৱৰ পাদমূলত প্রণিপাত জনাই চতিয়াই দিলে)।

श्लोकः ६२

उमा अपि (পার্বতীয়েও) नीलालकमध्यशोभि नवकर्णिकारं विस्रंसयन्ती (কলা চুলিৰ মাজত শোভা পোৱা কর্ণিকাৰ পুষ্প খহি পৰিছিল), कर्णच्युतपल्लवेन मूर्ध्ना वृषभध्वजाय प्रणामं चकार (শিৰ অৱনত কৰোতে তেওঁৰ কর্ণৰ পৰাও খহি পৰা ফুলেৰে আৰু শিৰেৰে মহাদেৱক প্রণাম জনাইছিল)।

শ্লোকঃ ৬৩

সা ভবেন অনন্যভাজং পতিম্ আপ্নুহি ইতি তথ্যম্ এব অভিহিতা (তেতিয়া তেওঁক (পার্বতীক) 'অনন্যাসক্ত পতি লাভ কৰা' এই সত্যবচন শিৱৰ দ্বাৰা পার্বতীক কোৱা হৈছিল), ঈশ্বরব্যাহৃতয়ঃ (ভগবদুক্তয়ঃ) কদাচিত্ লোকে বিপরীতম্ অর্থং ন হি পুষ্ণন্তি (ফলন্তি) (মহাপুৰুষসকলৰ উক্তিয়ে এই পৃথিৱীত কেতিয়াও বিপৰীত অর্থ নিদিয়ে)।

শ্লোকঃ ৬৪

কামঃ তু বাণাবসরং প্রতীক্ষ্য (প্রতীক্ষা কৰি থকা কামদেৱেও বাণ এৰাৰ এইটোৱেই ক্ষণ বুলি ভাবি), পতঙ্গবত্ বহ্নিমুখং বিবিক্ষুঃ (পতঙ্গৰ নিচিনাকৈ অগ্নিৰ মুখত প্রৱেশ কৰিবলৈ ইচ্ছা কৰি), উমাসমক্ষং হরবদ্ধলক্ষ্যঃ সন্ শরাসনজ্যাং মুহুঃ আমমর্শ (উমাৰ উপস্থিতিতেই হৰক লক্ষ্য কৰি ধনুৰ জ্যা ডাল বাৰে বাৰে টানিবলৈ আৰম্ভ কৰিলে)।

শ্লোকঃ ৬৫

অথ গৌরী তপস্বিনে গিরিশায় তাম্ররুচা করেণ (ইয়াৰ পিছত পার্বতীয়ে তপস্বী মহাদেৱক তেওঁৰ তামবৰণীয়া হাতেৰে), ভানুমতঃ (সূর্যস্য) মযূখৈঃ বিশোষিতাং মন্দাকিনী পুষ্করবীজমালাম্ উপনিন্যে (সূর্যৰ ৰশ্মিয়ে পানী শুকুৰাই পেলোৱা মন্দাকিনী হ্রদত জন্মা পদুমৰ গুটিৰ মালা অর্পণ কৰিছিল)।

শ্লোকঃ ৬৬

ত্রিলোচনঃ প্রণয়িপ্রিয়ত্বাত্ তাং প্রতিগ্রহীতুম্ উপচক্রমে (ভক্তৰ প্রতি থকা মৰমৰ বাবেই মহাদেৱে সেই মালাডাল গ্রহণ কৰিবলৈ আগবাঢ়ি আহিছিল), চ পুষ্পধন্বা (আৰু কামদেৱেও), সংমোহনং নাম (সংমোহন নামেৰে), অমোঘং বাণং (অমোঘ বাণ), ধনুষি সমধত্ত (ধনুত সংযোগ কৰিছিল)।

শ্লোকঃ ৬৭

হরঃ তু চন্দ্রোদয়ারম্ভে অম্বুরাশিঃ ইব (মহাদেৱেও চন্দ্রোদয়ৰ আগত সাগৰ চঞ্চল হোৱাৰ দৰে), কিঞ্চিত্ পরিলুপ্তধৈর্যঃ সন্ (কিঞ্চিত উল্লাসিত আৰু ধৈর্যচ্যুত হ'ল), বিম্বফলাধরোষ্ঠে উমামুখে বিলোচনানি ব্যাপারযামাস (আৰু বিম্বফলৰ দৰে ৰক্তবর্ণৰ পার্বতীৰ অধৰলৈ দৃষ্টিপাত কৰিলে)।

শ্লোকঃ ৬৮

শৈলসূতা অপি স্ফুরদ্ভালকদম্বকল্পৈঃ অঙ্গৈঃ ভাবং বিবৃণ্বতী (প্রকাশয়ন্তী) (পর্বত দুহিতা পার্বতীও তেওঁৰ শৰীৰৰ অঙ্গ প্রত্যঙ্গৰে বিভিন্ন ভাৱ-ভঙ্গী প্রকাশ কৰিলে), চারুতরেণ পর্যস্তবিলোচনেন মুখেন সাচীকৃতাতস্থৌ (কদম ফুলৰ নিচিনাকৈ শিহৰিত হোৱা ভংগীমা প্রদর্শন কৰি লাজ ভাৱেৰে মুখ ঈষৎ বেঁকা কৰি সুন্দৰ দৃষ্টিৰে অৱস্থান কৰিলে)।

শ্লোকঃ ৬৯

অথ অযুগ্মনেত্রঃ (বিষমলোচনঃ শিবঃ) চ বশিত্বাত্ ইন্দ্রিয়ক্ষোভং পুনঃ বলবত্ নিগৃহ্য (ইয়াৰ পিছত সংযমী মহাদেৱে তেওঁৰ ইন্দ্রিয়ৰ বিকাৰ বলেৰে সম্বৰণ কৰি) স্বচেতোবিকৃতেঃ হেতুং দিদৃক্ষুঃ দিশাম্ উপান্তেষু দৃষ্টিং ससর্জ (নিজৰ এই চিত্ত বিকৃতিৰ কাৰণ জানিবলৈ চাৰিওফালে দৃষ্টি নিক্ষেপ কৰিছিল)।

শ্লোকঃ ৭০

স (মহাদেৱে) দক্ষিণাপাঙ্গনিবিষ্টমুষ্টিং (সোঁহাতৰ মুঠিতো সোঁচকুৰ ওপৰত নিৰদ্ধ কৰি ৰখা), নতাংসম্ (কান্ধ দুখন তললৈ হালি থকা), আকুঞ্চিতসব্যপাদম্ (বাওঁভৰি দুখন কিঞ্চিত বেকা হৈ থকা), চক্রীকৃতচারুচাপং (চক্রাকৃতিৰে সুন্দৰ ধনু ধাৰণ কৰা), প্রহর্ত্তুম্ অভ্যুদতম্ আত্মযোনিং ददর্শ (ভঙ্গিমাত থকা কামদেৱক দেখা পাইছিল)।

শ্লোকঃ ৭১

তপঃ পরামর্শ (তপস্যাত বিঘিনি হোৱাত), বিবৃদ্ধমন্যোঃ ভ্রূভঙ্গদুষ্প্রেক্ষ্য (ক্রোধিত হৈ ভ্রু কোঁচ খাই খোৱাৰ কাৰণে), মুখস্য তস্য তৃতীয়াত্ অক্ষ্ণঃ (মুখ মণ্ডলত থকা তেওঁৰ তৃতীয় নেত্রৰ পৰা ওলোৱা), স্ফুরন্ উদর্চিঃ কৃশানুঃ সহসা নিষ্পপাত কিল (নিশ্চক্রাম খলু) (অগ্নিশিখা চাৰিওফালে বিক্ষিপ্ত হৈ পৰিল)।

শ্লোকঃ ৭২

হে প্রভো! (হে প্রভু)! ক্রোধং সংহরসংহর (ক্রোধ সম্বৰণ কৰা, সম্বৰণ কৰা), ইতি মরুতাং (দেবতানাং) গিরঃ যাবত্ খে (আকাশে) চরন্তি (এই কথাখিনি আকাশত থকা দেবতাসকলৰ মুখৰ পৰা যেতিয়া ভাসি আহিছিল), তাবত্ ভবনেত্রজন্মা স বহ্নিঃ মদনং ভস্মাবশেষং চকার (সেই মুহূর্ততে মহাদেৱৰ চকুৰ পৰা সৃষ্টি হোৱা জুইয়ে কামদেৱক ভস্মীভূত কৰিছিল)।

শ্লোকঃ ৭৩

তীব্রাভিষঙ্গপ্রভবেণ (দুঃসহদুঃখোৎপদন্নেন) (অতিশয় দুঃখত আঘাতপ্রাত হোৱা বাবে), ইন্দ্রিয়াণাং বৃত্তিং संस्तम्भयता मोहेन (কামদেৱৰ পত্নী ৰতিৰ ইন্দ্রিয়সমূহ স্তব্ধ হৈ গ'ল), অজ্ঞাতভর্তৃব্যসনা রतिः मुहूर्तं ((ৰতিৰ অজ্ঞান অৱস্থাই ক্ষন্তেকৰ বাবে হ'লেও পতি বিয়োগৰ বিৰহৰ পৰা অব্যাহতি দিছিল), কৃতোপকারা इव बभूव (আৰু ই ৰতিৰ বাবে উপকাৰস্বৰূপ হৈ পৰিছিল) ।

শ্লোকঃ ৭৪

তপস্বী भूतपतिः (তপস্বীভূতনাথ শিৱই), तपसः विघ्नः तं वज्रः (তপস্যাৰ বিঘিনিস্বৰূপ কামদেৱক বজ্রই), वनस्पतिम् इव आशु अवभज्य (বনস্পতি নাশ কৰাৰ দৰে নাশ কৰি), स्त्रीसन्निकर्षं परिहर्त्तमिच्छन्तर्दधे (নাৰী জাতিৰ ওচৰত থাকিবলৈ মন ন কৰি অনুচৰবর্গৰ সৈতে সেই স্থানৰ পৰা অন্তর্হিত হ'ল)।

श्लोकः ७५

শৈলাত্মজা অপি উচ্ছ্বিরসঃ (মহতঃ) পিতুঃ অভিলাষং (হিমালয়ৰ কন্যা পার্বতীয়েও নিজৰ মহান পিতৃৰ অভিলাষ), আত্মনঃ ললিতং বপুঃ চ ব্যর্থং সমর্থ্য (আৰু নিজ দেহ লাৱণ্যৰে শিৱক লাভ কৰাত ব্যর্থ হোৱাত), সখ্যোঃ সমক্ষম্ এবং ব্যর্থ (জাতং) (সখীসকলৰ সন্মুখত এনেদৰে ব্যর্থ হোৱাত), চ অধিকজাতলজ্জা শূন্যা (উত্পাহশূন্যা চ) (অধিক উৎসাহীন আৰু লজ্জাশীলা হৈ), ভবনাভিমুখী কথঞ্চিত্ জগাম (আশাশূন্য মনেৰে গৃহাভিমুখী হ'ল)।

श्लोकः ७६

সপদি অদ্রিঃ (হিমালয়ঃ) (তাৰ পিছত হিমালয়ে), রুদ্রসংরম্ভভীত্যা মুকুলিতাক্ষীং (মহাদেৱৰ পৰা ভয় খাই আধা মেল খোৱা চকুৰ), অনুকম্প্যাং দুহিতরং দোর্ভ্যাম্ (কন্যা পার্বতীৰ প্রতি অনুকম্পা হৈ) আদায় দন্তলগ্নাং পদ্মিনী বিভ্রত্ সুর গজ ইব (পিতৃ হিমালয়ে হাতীয়ে শুৰে পদুম লৈ গমন কৰাৰ দৰে), বেগদীর্ঘীকৃতাঙ্গঃ সন্ প্রতিপথগতিঃ আসীত্ (আলফুলকৈ দুবাহুত তুলি দীঘল খোজেৰে যাবলৈ ধৰিলে)।


९.३.३ श्लोकानां असमीयानुवादः

অধুনা ভবান্ কুমারসম্ভবমহাকাব্যস্য তৃতীযসর্গস্য (৬১-৭৬) শ্লোকানাং অসমীযানুবাদাঃ অপি পঠিতুং শক্নোতি। যথা -

- পার্বতীৰ সখী দুগৰাকীয়ে নিজ হাতে চিঙা বসন্ত ঋতুৰ পল্লবযুক্ত ফুলৰ থোপাসমূহ মহাদেৱৰ পাদমূলত প্রণিপাত জনাই চতিয়াই দিলে।
- ক'লা চুলিৰ মাজত শোভা পোৱা কর্ণিকাৰ পুষ্প খহি পৰা পার্বতীয়ে শিৱেৰে মহাদেৱক প্রণাম জনাইছিল, আৰু শিৰ অৱনত কৰোঁতে তেওঁৰ কর্ণৰ পৰাও ফুল খহি পৰিছিল।
- 'অনন্যাসক্ত পতি লাভ কৰা' এই সত্যবচন শিৱৰ দ্বাৰা পার্বতীক কোৱা হৈছিল, মহাপুৰুষসকলৰ উক্তিয়ে এই পৃথিবীত কেতিয়াও বিপৰীত অর্থ নিদিয়ে।
- প্রতীক্ষা কৰি থকা কামদেৱেও বাণ এৰাৰ এইটোৱেই উপযুক্ত ক্ষণ বুলি ভাবি পতঙ্গৰ নিচিনাকৈ অগ্নিৰ মুখত প্রবেশ কৰিবলৈ ইচ্ছা কৰি উমাৰ উপস্থিতিতেই শিৱক লক্ষ্য কৰি ধনুৰ জ্যা ডাল বাৰে বাৰে টানিবলৈ আৰম্ভ কৰিলে।
- ইয়াৰ পিছত পার্বতীয়ে তপস্বী মহাদেৱক তেওঁৰ তামবৰণীয়া হাতেৰে মন্দাকিনী হ্রদৰ পদুমৰ বীজ সূর্যৰ তাপত শুকোৱাই প্রস্তুত কৰা গুটি মালা অর্পণ কৰিছিল।
- ভক্তৰ প্রতি থকা মৰমৰ বাবেই মহাদেৱে সেই মালা গ্রহণ কৰিবলৈ আগবাঢ়ি আহিছিল আৰু কামদেৱেও 'সম্মোহন' নামৰ অমোঘ বাণ তেওঁৰ ধনুত সংযোগ কৰিছিল।
- মহাদেৱেও চন্দ্রোদয়ৰ আগত সাগৰ চঞ্চল হোৱাৰ দৰে কিঞ্চিত উল্লাসিত আৰু

ধৈর্যচ্যুত হ'ল আৰু বিম্বফলৰ দৰে পার্বতীৰ ৰক্তবর্ণৰ অধৰলৈ দৃষ্টি নিক্ষেপ কৰিলে।

- পর্বতদুহিতা পার্বতীয়েও তেওঁৰ শৰীৰৰ অংগ প্রত্যঙ্গবে বিভিন্ন ভাবভঙ্গী প্রকাশ কৰিলে। কদম ফুলৰ নিচিনাকৈ শিহৰিত হোৱা ভঙ্গিমা প্রদর্শন কৰি লাজ ভাবেৰে মুখখন ঈষৎ বেকা কৰি সুন্দৰ দৃষ্টিৰে অৱস্থান কৰিছিল।
- ইয়াৰ পিছত সংযমী মহাদেৱে তেওঁৰ ইন্দ্রিয়ৰ বিকাৰ বলেৰে সম্বৰণ কৰি নিজৰ এই চিত্ত বিকৃতিৰ কাৰণ জানিবলৈ চাৰিওফালে দৃষ্টিপাত কৰিছিল।
- তেওঁ অর্থাৎ মহাদেৱে সোঁহাতৰ মুঠিতো সোঁ চকুৰ ওচৰত নিবন্ধ কৰি ৰখা, কান্ধ দুখন কিঞ্চিত তললৈ হালি থকা, বাওঁ ভৰিদুখন কিঞ্চিত বেকা হৈ থকা, চক্রাকৃতিৰে সুন্দৰ ধনু ধাৰণ কৰা ভঙ্গিমাত থকা কামদেৱক দেখা পাইছিল।
- তপস্যাত বিঘিনি হোৱাত ক্রোধিত হৈ ভ্রু কোঁচ খাই যোৱা কাৰণে মুখমণ্ডলত থকা তেওঁৰ তৃতীয় নেত্রৰ পৰা ওলোৱা অগ্নিশিখা চাৰিওফালে বিক্ষিপ্ত হৈ পৰিল।
- হে প্রভু! 'ক্রোধ সম্বৰণ কৰক। ক্রোধ সম্বৰণ কৰক'। এই কথাখিনি যেতিয়া আকাশৰ দেৱতাসকলৰ মুখৰ পৰা ভাঁহি আহিছিল সেই মুহূর্ততে মহাদেৱৰ চকুৰ পৰা সৃষ্টি হোৱা জুইয়ে কামদেৱক ভস্মীভূত কৰিছিল।
- হঠাতে হোৱা এই ঘটনাত কামপত্নী ৰতিৰ ইন্দ্রিয়সমূহ স্তব্ধ হৈ গ'ল। ৰতিৰ অজ্ঞান অৱস্থাই ক্ষন্তেকৰ বাবে হ'লেও পতিবিয়োগৰ বিৰহৰ পৰা অব্যাহতি দিছিল আৰু ই ৰতিৰ বাবে উপকাৰস্বৰূপ হৈ পৰিছিল।
- তপস্বী ভূতনাথ শিৱই তপস্যাৰ বিঘিনিস্বৰূপ কামদেৱক বজ্রই বনস্পতি নাশ কৰাৰ দৰে নাশ কৰি, স্ত্রীসকলৰ সান্নিধ্য পৰিহাৰ কৰি অনুচৰ বর্গৰ সৈতে সেই স্থানৰ পৰা অন্তর্হিত হ'ল।
- হিমালয়ৰ কন্যা পার্বতীয়েও নিজৰ মহান পিতৃৰ অভিলাষ আৰু নিজৰ দেহলাবণ্যৰে শিৱক লাভ কৰাত ব্যর্থ হোৱাত সখীসকলৰ সন্মুখত লজ্জিতা হৈ আশাশূণ্য মনেৰে গৃহাভিমুখী হ'ল।
- তাৰ পাছত শিৱৰ পৰা ভয় খাই আধামেলখোৱা চকুৰ পার্বতী যি গৰাকী অনুকম্পাৰ যোগ্যা, সহানুভূতিৰ যোগ্যা সেই পার্বতীক পিতৃ হিমালয়ে হাতীয়ে শুৱেৰে পদুম লৈ গমন কৰাৰ দৰে আলফুলকৈ দুবাহুত তুলি দীঘল খোজেৰে যাবলৈ ধৰিলে।



अग्रगत्या: निरीक्षणम्

प्रश्न: १: 'भानु:' शब्दस्य अर्थ: क: अस्ति ?

.....

प्रश्नः २: 'मन्दाकिनी' इति पदेन का अभिधीयते ?

.....

प्रश्नः ३: 'गिरीशः' शब्देन कः वोध्यते ?

.....

प्रश्नः ४: कामदेवः महादेवं प्रति निक्षिप्तबाणस्य नाम किम् आसीत् ?

.....

प्रश्नः ५: महादेवस्य क्रोधं दृष्ट्वा आकाशे भयात् देवताः किम् अवदन् ?

.....

प्रश्नः ६: पार्वत्याः ओष्ठद्वयं कविना केन सह तुल्यते ?

.....

प्रश्नः ७: 'भूतनाथ' इति कं उच्यते ?

.....

९.४ व्याकरणगतटिप्पणी

अधुना भवान् कुमारसम्भवमहाकाव्यस्य तृतीयसर्गस्य (४६-६०) श्लोकानां व्याकरणगतटिप्पणी पठितुं शक्नोति-

श्लोकः ६१

व्युत्पत्ति :

प्रणिपात = प्र - नि + पत् + अण्।

भिन्नः = भिद् + क्त, प्रथमा एकवचन।

व्यकीर्यत = वि - कृ + कर्मणि लङ् त।

विभक्ति निर्णय :

सखीभ्यां= कर्तरि तृतीया।

समास :

स्वहस्तलूनः = स्वश्चासौ हस्तः, कर्मधारय समासः। स्वहस्तः इति स्वहस्तेन लूनः, तृतीया तत्पुरुष समासः।

शिशिकात्ययस्य = शिशिरस्य अत्ययः षष्ठी तत्पुरुष समासः। शिशिरात्ययः तस्य।

पुष्पोच्चयः = पुष्पानाम् उच्चयः, यष्ठी तत्पुरुष समासः।

पल्लवभङ्ग = पल्लवानां भङ्गः, षष्ठी तत्पुरुष समासः।

श्लोकः ६२

व्युत्पत्ति :

चकार = कृ + लिट् अ ।

बिस्रसयन्ती = वि - स्रंस् + निच् + शतृ + ङीप्, प्रथमा एकवचन।

विभक्ति निर्णय :

मूर्ध्ना = करणे तृतीया।

वृषभध्वजाय = सम्प्रदाने चतुर्थी।

समास :

नीलालकमध्यशोभि = नीलाश्च ते अलकाः, कर्मधारय समासः। नीलालकाः, नीलालकानां मध्यम्, षष्ठी तत्पुरुष। नीलालकमध्यं, नीलालकमध्ये शोभते इति उपपदतत्पुरुष समासः।

कर्णच्युतपल्लवेन = कर्णात् च्युतः, षष्ठी तत्पुरुष समासः। कर्णच्युतः, कर्णच्युतश्चासौ पल्लवः = कर्मधारय समासः। कर्णच्युतपल्लवः, तेन ।

बृषात्ध्वजाय = बृषतः ध्वजः (चिह्नः) यस्य, बहुव्रीहि समासः, तस्मै।

श्लोकः 63

व्युत्पत्ति :

व्याहृतयः = वि – आ + हृ + क्तिन्, प्रथमावहुवचन।

आप्नुहि = आप् – लोट् हि ।

अभिहिता = अभि – धा + क्त + टाप्, प्रथमा एकवचन।

पुष्णन्ति = पुष् + लट् अन्ति।

विभक्ति निर्णय :

भवेन = कर्तरि तृतीया।

लोके = अधिकरणे सप्तमी।

समास :

अनन्यभाजम् = अन्यां भजन्ति, उपपद तत्पुरुष, इति अन्यभाक्, न अन्यभाक्, नञ् तत्पुरुष, अनन्यभाक्, तम् ।

ईश्वरवाहृतयः = ईश्वरस्य व्याहृतयः,षष्ठी तत्पुरुष।

श्लोकः ६४

व्युत्पत्ति :

प्रतीक्ष्य = प्रति + ईक्ष् + ल्यप्।

विविक्षुः = विश् + सन् + उ, प्रथमाः एकवचन।

आममर्श = आ – मृश् + लिट् अ।

विभक्ति निर्णय :

कामः = कर्तरि प्रथमा।

समास :

वानावसरम् = वानस्य अवसरः, षष्ठी तत्पुरुष, तम्।

उमासमक्षम् = उमायं समक्षम्, षष्ठी तत्पुरुष।

श्लोकः ६५

व्युत्पत्ति :

भानुमतः = भानु + मतुप्, षष्ठी एकवचन।

ताम्ररुचा = ताम्र + रुच् + क्विप्, तृतीया एकवचन।

विशोषिताम् = वि-शुष् + नि, क्त + टाप् द्वितीय एकवचन।

उपनिन्ये = उप -नी + लिट् प्रथमा एकवचन।

विभक्ति निर्णय :

गिरिशाय = सम्प्रदाने चतुर्थी ।

भानुमतः = शेषे षष्ठी।

समास :

गिरिशाय = गिरौ शेते, उपपदतत्पुरुष, इति गिरिश, तस्मै।

ताम्ररुचा = ताम्रस्य रुगिव रुक् यस्य, बहुव्रीहि, सः, तेन।

श्लोकः ६६

व्युत्पत्ति :

प्रणयिन् = प्रणय + इनि।

प्रतिग्रहीतुम् = प्रति - ग्रह् + तुमुन् ।

उपचक्रमे = उप - क्रम् + लिट् प्रथमाः एकवचन ।

समधत्त = सम्- धा + लुङ् प्रथमपुरुष एकवचन ।

विभक्ति निर्णय :

त्रिलोचन = कर्तरि प्रथमा।

समास :

त्रिलोचन = त्रीणि लोचनानि यस्य सः, बहुव्रीहि समासः।

प्रणयिप्रियत्वाद = प्रणयिनां प्रिय, षष्ठी तत्पुरुष, प्रणयिप्रियः, तस्य भावः प्रणयिप्रियत्वम्, तस्मात्।

पुष्पधन्वा = पुष्पं धनुर्यस्य, बहुव्रीहि समासः, सः।

अमोघम् = न मोघः, नञ् तत्पुरुष, अमोघः तम् ।

श्लोकः ६७

व्युत्पत्ति :

व्यापारयामास = वि - आ - पृ + णिच् + लिट् अ ।

विभक्ति निर्णय :

उमामुखे = आधारोऽधिकरणे सप्तमी।

समास :

चन्द्रोदयारम्भे = चन्द्रस्य उदयः, षष्ठी तत्पुरुष, चन्द्रोदयः। चन्द्रोदयस्य आरम्भः = षष्ठी

तत्पुरुष, चन्द्रोदयारम्भ, तस्मिन्।

बिम्बाफलाधरोष्ठे = बिम्बं च तत्फलम्, (कर्मधारय), बिम्बफलम्, अधरश्चासौ ओष्ठः,

अधरोष्ठः। बिम्बफलमिव अधरोष्ठं यत्र तत् बहुव्रीहि समासः, तस्मिन्।

परिलुप्तधैर्यः = परिलुप्तं धैर्य यस्य सः,बहुव्रीहि समासः।

उमामुखे =उमायाः मुखम्, षष्ठी तत्पुरुष समासः, तस्मिन्।

श्लोकः ६८

व्युत्पति :

विवृन्वती = वि – वृ + शतृ+ ङीप्, प्रथम एकवचनम् ।

पर्यस्त = परि – अस् +क्त ।

तस्थौ = स्था + लिट् अ ।

साचीकृता = साचि + द्वि + कृ + टाप्, प्रथम एकवचनम् ।

विभक्ति निर्णय :

अङ्गैः = करणे तृतीया।

मुखेन = उपलक्षणे तृतीया।

समास :

शैलसुता = शैल्यस्य सुता, षष्ठी तत्पुरुष समासः।

पर्य्यस्तबिलोचनेन = विशिष्टे लोचने, प्रादितत्पुरुष, बिलोचन। पर्यस्ते बिलोचने यष्मिन्,

बहुव्रीहि समासः। तत्, तेन।

श्लोकः ६९

व्युत्पति :

वशित्वातृ = वश् – इनि + त्व पञ्चमी एकवचनम्।

निगृह्य = नि – गृह् + ल्यप्।

दिदृक्षुः = दृश् + सन् + त।

ससर्ज = सृज् + लिट् प्रथमा एकवचन।

विकृति = वि – कृ + क्तिन्।

विभक्ति निर्णय :

वशित्वात = हेतौ पञ्चमी।

समास :

अयुग्मनेत्र = न युग्मानि – अयुग्मानि,नञ् तत्पुरुष। अयुग्मानि नेत्राणि यस्य, बहुव्रीहि

समासः, सः।

श्लोकः ७०

व्युत्पति :

ददर्श = दृश् + लिट् अ।

निविष्टः = नि - विश् + क्त।

प्रहर्तुम् = प्र - हृ + तुमुन् ।

अभ्युद्यतम् = अभि - उद् + यम् + क्त, द्वितीया वहुवचन।

विभक्ति निर्णय :

आत्मयोनिम् = कर्मणि द्वितीया।

समास :

दक्षिणपाङ्ग = दक्षिणः अपाङ्गः,कर्मधारय समासः।

नतांसम् = नतौ अंसौ यस्य,बहुव्रीहि समासः, सः नतांसः तम्।

आकुंचितसव्यपादम् = सव्यश्चासौ पादः, कर्मधारय समासः। सव्यपादः आकुंचितः सव्यपादो यस्य, बहुव्रीहि समासः, तम्।

चक्रीकृतचारुचापम् = चक्रीकृतः चारुः चापोयेन, बहुव्रीहि समासः तम्।

श्लोकः ७१

व्युत्पत्ति :

दुष्प्रेक्ष्य = दुः - प्र + इक्ष् + यत्।

स्फुरन् = स्फुर् + शत् प्रथमा एकवचनम्।

निष्पतात् = निः - पत् + लिट्, प्रथमा एकवचन।

विभक्ति निर्णय :

तृतीयात् = अपादाने पञ्चमी।

अक्ष्णः= अपादाने पञ्चमी।

समास :

उदर्चिः = उद्गता अर्चिः यस्य,बहुव्रीहि, सः।

तपःपरामर्शविवृद्धमन्योः = तपः परामर्शेन विवृद्धः मन्युः यस्य, बहुव्रीहि समासः यः तस्य।

भ्रूभङ्गदुष्प्रेक्षमुखस्य = भ्रूवः भङ्गः,षष्ठीतत्पुरुषः। भ्रूभङ्गः,

भ्रूभङ्गेन दुष्प्रेक्षं मुखं यस्य, बहुव्रीहि समासः, सः, तस्य।

श्लोकः ७२

व्युत्पत्ति :

संहर = सम् - हृ + लोट् मध्यमपुरुषः एकवचनम्।

जन्मा = जन्मन् प्रथमपुरुषः एकवचनम्।

चकार = कृ + लिट् प्रथमपुरुषः एकवचनम्।

विभक्ति निर्णय :

खे = अधिकरणे सप्तमी।

मदनं = कर्मणि द्वितीया।

समास :

भवनेत्रजन्मा = भवस्य नेत्रम्, षष्ठीतत्पुरुषः समासः। भवनेत्रम्, भबनेत्रात् जन्म यस्य,बहुव्रीहि समासः यः।

भस्मावशेषम् = भस्म अवशेषः यस्य, वहुव्रीहि समासः, यः भस्मावशेषः, तम्।

श्लोकः ७३

व्युत्पत्ति :

प्रभवेण =प्र – भू + अप्, तृतीया एकवचन।

संस्तम्भयता = सम् – स्तम्भ + शतृ + टाप्, तृतीया एकवचन।

बभूव = भु + लिट् + अ।

विभक्ति निर्णय :

मोहेन = अनुक्ते कर्तरि तृतीया।

मुहूर्तम् = अत्यन्तसंयोगे द्वितीया।

समास :

तीव्राभिषङ्गप्रभवेण= तीव्रश्चासौ अभिषङ्ग, कर्मधारय समासः। तीव्राभिषङ्गात् प्रभवति, उपपदतत्पुरुष इति तीव्राभिषङ्गप्रभवः तेन।

कृतोपकारा = कृतः उपकारः यस्याः, बहुव्रीहि समासः, सा।

श्लोकः ७४

व्युत्पत्ति :

अवभज्य = अव – भञ्ज् + ल्यप्।

इच्छन् = इष् + शतृ प्रथमा एकवचन।

तपस्वी = तपस् + विनि (मत्वर्थे) प्रथमा एकवचन।

अन्तर्दधे = अन्तर् + धा + लिट् ए।

विभक्ति निर्णय :

भूतपति= कर्तरि प्रथमा।

समास :

भूतपतिः = भूतानां पतिः, षष्ठी तत्पुरुष समासः।

वनस्पतिम् = वनस्य पतिः, षष्ठी तत्पुरुषसमासः, तम्।

श्लोकः ७५

व्युतपत्ति :

समर्थ = सम् – अर्थ + ल्यप् ।

जगाम = गम् + लिट् अ ।

समक्षम् = सम् + अक्षि + टच् प्रथमा एकवचन ।

विभक्ति निर्णय :

पितुः = सम्बन्धे षष्ठी।

समास :

शैलात्मजा = आत्मनः जायते, उपपदतत्पुरुष इति आत्मजा। शैलस्य आत्मजा = षष्ठी तत्पुरुष समासः।

उच्छिरसः = उन्नतं शिरः यस्य, बहुव्रीहि समासः, स उच्छराः, तस्य।

श्लोकः ७६

व्युत्पत्ति :

पद्मिनीं =पद्म + इनि + ङीप्, द्वितीया एकवचन।

आदाय = आ – दा + ल्यप् ।

विभ्रत् = भृ + शतृ + प्रथमा एकवचन ।

आसीत् = अस् + लङ्+ द।

विभक्तिनिर्णय :

दोर्भ्याम् = करणे तृतीया ।

समास :

मुकुलिताक्षीम् = मुकुलिते अक्षिणी यस्याः, बहुव्रीहि समासः सा, ताम्।

रुद्रसंरम्भभीत्या = रुद्रस्य संरम्भ षष्ठी तत्पुरुष समासः। रूद्रसंरम्भात् भीतिः, पञ्चमी तत्पुरुष समासः, तया।

वेगदीर्घिकृताङ्ग = वेगेन दीर्घीकृतम् अङ्गं यस्य, बहुव्रीहि समासः सः।

दन्तलग्नाम् = दन्तयोः लग्नाः, षष्ठी तत्पुरुष समासः, ताम्।

सुरगज = सुराणां गजः, षष्ठी तत्पुरुष समासः, तत्।



ज्ञातव्यम्

श्लोकः ६२) वृषभध्वजाय = वृषभः (ऋषभः वा वृषः), ध्वजः (चिह्नम्) वृषभः शिवस्य वाहनम् अस्ति।

वृषभः ध्वजः (चिह्नं) यस्य, बहुव्रीहिः समासः।

९.५ विशेषश्लोकानां भावार्थः

क) प्रतिग्रहीतुं प्रणयिप्रियत्वात्त्रिलोचनस्तामुपचक्रमे च।
संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ॥ ६६ ॥

हिमालयस्य कन्या पार्वती तस्याः भविष्यत् पति महादेवस्य तपस्याभूमौ उपस्थिता भवति। तस्मिन् समये महादेवः तस्य हृदये परमात्मानं पश्यति स्म, सः तस्य योगसम्पन्नं करोति स्म। नन्द्याः अनुमति नीत्वा पार्वती महादेवस्य समाधौ उपस्थिता भवति। पार्वत्याः द्वे सख्यौ महादेवं

नमतः ततः वसन्तस्य पुष्पं समर्पनं कुरुतः। महादेवः पार्वत्ये 'अनन्यासक्तस्वामीलाभ' इति आशीर्वादं यच्छति। ततः पार्वती ताम्रहस्तेन पद्ममालां निवेदयति।

भक्तं प्रति तस्याः स्नेहार्थं महादेवः तां मालां ग्रहितुम् आगच्छति च कामदेवः 'सम्मोहन्' नाम अमोघतीरं तस्य धनुषि संयुक्तं करोति। कामदेवस्य बाणाः पञ्चपुष्पैः नामकृताः। यथा-

अरबिन्दमशोकञ्च चूतञ्च नवमल्लिका।

नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः।।

अर्थात् - (१) अरविन्दः, (२) अशोकः, (३) चूतं अर्थात् आम्रपुष्पम्, (४) नवमल्लिका, (५) नीलोत्पलम्।

अतः महादेवं चञ्चलयित्वा पर्वतीं प्रति आकृष्टं कर्तुम् कामदेवः 'सम्मोहन' नामकं अमोघबाणं तस्य प्रतिः प्रक्षिप्तवान्।

ख) तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।

अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥ ७३ ॥

महादेवस्य समाधिस्थानं कामदेवः तस्य मित्रेण वसन्तेन सह च पत्न्या रत्या सह गच्छति। वसन्तः शिवस्य आश्रमे अकालवसन्तं घटयति। तदा आश्रमस्य पशु-विहग- वृक्षाः च पत्रपुष्पाभ्यां सुशोभिताः भवन्ति। हिमालयस्य कन्या पार्वती महादेवं पतिरूपेण प्राप्ताय शिवस्य समीपे वसन्तस्य पुष्पं निवेदनं करोति। सा तं पद्मबीजस्य मालां उपधावनं कारयति। कामदेवः महादेवं प्रति सम्मोहननामकं अव्यर्थवाणं निक्षेपं करोति। पार्वत्याः स्पर्शेन महादेवः क्षणिकाय आलोडितः भवति। सः चञ्चलस्य कारणम् अनुधानाय समन्तात् पुश्यति। परन्तु जितेन्द्रः महादेवः तस्य क्षिप्रतां संयतं कृत्वा कामदेवस्य हस्ते धनुकं पश्यति। तस्मिन् समये भव नेत्रजन्मा अग्निशिखा कामदेवं भस्मिभूतं कृतवान्। तदा महादेवः स्थानं त्यजति। तदर्थं देवताः आकाशे उपस्थिताः आसन् मदनः अनेन कार्येण ध्वंसः भवति। देवताः महादेवं क्रोधं संवरणाय अनुरोधं करोति। किन्तु देवतानां शब्दः तस्य समीपे न आगतवान्, तस्मात् पूर्वं भव नेत्रजन्मा अग्निशिखा मदनदेवं भस्मीभूतं कृतवान्।

कामदेवस्य एवमवस्थां दृष्ट्वा देवी रतिः शोकेन मूर्च्छिता भवति। क्षणिकाय सा तस्याः प्रियतमस्य एवमस्थां द्रष्टुं न प्राप्नोति। अतः सा मूर्च्छा प्रियसखीव भर्तुनिधन वार्तां निगूहन्ती रतेः उपकारं कृतवतीव।



९.६ अध्यायात् किमवगतम्

अस्मिन् अध्यायः अध्ययनं कृत्वा वयम् -

- श्लोकानां (६१-७६) संस्कृतपाठगद्यपाठश्च ज्ञातुं शक्नुमः।
- प्रत्येकस्य श्लोकस्य अर्थं, असमीयानुवादं च अवगन्तुं शक्नुमः।

- प्रत्येकस्य श्लोकस्य व्याकरणसम्बन्धिनी टिप्पणीः तथा श्लोकानां विषयवस्तुम् अवगतम्।
- महत्त्वपूर्णश्लोकानां भावार्थविषये ज्ञातुं शक्नुमः।
- महत्त्वपूर्णश्लोकानां अर्थं ज्ञातवान्।



९.७ ज्ञानाधिक्यम्

१) दि कुमारसम्भवम् अव् कालिदास (केण्टो १-८) मतिलाल बानारसीदास, दिल्ली।
२) कालिदासस्य कुमारसम्भवम् (केण्टो १-८) नाग पाब्लिशार्स, जवाहरनगर, दिल्ली-७।
३) कुमारसम्भवम् (१-५) सर्ग, महाकवि कालिदासेण प्रणीतम्। सम्पादना - श्रीमद्गुरुनाथ विद्यानिधि भट्टाचार्य, संस्कृत पुस्तकभाण्डार, कलिकता-७००००६।
४) संस्कृत साहित्यसम्भार (Vol. 2), नवपत्र प्रकाशन, कलिकता-७०००७३।
५) संस्कृतसाहित्यसम्भारः, द्वितीयखण्डः। अनुवादकः सुरारिमोहनः, तृतीयः सर्गः।
६) शइकिया बरा, इन्दिरा, कालिदासकृतः कुमारसम्भवम्, प्रकाशिका, पानबजारः, गुवाहाटी।



९.८ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : 'भानु' शब्दस्य अर्थः 'सूर्यः' इति।
प्रश्नः २ उत्तरम् : गङ्गां स्वर्गे 'मन्दाकिनी' इति नाम्ना अभिधीयते।
प्रश्नः ३ उत्तरम् : 'गिरिशः' इति शब्देन 'महादेवं' इति वोध्यते।
प्रश्नः ४ उत्तरम् : 'सन्मोहन' इति नाम बाणः अस्ति।
प्रश्नः ५ उत्तरम् : पर्वत्याः रक्तिमौष्ठयुगलं रक्तिमविम्बफलेन सह तुल्यते।
प्रश्नः ६ उत्तरम् : हे प्रभो! क्रोधं निवारयतुइति वाक्यं पुनः पुनः उच्चारितवान्।
प्रश्नः ७ उत्तरम् : 'भूतनाथ' इति महादेवस्य नाम अस्ति।



९.९ अभ्यासप्रश्नाः

क) वस्तुधर्मी-प्रश्नाः (प्रत्येकप्रश्नस्य उत्तरं ५० शब्देषु लिखत)

प्रश्नः १ : 'कुमारसम्भवम्' इतिमहाकाव्यस्य तृतीयसर्गस्य (६१-७६) श्लोकानां मध्ये कामदहनस्य वर्णनं कुरुत।

प्रश्नः २ : अधोलिखितेषु शब्देषु व्याकरणगतटिप्पणीं लिखत-

हरबद्ध, ताम्ररुचा, मन्दाकिनी, प्रणयिप्रिय,वशित्वात् चक्रीकृत चारुचाप, संहर, भस्मावशेष।

ख) संक्षिप्तप्रश्नाः (प्रत्येकं प्रश्नं १५०-३०० शब्देषु लिखत)

प्रश्नः १ : कुमारसम्भवम् इति महाकाव्यस्य तृतीयसर्गे महादेवस्य आश्रमे पार्वती-प्रवेशस्य वर्णनं दीयताम्।

प्रश्नः २ : यदा कामदेवः शिवकोपेन भस्मीभूतः अभवत् तदा रतिः किं जातं लिखत?

प्रश्नः ३ : महादेवात् भीतां पार्वतीं पित्रा हिमालयेण सह गमनकालस्य दृश्यं लिखत।

ग) निबन्धप्रश्नाः (प्रत्येकप्रश्नस्य उत्तरं ५० शब्देषु लिखत)

प्रश्नः १ : भावार्थं लिखत

प्रतिग्रहीतुं प्रणयिप्रित्वात्रिलोचनस्तामुपचक्रमे च।
सन्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत वाणम्॥

प्रश्नः २ : भावार्थं लिखत

तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव॥

*** ***** ***

अध्यायः १० : कुमारसम्भवम् (चतुर्थः सर्गः, श्लोकाः १-२३)

अध्यायस्य संरचना

१०.१ उद्देश्यम्

१०.२ परिचयः

१०.३ चतुर्थसर्गस्य सारांशः

१०.४ चतुर्थसर्गस्य (१-२३) श्लोकानां संस्कृतपाठः

- १०.४.१ श्लोकानाम् अन्वयः
- १०.४.२ श्लोकानाम् अनुवादः
- १०.४.३ श्लोकानां व्याकरणटिप्पणी
- १०.४.४ श्लोकानां व्याख्या भावार्थश्च

१०.५ कुमारसम्भवस्य चतुर्थसर्गस्य असमीयाभाषायां सारांशः

१०.६ अस्मात् अध्यायात् किमवगतम्

१०.७ ज्ञानाधिक्यम्

१०.८ अभ्यासप्रश्नाः

१०.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- अस्य पाठस्य अध्ययनेन छात्राः कुमारसम्भवमहाकाव्यस्य परिचयं प्राप्तुं शक्नुवन्ति।
- अस्य पाठस्य अध्ययनेन चतुर्थसर्गस्य विषयम् अवगन्तुं शक्नुवन्ति।
- अस्य पाठस्य अध्ययनेन पतिकामदेवस्य विरहात् रतिदेव्याः या शोकावस्था जाता तस्याः आभासं प्राप्तुं शक्नुवन्ति।
- चतुर्थसर्गस्य श्लोकानाम् अनुवादाः तथा व्याकरणटिप्पणयः च ज्ञातुं शक्नुवन्ति।

१०.२ परिचयः

कुमारसम्भवम् महाकविकालिदासकृतं सप्तदशसर्गात्मकं महाकाव्यं वर्तते। अस्मिन महाकाव्ये अनेकरमणीयं सोन्दर्यस्थलं तथा हिमालयवर्णनं पार्वत्याः तपस्यावर्णनं, वसन्तागमनवर्णनं, शिवपार्वत्योः विवाहवर्णनं, रतिक्रीडावर्णनं च इत्यादीनां समावेशो भवति। अस्मिन् अध्याये भवद्भिः कुमारसम्भवमहाकाव्यस्य चतुर्थसर्गस्य (१-२३) श्लोकान् अधीतुं शक्नोति।

१०.३ चतुर्थसर्गस्य सारांशः

कुमारसम्भवमहाकाव्यस्य चतुर्थसर्गे कामदेवस्य पत्न्याः रतिदेव्याः करुणविलापवर्णनं समुपलभ्यते। वसन्तः तां सान्त्वनां प्रददाति। परन्तु सा सन्तुष्टा न भवति। सा पत्युः मृत्युना शोकविह्वला सती मृत्युलोकं प्रति पतिम् अनुःसरणं कर्तुम् इच्छां प्रदर्शयति। परन्तु तदा एव आकाशवाण्या तां तथा कर्तुं वाधां प्रददाति। अदृष्टशक्तिः तां वरं प्रददाति यत् कामदेवरत्योः पुनर्मिलनं भविष्यति। अस्मिन् सर्गे रतिदेव्याः करुणविलापयुतैः श्लोकैः सर्वे पाठकजनाः अपि शोकग्रस्ताः भवन्ति। भारतीयसमाजे स्त्रियः सर्वदैव ? पतीनाम् अनुकरणं कुर्वन्ति। स्त्रीणां कृते पतिः देवता वर्तते। तथैव कामदेवं विना रतिदेव्या जीवनमपि निष्फलं भवति। स्त्रियः पतिमार्गम् अनुःसरति इति अचेतनपदार्थाः स्वक्रियया सूचयन्ति। द्रष्टव्यं यथा –

शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि।। ४.३३

१०.४ चतुर्थसर्गस्य श्लोकानां संस्कृतपाठः

१. अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता।
विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम्।। ४.१ ।।

२. अवधानपरेचकारसाप्रलयान्तोन्मिषितेविलोचने।
न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्त दर्शनम्।। ४.२ ।।

३. अयिजीवितनाथजीवसीत्यभिधायोत्थितयातयापुरः।
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम्।। ४.३ ।।

४. अथसापुनरेवविह्वलावसुधालिङ्गनधूसरस्तनी।
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम्।। ४.४ ।।

५. उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया।
तदिदं गतमीदृशीं दशां, न विदीर्ये, कठिनाः खलु स्त्रियः।। ४.५ ।।

६. क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः।
नलिनीं क्षतसेतुबन्धनो जलसंघात इवासि विद्रुतः।। ४.६ ।।

७. कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम्।
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते।। ४.७ ।।

८. स्मरसि स्मर! मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम्।
च्युतकेशरदूषितेक्षणान्यवतंसोत्पलताडनानि वा।। ४.८ ।।

९. हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम्।
उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः।। ४.९ ।।

१०. परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव।

विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम्।। ४.१०।।

११. रजनीतिमिरावगुण्ठितेपुरमार्गेघनशब्दविक्लवाः।
वसतिं प्रिय! कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः।। ४.११।।

१२. नयनान्यरुणानि घूर्णयन्वचनानि स्खलयन्पदे पदे।
असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना।। ४.१२।।

१३. अबगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः।
बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग! मोक्ष्यति।। ४.१३।।

१४. हरितारुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः।
वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति।। ४.१४।।

१५. अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदतीव माम्।। ४.१५।।

१६. प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः।
रतिदूतिपदेषु कोकिलां मधुरालापनिसर्गपण्डिताम्।। ४.१६।।

१७. शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च।
सुरतानि च तानि ते रहः स्मर! संस्मृत्य न शान्तिरस्ति मे।। ४.१७।।

१८. रचितं रतिपण्डित! त्वया स्वयमङ्गेषु ममेदमार्तवम्।
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते।। ४.१८।।

१९. बिबुधैरसि यस्य दारुणैरसमाप्ते परिकर्मणि स्मृतः।
तमिमं कुरु दक्षिणेतरं चरणं निर्मितरागमेहि मे।। ४.१९।।

२०. अहमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयणी भवामि ते।
चतुरैः सुरकामिनीजनैः प्रिय! यावन्न विलोभ्यसे दिवि।। ४.२०।।

२१. मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे।
वचनीयमिदं व्यवस्थितं रमण! त्वामनुयामि यद्यपि।। ४.२१।।

२२. क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया।
सममेव गतोऽस्यतर्कितां गतिमङ्गेन च जीवितेन च।। ४.२२।।

२३. ऋजुतां नयतः स्मरामि ते शरमुत्पङ्गनिषण्णधन्वनः।
मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च यत्।। ४.२३।।

१०.४.१ श्लोकानां अन्वयः १-२३

१. अथ मोहपरायणा सती विवशा कामवधूः असह्यवेदनं नववैधव्यं प्रतिपादयिष्यता विधिना विबोधिता।

२. सा प्रलयाऽन्तोन्मिषिते विलोचने अवधानपरे चकार। प्रियम् अतृप्तयोः तयोः अत्यन्तविलुप्तदर्शनं न विवेद।

३. अयि जीवितनाथ! जीवसि इति अभिधाय उत्थितया तया पुरः क्षितौ केवलं पुरुषाकृतिहरकोपाऽनलभस्म ददृशे।

४. अथ पुनरेव विह्वला वसुधाऽलिङ्गनधूसरस्तनी विकीर्णमूर्द्धजा सा स्थलीं समदुःखाम् कुर्वती इव विललाप।

५. (हे नाथ!) तव यत् करणं कान्तिमत्तया विलासिनाम् उपमानम् अभूत्। तत् इदम् ईदृशीं दशां गतम्। (तथाऽपि) न विदीर्ये, हि स्त्रियः कठिनाः खलु।

६. (हे प्रिय!) क्षतसेतुबन्धनो जलसंघातो नलिनीम् इव त्वदधीनजीवितां मां क्व नु विनिकीर्य क्षणभिन्नसौहृदः (सन्) विद्रुतः असि?

७. (हे प्रिय!) (त्वम्) मे विप्रियं कृतवान् न असि, मया च ते प्रतिकूलं न कृतम्। अकारणम् एव विलपन्त्यै रतये किं दर्शनं न दीयते।

८. हे स्मर! गोत्रस्खलितेषु मेखलागुणैः स्मरसि उत? च्युतकेशरदूषितेक्षणानि अवतंसोत्पलताडनानि स्मरसि वा?

९. (हे प्रिये!) त्वं मे हृदये वससि इति मत्प्रियं यत् अवोचः तत् कैतवम् अवैमि। इदम् उपचारपदं न चेत् त्वम् अनङ्गः, कथं रतिः अक्षता?

१०. अहं परलोकनवप्रवासिनः तव पदवीं प्रतिपत्स्ये। विधिना एष जनः वञ्चितः, (यत्) देहिनां सुखं त्वदधीनं खलु।

११. हे प्रिय! रजनीतिमिराऽवगुण्ठिते पुरमार्गे घनशब्दविक्लवाः प्रियाः कामिनां वसतिं प्रापयितुं त्वत् ऋते क ईश्वरः?

१२. (हे प्रिय!) अरुणानि नयनानि घूर्णयन् पदे पदे वचनानि स्खलयन् प्रमदानां वारुणीमदः त्वयि असति विडम्बना।

१३. हे अनङ्ग! प्रियबन्धोः तव वपुः कथीकृतम् अवगम्य निष्फलोदयः निशाकरः बहुले गते अपि तनुतां दुःखं मोक्ष्यति।

१४. (हे कुसुमायुध!) हरिताऽरुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः नवचूतप्रसवः सम्प्रति कस्य बाणतां गमिष्यति? वद।

१५. (हे प्रिय!) त्वया अनेकशो धनुषः गुणकृत्ये नियोजिता इयम् आलिपङ्क्तिः करुणस्वनैः विरुतैः गुरुशोकां माम् अनुरोदिति इव।

१६. (हे कान्त!) तावत् पुनरपि मनोहरं वपुः प्रतिपद्य उत्थितः सन् मधुरालापनिसर्गपण्डितां कोकिलां रतिदूतिपदेषु आदिश।

१७. हे स्मर! शिरसा प्रणिपत्य याचितानि सवेपथूनि उपगूढानि च, तानि रहः सुरतानि च संस्मृत्य मे शान्तिः न अस्ति।

१८. हे रतिपण्डित! त्वया मम अङ्गेषु स्वयं रचितम् इदम् आर्तवं कुसुमप्रसाधनं ध्रियते, तव चारु वपुः न दृश्यते।

१९. दारुणैः विबुधैः यस्य परिकर्मणि असमाप्ते (सति) स्मृतः असि, तम् इमं दक्षिणेतरं

निर्मितरागं कुरु, एहि।

२०. अहं पतङ्गवर्त्मना एत्य पुनः ते अङ्काश्रयणी भवामि, हे प्रिय! दिवि चतुरैः सुरकामिनीजनैः यावत् न विलोभ्यसे।

२१. हे रमण! त्वाम् अनुयायि यद्यपि, (किन्तु) मदनेन विनाकृता रतिः क्षणमात्रं जीविता किल इति मे वचनीयं व्यवस्थितम्।

२२. (हे नाथ!) परलोकाऽन्तरितस्य ते अन्त्यमण्डनं मया कथं क्रियताम्? (यत्) अङ्गेन जीवितेन च समम् एव अतर्कितां गतिं गतः असि।

२३. शरं ऋजुतां नयतः उत्पङ्गनिषण्णधन्वनः ते मधुना सस्मितां कथां, यत् नयनोपन्तविलोकितं च तत् स्मरामि।

१०.४.२ श्लोकानाम् अनुवादः

१. तदनन्तरं मूर्छितां सतीं विवशां तां रतिं नवीनतया प्राप्तस्य वैधव्यस्य असहनीयं दुःखं तदनुभवं च प्रदातुं अदृष्टः सः पुनः चेतनां ददाति।

२. चेतनां प्राप्य रतिः कामदेवस्य दर्शनेच्छया विलोचने उन्मीलति। परन्तु कामदेवस्य दर्शनम् अधुना अत्यन्तं दुर्लभं भवति इति तया न ज्ञायते। यतो हि शङ्करः नेत्राग्निनिर्गमनावसरे सा मूर्छिता जाता आसीत्। अतः सा मदनदर्शनम् असम्भवमिति न ज्ञातवती।

३. हे प्राणनाथ! जीवसि? इति उक्त्वा सा उत्थाय तस्य कामदेवस्य पार्श्वे गतवती दा सा शङ्करस्य कोपाग्निना भष्मीभूतं दग्धं पुरुषाकृतिं दृष्टवती।

४. कामदेवस्य मृत्युः अभवत् इति चेतनां प्राप्य दुःखेन विलपति। भूमेः आलिङ्गनेन धुसरवर्णा स्तनी सा विक्षिप्तकेशैः वनस्थान् पशुपक्षिगणान् समदुःखान् कुर्वती विलपितवती।

५. हे प्रिय! तव यत् शरीरं सौन्दर्याधिक्येन विलासिनां पुरुषाणां कृते उपमाशम् असीत्, इदानीं तदेव एतच्छरीरं इदृशी अवस्था प्राप्ता। एतत् दृष्ट्वा अपि मम हृदयं विदीर्णं न भवति। स्त्रियः अतीव कठिनास्सन्ति इत्येव अनुमीयते।

६. हे प्रिय! यथा जलस्य प्रचण्डप्रवाहः क्षणमात्रेण एव सेतुबन्धं भङ्गं कृत्वा जलाधीनाः कमलिन्यः इतस्ततः विशृंखलं कृत्वा शीघ्रम् निःसरति तथैव त्वम् अपि मम प्रेमबन्धनं अकस्मात् परित्यज्य तवाधीनां मां रतिं परित्यज्य कुत्र गच्छति?

७. हे नाथ! त्वं कदापि मम अप्रियं कार्यं न कृतवान्, तथा अहमपि तव अप्रियं न कृतवती। तर्हि कारणं विनैव इत्थं विलपन्त्यं मां रतिं तव दर्शनं किमर्थं न ददाति?

८. हे नाथ! नामव्यत्यासेषु मेखलागुणैः बन्धनं स्मरसि? उत च्युतकेशरैः भ्रष्टकिञ्जल्कैः दूषिते ईक्षणे येषु तानि अवतंसोत्पलताडनानि च स्मरसि।

९. त्वं सदैव उक्तवान् आसीत् यत् 'हे रते! त्वं सर्वदा मम हृदि निवसति।' इति तव एतत् वचनं उपचारमात्रं (परस्य रञ्जनार्थं यत् असत्यभाषणं सः उपचारः) आसीत् वा? यदि उपचारमात्रं नासीत् तर्हि त्वं शररीरहितम् अनङ्गं कथं सञ्जातः तथा एषा रतिः अक्षता अविनष्टा कथम् अस्ति?

१०. हे प्रियतम! परलोकरूपनये प्रवेशाय त्वम् एकाकी गतवान्। अहमपि अनेन पथा शीघ्रं भवतां समीपम् आगमिच्छामि। दैवेन एषः जनः प्रतारित अस्ति। मम सुखमेव न केवलं तवाधीनं वर्तते अपि समस्तसंसारसुखं तवाधीनं वर्तते।

११. वर्षाकालेरात्रौ ?घनान्धकारेण अवलिप्ते भयानकनगरे पथि मेघगर्जनेन भीताः कामिन्यः कामिनां वसतिं प्रापयितुं त्वं विना कः सहायं करिष्यति?

१२. हे प्रभो! रक्तवर्णनेत्रयुगलं घूर्णयन् पदे पदे वाचः विपर्यासयन्, मद्यपानेन प्रमदाः त्वयि कामदेवे असति निष्फलत्वं प्राप्नुवन्ति।

१३. हे अनङ्ग! प्रियसखस्य तव शरीरं कथामात्रावशिष्टमिति ज्ञात्वा चन्द्रमा अपि उदयनिष्फलत्वम् अवगम्य कृष्णपक्षे गते शुक्लपक्षे अतीव कठिनतया स्वं पुष्टीकरोति।

१४. हि प्रियतम! पुंस्कोकिलस्य मधुरशब्देन यस्य उद्गमः अनुमीयते, तादृशः नूतनचूतप्रसवः इदानीं कस्य बाणतां गच्छति? इति त्वमेव भण!

१५. हे नाथ! अनेकवारं तव धनुषः गुणकृत्ये संयोजिता एषा भ्रमरपङ्क्तिकरुणशब्दैः रुदन्ती दीर्घशोकेविह्वलां माम् अभागिनीम् अनुकरोति।

१६. हे प्रिय! भस्ममयं इदं शरीरं परित्यज्य पूर्वमिव नवीनम् अत्यन्तं सुन्दरं शरीरं धारयन् कामिनीकामचकयोः परस्परसंघटनकार्याय स्वभावतः एव मधुरवाण्यां पारङ्गतां कोकिलायाः दूतीं कार्येषु नियुक्तन करोतु इति।

१७. हे स्मर! प्रणयकोपेन अभिमानं कुर्वतीं मां रतिं शिरसा पणिपत्य याचितानि सकम्पानि आलिङ्गनानि तदतिरिक्तं च एकान्ते सुरतादिनी स्मृत्वा अस्मिन् समये मम आत्मा शान्तिं न प्राप्नोति।

१८. हे रतिपण्डित! तेन स्वहस्तेन रचितानि वसन्तपुष्पाणि मच्छरीरस्य अङ्गावयवेषु पूर्वमिव अलङकृतानि सन्ति। परन्तु तैः एव अलङ्कारैः अलङकृतं तव चारु शरीरं न दृश्यते इति।

१९. हे नाथ! दारुणैः विबुधैः यस्य प्रसाधने असमाप्ते सति स्मृतः असि तमिमं वामं मे चरणं रचितलाक्षारागं कुरु।

२०. हे प्रियतम! अहं पतङ्गमार्गेण अग्निप्रवेशमार्गेण वा अनचसरणं कृत्वा तव समीपं आगत्य तव अङ्के आश्रयं गृह्णामि। यावत् स्वर्गे पुरुषान् आकर्षयन्ती ताः अप्सरसः त्वं आकृष्टं न करिष्यन्ति।

२१. हे रमण! यद्यपि एतत् निश्चितमस्ति यत् अहं तव अनुगमनं करोमि तथापि कामदेवं

विना अपि रतिदेवी क्षणमात्रं जीविता आसीत् इति लोकापवादः स्थायी भविष्यति।

२२. दुःखमनुभूयते यत् परलोकवासिनं तव शरीरं केन प्रकारेण सुसज्जितम् अलङकृतं वा करोमि। जगति अन्यप्राणीनां प्राणत्यागात् अनन्तरं शरीरम् अवशिष्टं भवति परन्तु त्वं शरीरप्राणाभ्यां सहैव अविचारितां गतिं प्राप्तः असि।

२३. बाणस्य वक्रतां ऋजुं कृत्वा तथा स्वाङ्के धनुः धारयन् वसन्तेन सह मन्दस्मितयुक्त तव कथाम्, मध्ये मध्ये माम् उद्दिश्य तव अपाङ्गवीक्षणं स्मरामि।

१०.४.३ श्लोकानां व्याकरणटिप्पणी

१. विधिना- उक्ते कर्मणि प्रथमा।
मोहपरायणा - परमयनमाश्रयो यस्याः सा मोहपरायणा।
विबोधिता- वि- √बुध् + क्त , स्त्रीलिंगम्।
नववैधव्यमसह्यवेदनम् -
सती - अस् + शतृस्त्रीलिङ्गे एकवचनम्
विबोधित - वि-√बोधय् + क्त
प्रतिपादयिष्यता-√प्रति-पादय् + कृत्, तृतीयाविभक्तेः एकवचनम्

२. चकार- √कृ+लिट् अ
प्रलयान्तोन्मिषिते - भावे सप्तमी
उन्मिषिते-√उत्-मिष् + क्त , सप्तमी
विलोचने- भावे सप्तमी
तयोरतृप्तयोः- तयोः + अतृप्तयोः। सम्बन्धे षष्ठी

३. अयि - सम्बोधने प्रथमा
जीवितनाथ- सम्बोधने प्रथमा
तया - अनुक्ते कर्तरि तृतीया।
अभिधाय - √अभि-धा + ल्यप्
उत्थित ऋ-√उत्-स्था + क्त
हरकोपानलभस्म- हरस्य कोपः हरकोपः (षष्ठीतत्पुरुषसमासः), हरकोपस्य अनलः हरकोपानलः (षष्ठीतत्पुरुससमासः), तेन भस्मः, हरकोपानलभस्मः (तृतीया तत्पुरुषः)

४. पुनरेव- पुनः + एव
वसुधालिङ्गनधूसरस्तनी- वसुधायाः आलिङ्गनं वसुधालिङ्गनम् (षष्ठीतत्पुरुससमासः), तेन वसुधालिङ्गनेन धूसरः वसुधालिङ्गनधूसरः (तृतीया तत्पुरुषः समासः), तस्मिन् स्तनौ यस्याः सा, वसुधालिङ्गनधूसरस्तनी (बहुव्रीहिसमासः)

कुर्वती- √कृ+ शतृ + स्त्रीलिङ्गम्

५. स्त्रियः - कर्तरि प्रथमा (बहुवचनम्)

गतम् - √गम् + क्त (नपुंसकलिङ्गम्)

दशां - कर्मणि द्वितीया

६. मां - कर्मणि द्वितीया

सौहृदः - सुहृदो भावः सौहृदम्

विद्रुतः - वि -√द्रु + क्त

७. कृतवान् - √कृ + क्तवतु

मे - शेषे षष्ठी

मया - अनुक्ते कर्तरि तृतीया

कृतम् - √कृ + क्त (नपुंसकलिङ्गम्)

रतये - क्रियाग्रहणात् चतुर्थी

८. स्मर - सम्बोधने प्रथमा

स्मरसि - √स्मृ + लट् सि

मेखलागुणैरुत - मेखलागुणैः + उत

९. हृदये- अधिकरणे सप्तमी

वससि- √वस् + लट् सि

मत्प्रियं - मम प्रियं मत्प्रियम् (षष्ठीतत्पुरुससमासः)

१०. तव- शेषे षष्ठी

विधिना - करणे तृतीया

वञ्चितः - √वञ्च् + क्त

देहिनां - शेषे षष्ठी

त्वदधीनम् - त्वयि अधीनम् (सप्तमी शौण्डैः इति समासः)

११. प्रिय- सम्बोधने प्रथमा

रजनीतिमिरावगुण्ठिते- भावे सप्तमी

पुरमार्गे - भावे सप्तमी

कामिनां - शेषे षष्ठी

१२. नयनान्यरुणानि - नयनानि + अरुणानि

त्वयि - भावे सप्तमी

असति- भावे सप्तमी

१३. अवगम्य - अव - √गम् + ल्यप्

बहुले - भावे सप्तमी

गते- भावे सप्तमी

अनङ्ग- सम्बोधने प्रथमा

१४. वद - √वद् लोट् हि

कस्य - शेषे षष्ठी

बाणतां - कर्मणि द्वितीया

गमिष्यति - √गम् + लृट् स्यति

१५. धनुषः - शेषे षष्ठी

नियोजिता - नि- √युज् - क्त (स्त्रीलिङ्गे)

विरुतैः - अनुक्ते कर्तरि तृतीया

गुणकृत्ये - भावे सप्तमी

१६. प्रतिपद्य - प्रति -√पद् + ल्यप्

मनोहरं - कर्मणि द्वितीया

वपुः - कर्मणि द्वितीया

आदिश - आ - √दिश् - लोट् हि

१७. शिरसा - करणे तृतीया

स्मर - सम्बोधने प्रथमा

ते - शेषे षष्ठी

१८. रतिपण्डित - सम्बोधने प्रथमा

रचितं - √रच् +क्त

त्वया - अनुक्ते कर्तरि तृतीया

कुसुमप्रसाधनं - उक्ते कर्मणि प्रथमा

वपुः- उक्ते कर्मणि प्रथमा

दृश्यते - √दृश् + लट् ते

१९. दारुणैरसमाप्ते - दारुणैः + असमाप्ते

स्मृतः - √स्मृ + क्त

स्मृतिः - √स्मृ + क्तिन्

कुरु - √कृ + लोट् हि

२०. अहं - कर्तरि प्रथमा

एत्य - इ + ल्यप्

भवामि - भू + लट् मि

ते - शेषे षष्ठी

प्रिय - सम्बोधने प्रथमा

सुरकामिनीजनैः - अनुक्ते कर्तरि तृतीया

२१. मदनेन - विनायोगे तृतीया

रतिः - उक्ते कर्मणि प्रथमा

मे - शेषे षष्ठी

रमण - सम्बोधने प्रथमा

अनुयामि - अनु -√या + लट् ति

व्यवस्थितं - वि - अव - √स्था + क्त

२२. परलोकान्तरितस्य - परलोके अन्तरितः परलोकान्तरितः (सप्तमी तत्पुरुषः), तस्य परलोकान्तरितस्य

मया - अनुक्ते कर्तरि तृतीया

गत- गम् + क्त

२३. स्मरामि - √स्मृ + लट् मि

ते- शेषे षष्ठी

मधुना - सहयोगेऽप्रधाने तृतीया

सस्मितां - कर्मणि द्वितीया

१०.४.४ श्लोकानां व्याख्या भावार्थश्च

१. अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने।
न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्त दर्शनम्।।

प्रसङ्गः- श्लोकोऽयं महाकविकालिदासविरचितस्य कुमारसम्भवम् इति प्रथितमहाकाव्यस्य चतुर्थसर्गे समुपलभ्यते।

अन्वयः- सा प्रलयाऽन्तोन्मिषिते विलोचने अवधानपरे चकार। प्रियम् अतृप्तयोः तयोः अत्यन्तविलुप्तदर्शनं न विवेद।

व्याख्या- कविकुलपतिकालिदासप्रणीतस्य कुमारसम्भवमहाकाव्यस्य चतुर्थसर्गे रतिविलापः समुपलभ्यते। अस्मिन् भागे कामदेवः कथं भस्मीभूतः अभवत्, तस्य विरहेन रतिदेव्याः किदृशी दशा सञ्जाता इत्यादिकं वर्णनं प्राप्यते। श्लोकेऽस्मिन् शोकविह्वलायाः रतिदेव्याः परिस्थितिः वर्णिता अस्ति। पतिकामदेवस्य सम्मुखं शङ्करस्य नेत्राग्निनिर्गमनं परिलक्ष्य सहसा एव रतिः मूर्च्छिता अभवत्। ग्रन्थकारः एतदेव सूचयति यत् तदानीं रतिदेव्याःनवीनतया प्राप्तस्य वैधव्यस्य बोध अपि नासीत्। यथा वैधव्यदुःखप्रदानाय कोऽपि अदृष्टः तां चेतनां ददाति इति प्रतिभाति।चेतनां प्राप्य रतिः कामदेवस्य दर्शनेच्छया विलोचने उन्मीलति। परन्तु कामदेवस्य दर्शनम् अधुना अत्यन्तं दुर्लभं भवति इति तया न ज्ञायते। यतो हि शङ्करः नेत्राग्निनिर्गमनावसरे सा मूर्च्छिता जाता आसीत्। अतः सा मदनदर्शनम् असम्भवमिति न ज्ञातवती।

पादटीका-

चकार- √कृ+लिट् अ

प्रलयान्तोन्मिषिते - भावे सप्तमी

उन्मिषिते - √उत् -मिष् + क्त, सप्तमी

विलोचने- भावे सप्तमी

तयोरतृप्तयोः- तयोः + अतृप्तयोः। सम्बन्धे षष्ठी

२. क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः।
नलिनीं क्षतसेतुबन्धनो जलसंघात इवासि विद्रुतः।। ४.६।।

प्रसङ्गः--- श्लोकोऽयं महाकविकालिदासविरचितस्य कुमारसम्भवम् इति प्रथितमहाकाव्यस्य चतुर्थसर्गे समुपलभ्यते।

अन्वयः--- (हे प्रिय!) क्षतसेतुबन्धनो जलसंघातो नलिनीम् इव त्वदधीनजीवितां मां क्व नु विनिकीर्य क्षणभिन्नसौहृदः (सन्) विद्रुतः असि?

व्याख्या--- कविकुलपतिकालिदासप्रणीतस्य कुमारसम्भवमहाकाव्यस्य चतुर्थसर्गे रतिविलापः समुपलभ्यते। अस्मिन् भागे कामदेवः कथं भस्मीभूतः अभवत्, तस्य विरहेन रतिदेव्याः किदृशी दशा सञ्जाता इत्यादिकं वर्णनं प्राप्यते। श्लोकेऽस्मिन् शोकविह्वलायाः रतिदेव्याः परिस्थितिः वर्णिता अस्ति।प्रियवियोगेन स्वभाविकतया एव जनमनसि महत् दुखं समागच्छति। संसारेऽस्मिन् कोऽपि बन्धोः प्रियजनस्य वा विरहं न वाञ्छति। रतिकामदेवयोः प्रेम संसारेऽस्मिन् सर्वजनविदतमेव। शङ्करनेत्राग्निना कामदेवो यदा भस्मीभूतः अभवत् तथा रतिदेव्या अकल्पनीयम् असहनीयं कष्टं अनुभूतम्। शोकविह्वला सा पतिकामदेवस्य भस्मीभूतं शरीरम् अवलोक्य बहु विलपति। तस्य एव वर्णनं अस्मिन् श्लोके समुपलभ्यते। कामदेवं प्रिय इति सम्बोधयन् सा सा इत्थं विलपति यत् -हे प्रिय! यथा जलस्य प्रचण्डप्रवाहः क्षणमात्रेण एव सेतुबन्धं भङ्गं कृत्वा जलाधीनाः कमलिन्यः इतस्ततः विशृंखलं कृत्वा शीघ्रम् निःसरति तथैव त्वम् अपि मम प्रेमबन्धनं अकस्मात् परित्यज्य तवाधीनां मां रतिं परित्यज्य कुत्र गच्छति?

पादटीका-

मां - कर्मणि द्वितीया

सौहृदः - सुहृदो भावः सौहृदम्

विद्रुतः - वि -√द्रु + क्त

भावार्थः-

१. विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम्।। ४.१०।।

भावार्थः- कविकुलपतिकालिदासप्रणीतस्य कुमारसम्भवमहाकाव्यस्य चतुर्थसर्गे रतिविलापः समुपलभ्यते। अस्मिन् सर्गेकामदेवः कथं भस्मीभूतः अभवत्, तस्य

বিরহেন রতিদেব্যা: কিদৃশী দশা সঞ্জাতা ইত্যাদিকং বর্ণনং প্রাপ্যতে। শ্লোকেঽস্মিন্ শোকবিহ্বলায়া: রতিদেব্যা: পরিস্থিতি: বর্ণিতা অস্তি। প্রিয়বিয়োগেন স্বভাবিকতয়া এব জনমনসি মহত্ দুখং সমাগচ্ছতি। সংসারেঽস্মিন্ কোঽপি বন্ধো: প্রিয়জনস্য বা বিরহং ন বাঞ্ছতি। রতিকামদেবয়ো: প্রেম সংসারেঽস্মিন্ সর্বজনবিদতমেব। শঙ্করনেত্রাগ্নিনা কামদেবো যদা ভস্মীভূত: অভবত্ তথা রতিদেব্যা অকল্পনীয়ম্ অসহনীয়ং কষ্টং অনুভূতম্। শোকবিহ্বলা সা পতিকামদেবস্য ভস্মীভূতং শরীরম্ অবলোক্য বহু বিলপতি।রতিদেবী পতিং কামদেব বিহায় অস্মিন্ সংসারে স্থাতুং ন শক্নোতি অত: সা অপি তেনৈব মার্গেন অর্থাত্ মৃত্যুমার্গেন কামদেবসমীপং গমিষ্যতি ইতি বিলপতি। যথোক্তং তয়া –হে প্রিয়তম ! পরলোকরূপনয়ে প্রবেশায় ত্বম্ একাকী গতবান্। অহমপি অনেন পথা শীঘ্রং ভবতাং সমীপম্ আগমিচ্ছামি। দৈবেন এষ: জন: প্রতারিত অস্তি। মম সুখমেব ন কেবলং তবাধীনং বর্ততে অপি সমস্তসংসারসুখং তবাধীনং বর্ততে।

১০.৫ কুমারসম্ভবস্য চতুর্থসর্গস্য সারাংশঃ অসমীয়াভাষায়াম্

কুমাৰসম্ভৱ, মহাকবি কালিদাসৰ দ্বাৰা ৰচিত কার্তিকেয়ৰ জন্মৰ সৈতে জড়িত মহাকাব্য, যি মহাকাব্য সংস্কৃতৰ পাঁচখন মহাকাব্যৰ ভিতৰত অন্যতম বুলি গণ্য কৰা হয়। ইয়াত বর্ণনা কৰা কাহিনীটো চমুকৈ এনেধৰণৰ—

পর্বতৰাজ হিমালয়ৰ মৈনাক নামৰ এজন পুত্র আৰু গৌৰী নামৰ এগৰাকী কন্যা আছিল। গৌৰী পার্বতী অথবা উমা নামেৰেও জনাজাত আছিল। গৌৰীৰ জন্মৰ সময়তেই নাৰদমুনিয়ে তেওঁৰ বিয়া শিৱৰ লগত হ'ব বুলি ভৱিষ্যদ্বাণী কৰিছিল। এসময়ত শিৱ হিমালয়ৰ শিখৰত ধ্যান কৰি আছিল। তেতিয়া হিমালয়ে বন্ধু এজনৰ সৈতে উমাক পৰিচর্যা কৰিবলৈ শিবৰ ওচৰলৈ পঠিয়াই দিলে আৰু উমাই ভক্তিৰে শিৱৰ সেৱা কৰিবলৈ আৰম্ভ কৰিলে। সেই সময়ত তাৰকাসুৰৰ সৈতে হোৱা যুদ্ধত দেৱতাসকল পৰাজিত হৈছিল। তাৰকা অসুৰৰ ভয়ত ইন্দ্রকে ধৰি সকলো দেৱতা ব্রহ্মাৰ ওচৰলৈ গৈ তাৰকাসুৰৰ বাবে এজন সক্ষম সেনাপতি দাবী কৰিছিল। তেতিয়া ব্রহ্মাই ক'লে যে শংকৰৰ বীর্যৰ পৰা জন্ম হোৱা পুৰুষহে আপোনাৰ যোগ্য সেনাপতি হ'ব পাৰে। গতিকে আপোনালোকে প্রয়াস কৰক যাতে শিৱ পার্বতীৰ প্রতি আকৃষ্ট হয়। যদি শিৱই পার্বতীক গ্রহণ কৰে, তেন্তে পার্বতীৰ পৰা পোৱা পুত্র যদি সেনাপতি হয়, তেন্তে আপুনি বিজয়ী হ'ব। ইয়াৰ পিছত ভগৱান ইন্দ্রক আদি কৰি অন্যান্য দেৱতাসকলে শিৱৰ বিৰাগভাৱ দূৰ কৰাৰ উপায় বিবেচনা কৰিবলৈ গোট খালে। সেই সভালৈ মদন আহিলে ইন্দ্রই তেওঁক বন্ধু বসন্তৰ সৈতে শিৱৰ তপস্যা স্থানলৈ গৈ শিৱক পার্বতীৰ প্রতি আকর্ষিত কৰিবলৈ অনুৰোধ কৰিলে। সেই অনুসৰি মদনে পত্নী ৰতি আৰু বন্ধু বসন্তৰ সৈতে শিৱৰ আশ্রম পালেগৈ। যেতিয়া পার্বতী শিৱৰ ওচৰলৈ আহি পদুমৰ মালা এখন আগবঢ়াইছিল আৰু শিৱই সেইখন ল'বলৈ হাতখন আগবঢ়াইছিল, তেতিয়া মদনে মোহনাস্ত্র ধনুৰ ওপৰত ৰাখিছিল। লগে লগে শিৱৰ মন বিচলিত হৈ পৰিল। এই

হঠাৎ মনৰ বিকৃতিৰ কাৰণ জানিবলৈ শংকৰে ইফালে সিফালে চালে। মদনে শৰসন্ধন কৰা দেখাৰ লগে লগে শিৱ ক্রোধিত হৈ পৰিল; তেওঁৰ তৃতীয় নেত্রৰ পৰা জুইৰ শিখা ওলাই আহিল আৰু সেই জুইত মদন জ্বলি ছাই হৈ পৰিল। শিৱৰ তৃতীয় নেত্রৰ পৰা ওলোৱা জুইশিখাই কামদেৱক দহন কৰাৰ পিছত ৰতিদেৱী শোকাকুল হৈ পৰিল আৰু বসন্তক অন্ত্যেষ্টিক্রিয়াৰ জুইকুৰা সাজু কৰিবলৈ ক'লে আৰু নিজেও প্রাণ আহুতি দিবলৈ সাজু হ'ল। তেনেতে আকাশবাণী হয় এইবুলি - অলপ ধৈর্য ধৰা তুমি তোমাৰ স্বামীক ঘূৰাই পাবা। আনহাতে শিৱই নাৰীৰ সংস্পর্শৰ পৰা হাত সাৰিবলৈ আত্মগোপন কৰিলে। মদন জ্বলি ছাই হোৱা আৰু শিৱ অন্তর্ধান হৈ যোৱাৰ পিছত পার্বতীয়ে সকলো কামনা বিফল হোৱা দেখি এই সৌন্দর্য অসাৰ বুলি ভাবি পর্বতৰ শৃংগ এটালৈ গৈ শিৱক সন্তুষ্ট কৰিবলৈ গভীৰ তপস্যা কৰিবলৈ ধৰিলে। কিছুসময়ৰ পাছত শিৱই পার্বতীক গ্রহণ কৰাৰ কথা ভাবিলে। কিন্তু তাৰ আগতে তেওঁ পার্বতীক পৰীক্ষা কৰাৰ সিদ্ধান্ত ল'লে আৰু তেওঁ এজন তপস্বীৰ বেশত পার্বতীৰ ওচৰত উপস্থিত হ'ল। পার্বতীয়ে তেওঁক অতিথিৰূপত সঠিকভাৰে আদৰণি জনায়। ইয়াৰ পিছত তপস্বীজনে পার্বতীৰ ওচৰত সোধা-পোছা কৰিলে যে কাৰ প্রাপ্তিৰ বাবে তেওঁ ইমান গভীৰ তপস্যা কৰি আছে। অতিথিৰ প্রশ্ন শুনি পার্বতীয়ে লাজ অনুভৱ কৰি নিজৰ অনুভৱ প্রকাশ কৰাত দ্বিধাবোধ কৰিবলৈ ধৰিলে, তেতিয়া পার্বতীৰ সখীয়ে পার্বতীৰ মনত থকা শিৱপ্রাপ্তিৰ ইচ্ছা প্রকাশ কৰিলে। এই কথা শুনি ছদ্মবেশত তপস্বী শিৱই শিৱৰ দুর্গুণ আৰু শিৱ দেখাত কুৎসিত বুলি বিভিন্ন অপযশ আৰু সমালোচনা কৰিবলৈ ধৰিলে। শিৱৰ এই নিন্দা পার্বতীয়ে গ্রহণ কৰিব নোৱাৰি তেওঁক ওলোটাই ক'বলৈ ধৰিলে। তেতিয়া তপস্বী বেশধাৰী শিৱই নিজ ৰূপত পার্বতীক দর্শন দিয়ে। ইয়াৰ পিছত শিৱই সপ্তর্ষিক ক মাতি হিমালয়লৈ পঠিয়াই দিলে। তেওঁলোকৰ ওচৰলৈ গৈ শিৱই পার্বতীক বিয়া কৰাবলৈ ইচ্ছা প্রকাশ কৰা বুলি ক'লে। তাৰ পিছত বিয়া ঠিক হৈ বিয়াৰ প্রস্তুতি আৰম্ভ হ'ল। সপ্তমাত্রিকাসকলে দৰাৰ উপযোগী কাপোৰ আনিছিল যদিও শিৱই সেই সকলোবোৰ গ্রহণ নকৰি নন্দীত উঠি গুচি গ'ল। ইয়াৰ পিছত সকলো বিবাহ অনুষ্ঠান সম্পন্ন হ'ল। বিবাহ শেষ হোৱাৰ পিছত শিৱৰ সৈতে পার্বতীয়ে ব্রহ্মাক প্রণাম কৰিলে। ব্রহ্মাই তেওঁলোকক এজন সাহসী পুত্রৰ প্রাপ্তি হওক বুলি আশীর্বাদ কৰিলে। অপ্সৰাসকলেও আহি দৰা-কইনাৰ সন্মুখত নাটক এখন উপস্থাপন কৰিলে। নাটক শেষ হোৱাৰ পিছত ইন্দ্রই শিৱক মদনক পুনৰ জীৱন্ত কৰি তুলিবলৈ অনুৰোধ কৰে। শেষত শিৱ আৰু পার্বতীৰ মিলনৰ বিষয়ে বিস্তৃতভাৱে আলোচনা কৰা হৈছে। এই মহাকাব্যখনৰ বহু ঠাইত স্মৰণীয় আৰু মনোমোহা বর্ণনা আছে। হিমালয়ৰ বর্ণনা, পার্বতীৰ তপস্যা, ব্রহ্মচাৰীয়ে শিৱক নিন্দা কৰা, বসন্তৰ আগমন, শিৱ পার্বতীৰ বিবাহ আৰু মিলনৰ আশ্চর্যকৰ বর্ণনা ইয়াত আছে। কালিদাসে কন্যা পার্বতী, তপস্বনী পার্বতী, বিনয়ৱতী পার্বতী আৰু প্রগল্‌ভা পার্বতী ইত্যাদি ৰূপত নাৰীৰ যি চৰিত্র চিত্রন কৰিছে সেয়া নিশ্চয়কৈ প্রশংসনীয়।

এই মহাকাব্যখন ☐☐টা সর্গত সম্পূর্ণ হৈছে যদিও জনবিশ্বাস অনুসৰি প্রথম আঠটা সর্গহে কালিদাসে ৰচনা কৰিছে। বাকী নটা সর্গ আন কবিৰ সৃষ্টি। শিৱ আৰু পার্বতীৰ মিলনৰ লগতে কুমাৰৰ জন্মৰ আগজাননীৰে আঠটা সর্গতেই মহাকাব্যখনৰ অন্ত পৰে বুলি একাংশ লোকে

বিশ্বাস কৰে।

ৰতিদেৱীৰ কৰুণ বিলাপযুক্ত কুমাৰসম্ভৱৰ এই সৰ্গটোৰ শ্লোকসমূহে পাঠকৰ মনতো শোকৰ ছাঁ পেলায়। ভাৰতীয় সমাজত স্ত্রীসকলে সদায় নিজৰ স্বামীক অনুকৰণ কৰা দেখা যায়। ভাৰতীয় স্ত্রীৰ কাৰণে স্বামী দেৱতাতুল্য হয়। তেনেকৈ এই সৰ্গটোত কামদেৱৰ প্ৰতি ৰতিদেৱীৰ মনত থকা গভীৰ প্ৰেম আৰু আস্থাৰ সজীৱ চিত্ৰ চিত্ৰিত কৰা দেখা পোৱা গৈছে।



१०.६ अध्यायात् किमवगतम्

- अस्य पाठस्य अध्ययनेन वयं कामदेवः कथं भस्मीभूतो जातः इति ज्ञातुं शक्नुमः।
- अस्य पाठस्य अध्ययनेन वयं कामदेवविरहातायाः रतिदेव्याः का दशा सञ्जाता इति अवधारणं प्रासुं शक्नुमः।
- स्मरविरहेन वसन्तस्य समीपे रतिः कथं विलपति इति अस्य पाठस्य अध्ययनेन वयं ज्ञातुं शक्नुमः।



१०.७ ज्ञानाधिक्यम्

१) कुमारसम्भवम् (१-५) सर्गः महाकविकालिदसप्रणीतम्, सम्पादना - श्रीमद्गुरुनाथविद्यानिधि भट्टाचार्य, संस्कृत पुस्तक भाण्डार-३८, कलिकाता ७००००६।

२) संस्कृत साहित्यसम्भार -(Vol. 2), नवपत्र प्रकाशन, कलिकाता १९८९।

३) সংস্কৃত সাহিত্যৰ ইতিবৃত্ত-ড° থানেশ্বৰ শৰ্মা, চন্দ্রপ্রকাশ, পাণবজাৰঞ্জ, গুৱাহাটী



१०.८ अभ्यासप्रश्नाः

लघुप्रश्नाः

प्रश्नः १: कुमारसम्भवम् इति महाकाव्यं केन विरचितम्?

प्रश्नः २: कुमारसम्भवमहाकाव्ये कति सर्गाः सन्ति?

प्रश्नः ३: कुमारसम्भवमहाकाव्यस्य चतुर्थसर्गे कयोः वर्णनं प्राप्यते?

प्रश्नः ४: कुमारसम्भवमहाकाव्यस्य चतुर्णां टीकाकाराणां नामानि लिखत।

प्रश्नः ५: रतिपण्डितः कस्य सम्बोधनं वर्तते?

प्रश्नः ६: रतिदेव्याः करुणविलापः कस्मिन् सर्गे प्राप्यते?

प्रश्नः ७: स्मर! इति सम्बोधनं कस्य कृते व्यवहृयते ?

प्रश्नः ८: अनङ्ग! इति सम्बोधनं कस्य कृते व्यवहृयते ?

प्रश्नः ९: कुसुमायुधः कस्य सम्बोधनं वर्तते ?

प्रश्नः १०: व्युत्पतिं निरूपयत-

i. चकार

ii. स्मरसि

iii. वससि

iv. वञ्चितः

प्रश्नः ११: रिक्तं स्थानं पूरयत -

i. कृतवानसि विप्रियं न मे ------- न च ते मया कृतम्।

ii. शिरसा ---------- याचितान्युपगूढानि सवेपथूनि च

iii. रचितं ---------- त्वया स्वयमङ्गेषु ममेदमार्तवम्।

प्रश्नः १२: समासं निरूपयत -

i. सौहृदः

ii. वसुधालिङ्गनधूसरस्तनी

iii. मत्प्रियं

iv. त्वदधीनम्

v. परलोकान्तरितस्य

प्रश्नः १३: प्रसङ्गसङ्गतिपुरस्सरं व्याख्या विधीयताम्।

i. अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता।
विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम्।। ४.१ ।।

ii. उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया।
तदिदं गतमीदृशीं दशां, न विदीर्ये, कठिनाः खलु स्त्रियः।। ४.५ ।।

iii. परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव।
विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम्।। ४.१० ।।

iv. शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च।
सुरतानि च तानि ते रहः स्मर! संस्मृत्य न शान्तिरस्ति मे।। ४.१७ ।।

प्रश्नः १४: मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे।
वचनीयमिदं व्यवस्थितं रमण! त्वामनुयामि यद्यपि।। ४.२१ ।।

टिप्पणी प्रदेया

i. कालिदासः

ii. कुमारसम्भवम्

iii. रतिदेवी

iv. कामदेवः

v. वसन्तः

दीर्घप्रश्नाः

i. कामदेवः कथं भस्मीभूतः अभवत् - इति संक्षिप्तेन उल्लिखत।

ii. कामदेवस्य विरहे रतिदेव्याः कीदृशी दशा सञ्जाता? आलोचयत।

*** ***** ***

अध्यायः ११ : कुमारसम्भवम् (चतुर्थः सर्गः श्लोकाः २४-४६)

अध्यायस्य संरचना

११.१ उद्देश्यम्

११.२ परिचयः

११.३ चतुर्थसर्गस्य सारांशः

११.४ चतुर्थसर्गस्य श्लोकानां संस्कृतपाठः

- ११.४.१ श्लोकानाम् अन्वयः
- ११.४.२ श्लोकानाम् अनुवादः
- ११.४.३ श्लोकानां व्याकरणटिप्पणी
- ११.४.४ श्लोकानां व्याख्या भावार्थश्च

११.५ कुमारसम्भवस्य चतुर्थसर्गस्य सारांशः असमीयाभाषायाम्

११.६ अस्मात् अध्यायात् किमवगतम्

११.७ ज्ञानाधिक्यम्

११.८ अभ्यासप्रश्नाः

११.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- अस्य पाठस्य अध्ययनेन छात्राः कुमारसम्भवमहाकाव्यस्य परिचयं प्राप्तुं शक्नुवन्ति।
- अस्य पाठस्य अध्ययनेन चतुर्थसर्गस्य विषयम् अवगन्तुं शक्नुवन्ति।
- अस्य पाठस्य अध्ययनेन कामदेवस्य विरहात् रतिदेव्याः या शोकावस्था जाता तस्याः आभासं प्राप्तुं शक्नुवन्ति।
- चतुर्थसर्गस्य श्लोकानाम् अनुवादाः तथा व्याकरणटिप्पणयः च ज्ञातुं शक्नुवन्ति।

११.२ परिचयः

कुमारसम्भवं महाकविकालिदासकृतं सप्तदशसर्गात्मकं महाकाव्यं वर्तते। सप्तदशसर्गेषु अष्टसर्गाः कालिदासः स्वयं विरचितवान्। शेषाः अन्यकविना विरचिताः इति नैकविद्वद्भिः स्वीक्रियते। अष्टमसर्गात् अनन्तरं कालिदासः किमर्थं महाकाव्यमिदं सम्पूर्णं न कृतवान् इति विषये एका कथा प्रचलिता वर्तते यत् कालिदासः अष्टमसर्गे शिवपार्वत्योः सम्भोगवर्णनं उत्कृष्टं कृतवान्। यस्मातद्धेतोः देव्या अभिशप्तः सः कुष्ठरोगेन ग्रस्तः सञ्जातः। अस्य अन्यरूपेणाऽपि कथान्तरं प्राप्यते। केषाञ्चन विदूषां मतानुसारं कालिदासेन कुमारकार्तिकेयस्य जन्मवर्णनं संकल्पितम्। तथा अष्टमे सर्गे शिवपार्वत्योः एकान्तसमागमेन सः तदेव ? सूचयितुम् इष्टवान्। अनेन दृष्ट्या अष्टमे सर्गे एव सः महाकाव्यमिदं समापितवान्। अलङ्कारशास्त्रेषु कुमारसम्भवस्य अष्टमसर्गपर्यन्तमेव उदाहरणानि

संगृहीतानि वर्तन्ते। अस्मिन् महाकाव्ये अनेकरमणीयं सोन्दर्यस्थलं तथा हिमालयवर्णनं पार्वत्याः तपस्यावर्णनं, वसन्तागमनवर्णनं, शिवपार्वत्योः विवाहवर्णनं, रतिक्रीडावर्णनं च इत्यादीनां समावेशो भवति।

११.३ चतुर्थसर्गस्य सारांशः

भवद्भिः पूर्वस्मिन् अध्याये कुमारसम्भवमहाकाव्यस्य चतुर्थसर्गस्य (१-२३) श्लोकानाम् अध्ययनं कृतम्। अस्मिन् अध्याये चतुर्थसर्गस्य (२४-४३) श्लोकानां संस्कृतपाठम् अधीतुं शक्नुवन्ति। अत्र संस्कृताठेन सह अन्वयं, संस्कृतानुवादः, व्याकरणगतटिप्पणी, मदनस्य पत्न्याः रतिदेव्याःशोकविह्वला अवस्था, रतिदेवीं प्रति आकाशवाणी चेत्यादिविषयकं ज्ञानं समुपलभ्यते।

११.४ चतुर्थसर्गस्य श्लोकानां संस्कृतपाठः

क्व नु ते हृदयंगमः सखा कुसुमायोजितकार्मुको मधुः।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम्।। ४.२४।।
अथ तैः परिदेविताक्षरैर्हृदये दिग्धशरैरिवाहतः।
रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत्पुरः।। ४.२५।।
तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान च।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते।। ४.२६।।
इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त! किं स्थितम्।
तदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरम्।। ४.२७।।
अयि संप्रति देहि दर्शनं स्मर! पर्युत्पुक एष माधवः।
दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने।। ४.२८।।
गत एव न ते निवर्तते स सखा दीप इवानिलाहतः।
अहमस्य दशेव पश्य मामविषह्यव्यसनेन धूमिताम्।। ४.२९।।
अमुना ननु पार्श्ववर्तिना जगदाज्ञां ससुरासुरं तव।
विसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पपत्रिणः।। ४.३०।।
विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता।
अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी।। ४.३१।।
तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम्।
विधुरां ज्वलनातिसर्जनान्ननु! मां प्रापय पत्युरन्तिकम्।। ४.३२।।
शशिना सह याति कौमुदी, सह मेघेन तडित्प्रलीयते।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि।। ४.३३।।
अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना।

नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ।। ४.३४।।
कुसुमास्तरणे सहायतां बहुशाः सौम्य, गतस्त्वमावयोः।
कुरु संप्रति तावदाशु मे प्रणिपाताञ्जलियाचितश्चिताम्।। ४.३५।।
तदनु ज्वलनं मदर्पितं त्वरयेर्दक्षिणवातवीजनैः।
विदितं खलु ते यथा स्मरः क्षणमप्युत्पहते न मां विना।। ४.३६।।
इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ।
अविभज्य परत्र तं मया सहितः पास्यति ते स बान्धवः।। ४.३७।।
परलोकविधौ च माघवः स्मरमुद्दिश्य विलोलपल्लवाः।
निवपेः सहकारमक्षरीः प्रियचूतप्रसवो हि ते सखा।। ४.३८।।
इति देहविमुक्तये स्थितां रतिमाकाशभवा सरस्वती।
शफरीं ह्रदशोषविक्लवां प्रथमा वृष्टिरिवान्वकम्पयत्।। ४.३९।।
कुसुमायुधपत्नि! दुर्लभस्तव भर्ता न चिराद्भविष्यति।
शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि।। ४.४०।।
अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत्प्रजापतिः।
अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्।। ४.४१।।
परिणेष्यति पार्वतीं यदा तपसा तत्प्रवणीकृतो हरः।
उपलब्धसुखस्तदा स्मरं वपुषा स्वेन नियोजयिष्यति।। ४.४२।।
इति चाह स धर्मयाचितः स्मरशापावधिदां सरस्वतीम्।
अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनयः।। ४.४३।।
तदिदं परिरक्ष शोभने! भवितव्यप्रियसंगमं वपुः।
रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी।। ४.४४।।
इत्थं रतेः किमपि भूतमदृश्यरुपं मन्दीचकार मरणाव्यवसायबुद्धिम्।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेनामाश्वासयत्पुचरितार्थपदैर्वचोभिः।। ४.४५।।
अथ मदनवधूरुपप्लवान्तं व्यसनकृशा परिपालयांबभूव।
शशिन इव दिवातनस्य लेखा किरणपरिक्षयधूसरा प्रदोषम्।। ४.४६।।

११.४.१ श्लोकानां अन्वयः

२४. ह्रदयङ्गमः ते सखा कुसुमायोजितकार्मुकः मधुः क्व नु (अथवा) स अपि उग्ररषा पिनाकिना सुहृद्गतां गतिं न गमितः खलु।

२५. अथ तैः परिदेविताक्षरैः ह्रदये दिग्धशरैः इव आहतः मधुः आतुरां रतिम् अभ्युपपत्तुम् आत्मानं पुरः अदर्शयत।

२६. सा तम् अवेक्ष्य भृशं रुरोद, स्तनसम्बाधम् उरः जघान च। हि स्वजनस्य अग्रतः दुःखं विवृतद्वारम् इव उपजायते।

२७. दुःखिता सा एनम् इति उवाच। हे वसन्त! पश्य सुहृदः किं स्थितम् इदं तत् कपोतकर्बुरं भस्मपवनैः कणशः विकीर्यते।

२८. अयि स्मर! सम्प्रति दर्शन देहि। एष माधवः पर्यचत्पुकः अस्ति। नृणां दयितासु प्रेम अनवस्थितम्। सुहृज्जने तु न चलं खलु।

२९. ननु! तव पार्श्ववर्त्तिना अमुना ससुरासुरं जगत् विषतन्तु गुणस्य पेलवपुष्पपत्रिणः तव आज्ञां कारितम्।

३०. अनिलाहतः स ते सखा दीपः इव गतः एव। न निवर्तते। अहम् अस्य दशा इव तिष्ठामि। अविषह्यव्यसनेन धूमितां मां पश्य।

३१. ननु कामवधे मां विमुञ्चता विधिना अर्धवैशसं कृतम्। अनपायिनि संश्रयद्रुमे गजमग्ने वल्लरी पतनाय भवति।

३२. तत् अनन्तरं भवता इदं बन्धुजन प्रयोजनं क्रियताम्। ननु विधुरां मां ज्वलनाति सर्जनात् पत्युः अन्तिकं प्रापय।

३३. कौमुदी शशिना सह याति, तडित् मेघेन सह प्रलीयते, प्रमदाः पतिवर्त्मगाः इति विचेतनैः अपि प्रतिपन्नम्।

३४. अमुना सुभगेन प्रियागत्रभस्मना एव कषायितस्तनी नवपल्लवसंस्तरे यथा विभवसौ तनुं रचयिष्यामि।

३५. हे सौम्य! त्वम् आवयोः बहुशः कुसुमास्तरेण सहायतां गतः सम्प्रति (असि)। प्रणिपाताञ्जलिः याचितः (यावत् तावत्) आशु मे चिन्तां कुरु।

३६. तदनु मदर्पितं ज्वलनं दक्षिणवातवीजनैः त्वरये। ते विदितं खलु यथा स्मरः मां विना क्षणम् अपि न उत्पहते।

३७. अपि च विधिः विधाय नौ एक एव सलिलस्य अञ्जलिं दीयताम्। तं स ते बान्धवः परत्र मया सहितः अविभज्य पास्यति।

३८. हे माधव! परलोकविधौ च स्मरम् उद्दिश्य विलोलपल्लवाः सहकारमञ्जरी निवपेः हि ते सखा प्रियचूतपल्लवः अस्ति।

३९. इति देहविमुक्तये स्थितां रतिम् आकाशभवा सरस्वती ह्रदशोषविक्लवां शफरीं प्रथमा वृष्टिः इव अन्वकम्पत।

४०. हे कुसुमायुधपत्नि! तव भर्ता चिरात् दुर्लभो न भविष्यति। शृणु येन कर्मणा सः हरलोचनार्चिषि शलभत्वं गतः।

४१. उदीरितेन्द्रियः प्रजापतिः स्वसुतायाम् अभिलाषम् अकरोत्। अथ तेन विक्रिया निगृह्य अभिशप्तः सन् एतत्फलम् अन्वभूत्।

४२. तपसा तत्प्रवणीकृतः हरः यदा पार्वतीं परिणेष्यति, तदा उपलब्धसुखः सन् स्मरं स्वेन वपुषा नियोजयिष्यति।

४३. धर्मयाचितः स इति स्मर शापावधिदां सरस्वतीं च आह। वशिनः अम्बुधराश्च

अशनेः अमृतस्य उभयोः योनयः भवन्ति किल।

४४. हे शोभने! तत् भवितव्य प्रियसङ्गमम् इदं वपुः परिरक्ष। हि रविपीतजला नदी तपात्यये पुनः ओघेन युज्यते।

४५. इत्थम् अदृश्यरूपम् किमपि भूतं रतेः मरणव्यवसायबुद्धिम् मन्दीचकार। अथ कुसुमायुध बन्धुश्च तत्प्रत्ययात् एनां सुचरितार्थपदैः वचोभिः आश्वासयत्।

४६. आथ व्यसनकृशा मदनवधूः उपप्लवान्तं किरणपरिरक्षय धूसरदिवातनस्य शशिनः लेखा प्रदोषम् इव परिपालयाम्बभूव।

११.४.२ श्लोकानाम् अनुवादः

२४. तव कृते कुसुमद्वारा धनुर्निर्माता तव अत्यन्त प्रियबन्धुः वसन्तः अपि इदानीं न दृश्यते। अथवा सः अपि शिवकोपात् तव गतिं प्राप्नोति?

२५. इत्थं रतिदेव्याः विलापाक्षरैः वचनैः हृदये विषलिप्तमुखैः शरैः इव आहतः सन् वसन्तः प्रियविरहितातुरां रतिम् सान्त्वयितुम् आविर्भूतः अभवत्।

२६. वसन्तम् अवलोक्य रतिः भृशं रुरोद। सा स्तनौ सम्बाध्य उरः ताडितवती। यतो हि स्वजनाग्रे हृदयास्थितं दुःखं स्वयमेव द्वारम् उद्घाटयति।

२७. दुःखिता सा एवं विलपति पश्य वसन्त! तव? प्रियमित्रस्य का दशा सञ्जाता। तव सखा भस्मीभूत जातः, इदानीं वायुना धूयमानं पारावतशबलं कणशः भस्मीभूतं यत्र तत्र विकीर्यते।

२८. हे काम! त्वं? दर्शनं देहि। वसन्तः तव दर्शनार्थं उत्कण्ठितो भवति। पुरुषाणां दयितासु प्रेम अनवस्थितम्। सुहृज्जने प्रेम तु न चपलम् इति।

२९. अस्य पार्श्ववर्तिनः वसन्तस्य सहायं प्राप्य सुरासुराभ्यां सह समग्रं जगत् मृणालसूत्रमौर्वीकस्य पेलवानि कोमलानि पुष्पाण्येव पत्रिणो बाणा यस्य तस्य तव धनुषः आज्ञां कारितम्।

३०. हे वसन्त! इदानीं तव सखा अनिलेन आहतदीप इव गतः इति। सः पुनः न प्रत्यागमिष्यति। अहं तस्य दीपस्य वर्ति इव अस्मि। अविषह्यव्यसनेन धूमयुतां मां पश्य।

३१. मां परित्यज्य मम अर्धाङ्गपत्युः मदनस्य वधेन विधिना अर्धहननमेव विहितम्। परन्तु आश्रयवृक्षे गजभग्ने सति लता पतनाय भवति।

३२. अधुना भवान् सुहृज्जनोचितम् एतत् कार्यं सम्पादयतां यत् अग्निं प्रज्ज्वाल्य विधुरां मां तत्र प्रविष्टं कारयित्वा पत्युः समीपं प्रापय।

३३. कौमुदी चन्द्रिका पतिशशिना सह एव अस्तं गच्छति, विद्युत् मेघैः सह अन्तर्हितं भवति, स्त्रियः पतिवर्त्मगाः भवन्ति। अर्थात् पतीनां मार्गम् अनुगच्छन्ति स्त्रियः इति अचेतनपदार्थैरपि ज्ञायते।

३४. इदानीम् अहं शोभनेन प्रियगात्रभस्मना रञ्जितस्तनी नवपल्लवतल्प इव वह्नौ शरीरं निधास्यामि इति।

३५. हे सौम्य वसन्त! त्वं आवयोः शयनार्थम प्राक् कुसुमशय्यां निर्मितवान् असि। इदानीं प्रणिपातपुरस्सरं प्रार्थयामि यत् त्वं शीघ्रं मत्कृते दाहकाष्ठचयं कुरु।

३६. तच्चिताकरणानन्तरं मयि अर्पितं अग्निं दक्षिणदिशः पवनरूपसञ्चारणैः शीघ्रातिशीघ्रं प्रदीप्तं कुरु। त्वया एतत् विदितं यत् कामदेवं मद्विना क्षणमपि न हृष्यति।

३७. पूर्वोक्तप्रकारेण सर्वं कार्यं सम्पाद्य आवयोः कृते त्वं एकेन एव जलाञ्जलिना तर्पणं कुरु। येन तव मित्रं कामदेवः परलोके अपि एकामेव अञ्जलिं मया सह विभागं विना पास्यति इति।

३८. हे माधव! कामदेवस्य और्द्धदैहिककार्यसमये श्राद्धे चञ्चलकिसलययुक्ता आम्रमञ्जरी स्मरमुद्दिश्य निश्चयेन प्रदेया। यतो हि तव सुहृदः कामदेवस्य सहकारमञ्जरी अतीव प्रिय अस्ति।

३९. स्वशरीराहुतये प्रारब्धायाः रतिदेव्याः अग्रे अकस्मात् आकाशवाणी तथा कृपां अकरोत् यथा जलाधारस्य शोषेण विक्लवां शफरीं प्रथमा वृष्टिः प्राणं सञ्चरति।

४०. हे कुसुमायुधपत्नि रति! कियतः कालानन्तरं त्वं स्वपतिं पुनः प्राप्स्यसि। यस्य कर्मणः फलस्वरूपेण हरकोपानले भस्मीभूतः अभवत्, तत् श्रृणु।

४१. पूर्वस्मिन् काले सृष्टिसमये ब्रह्मदेवः स्वकन्यां सरस्वतीम् अवलोक्य तस्याः पुरः कामाभिलाषम् अकरोत्। तदा प्रजापति स्वेन्द्रियविकारान् निरुध्य कामदेवं भस्मीभूतः भवितुम् अभिशापं प्रदत्तवान्। तस्मात् कामदेवः इदृशीं गतिं प्राप्तः अभवत्।


४२. सृष्टिरक्षार्थं यदा धर्मेण ब्रह्मदेवः प्रार्थितः तदा ब्रह्मदेवेन उच्यते - यदा महेश्वरः पार्वत्याः तपस्यया सन्तुष्टो भुत्वा तां ? परिणेष्यति तदा प्राप्तानन्दः सन् कामं स्वेन शरीरजण सह नियोजयिष्यति।

४३. इति स्मरः शापावधिदां सरस्वतीं च आह। यथा मेघे जलं विद्युच्च उभौ वर्तेते तथैव संयमपुरुषे कोपप्रसादौ उभौ वर्तेते।

४४. हे शोभने! तस्मात् भविष्यति प्रियसङ्गमार्थं तव इदं शरीरं रक्षयतु। ग्रीष्मकाले सूर्यकिरणैः जलशोषिते नीरसनदी वर्षाऋतौ जलप्राप्त्याः पुनः प्रवाहिता भवति।

४५. इत्थं कोऽपि अदृश्यदैवः रतिं देहत्यागाय समुद्धृतसंकल्पात् निरोधयति। तदनन्तरं तस्यामेव देववाण्यां विश्वासं निधाय कामसखा वसन्तोऽपि युक्तिपूर्णवचनैः रतिदेवीम् आश्वासं प्रददाति।

४६. आकाशवाण्या तथा वसन्तेन प्रदत्तम् आश्वासनम् आकर्ण्य शोकविह्वला कृशशरीररतिः मदनस्य अभिशापस्य अन्तिमां तिथिं तथैव प्रतीक्षां करोति यथैव दिवसे प्रकाशक्षयेन धूसरा मलिनाचन्द्रस्य लेखा प्रकाशप्रदसन्ध्यासमयस्य प्रतीक्षां करोति।



अग्रगत्याः निरीक्षणम्

प्रश्नः १. कुमारसम्भवम् इति कीदृशं काव्यं वर्तते ?

.....

प्रश्नः २. कुसुमायुधपत्नि इति कस्याः सम्बोधनम् ?

.....

प्रश्नः ३. कालिदासः कस्य देवस्य सेवकः ?

.....

प्रश्नः ४. स्मर इति कस्य सम्बोधनम् ?

.....

११.४.३ व्याकरणटिप्पणी

२४. ते - शेषे षष्ठी

पिनाकिना - अनुक्ते कर्तरि तृतीया

सोऽपि- सः + अपि

प्राप्तां - कर्मणि द्वितीया

गतिम् - कर्मणि द्वितीया

२५. तैः - अनुक्ते कर्तरि तृतीया

हृदये- अधिकरणे सप्तमी

दिग्धशरैरिवाहतः - दिग्धशरैः + इव + आहतः

मधुरात्मानमदर्शयत्पुरः- मधुः + आत्मानम् + अदर्शयत् +पुरः

२६. तमवेक्ष्य- तम् +अवेक्ष्य

सा - कर्तरि प्रथमा

जघान - $\sqrt{}$हन् + लिट् अ

स्वजनस्य - शेषे षष्ठी

विवृतद्वारमिवोपजायते - विवृतद्वारम् + इव + उपजायते

२७. चैनमुवाच- च+एनम् + उवाच।

पश्य - $\sqrt{}$दृश् + लोट् हि

वसन्त - सम्बोधने प्रथमा

स्थितम् - $\sqrt{}$स्था + क्त (नपुंसकलिङ्गम्)

२८. स्मर- सम्बोधने प्रथमा

देहि - $\sqrt{}$दा + लोट् हि

माधवः - कर्तरि प्रथमा

दयितास्वनवस्थितं - दयितासु + अनवस्थितम्

नृणां - शेषे षष्ठी

२९ अमुना - अनुक्ते कर्तरि तृतीया

कारितम् - √कृ + णिच् + क्त

तव - शेषे षष्ठी

३०. अनिलाहतः - अनिलेन आहतः (तृतीया तत्पुरुषः समासः)

निवर्तते - नि - √वृत् + लट् ते

दशेव - दशा + इव

३१. कामवधे - भावे सप्तमी

विमुञ्चता - वि- √मुञ्च् + शतृ (तृतीयाविभक्तिः), अनुक्ते कर्तरि तृतीया

विधिना - अनुक्ते कर्तरि तृतीया

अनपायिनि - भावे सप्तमी

३२. तदिदं - तत् + इदं

क्रियताम् - √कृ + लोट् ताम्

क्रियतामनन्तरं - क्रियताम् + अनन्तरं

भवता - √भू + शतृ (तृतीयाविभक्तिः)

३३. शशिना- सहयोगेऽप्रधाने तृतीयाविभक्तिः

कौमुदी- कर्तरि प्रथमा

याति - √या + लट् ति

मेघेन - सहयोगेऽप्रधाने तृतीयाविभक्तिः

प्रतिपन्नं - प्रति - √पद् - क्त

पतिवर्त्मगाः - परिवर्त्म गच्छन्तीति पतिवर्त्मगाः (गतितत्पुरुषसमासः)

३५. रचयिष्यामि - √रच् + लृट् स्यामि

सुभगेन - करणे तृतीया

३६. मदर्पितं - मया अर्पितं (तृतीया तत्पुरुषः समासः)

विदितं - √विद्+ क्त

क्षणमप्युत्पहते - क्षणम् + अपि + उत्पहते

मां - विनायोगे द्वितीया

३७. विधाय - वि- √धा + ल्यप्

दीयतां - √दा + लोट् ताम्

सलिलस्याञ्जलिरेकः - सलिलस्य + अञ्जलिः + एकः

अविभज्य - अ - वि- √भज् + ल्यप्

मया – सहयोगेऽप्रधाने तृतीयाविभक्तिः

पास्यति – √पा + लृट् स्यति

३८. माधव – सम्बोधने प्रथमा

स्मरमुद्दिश्य – स्मरम् + उद्दिश्य

३९. स्थितां – √स्था + क्त स्त्रीलिङ्गे द्वितीयाविभक्तेः एकवचने

अन्वकम्पत् – अनु + अकम्पत्

४०. कुसुमायुधपत्नि– सम्बोधने प्रथमा

दुर्लभस्तव – दुर्लभः + तव

चिराद्भविष्यति – चिरात् + भविष्यति

भविष्यति – √भू + लृट् स्यति

गतः – √गम् + क्त

४१. स्वसुतायामकरोत्प्रजापतिः – स्वसुतायां + अकरोत् + प्रजापतिः

निगृह्य – नि – √गृह् + ल्यप्

फलमेतदन्वभूत् – फलम् + एतत् + अनु + अभूत्

४२. नियोजयिष्यति – नि – √युज् + लृट् स्यति

तपसा – करणे तृतीया

पार्वतीं – कर्मणि द्वितीया

४३. याचितः –√याच् + क्त

चोभयर्वशिनश्चाम्बुधराश्च – चोभयः + वशिनः + च + अम्बुधराः + च

४४. परिरक्ष– परि – √रक्ष्+ लोट् हि

शोभने– सम्बोधने प्रथमा

युज्यते – √युज् + लट् ते

४५. भूतमदृश्यरूपम् – भूतम् + अदृश्यरूपम्

चकार – √कृ + लिट् अ

तत्प्रत्याच्च– तत् + प्रत्ययात् + च

४६. बभूव – भू + लिट् अ

व्यसनकृशा – व्यसनेन कृशा (तृतीया तत्पुरुषः समासः)

अस्मिन् श्लोके पुष्पिताग्राछन्दो वर्तते। पुष्पिताग्राछन्दसो लक्षणं यथा –

अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा।

११.४.४ श्लोकानां व्याख्या भावार्थश्च

व्याख्या-

१. अथ मदनवधूरुपप्लवान्तं व्यसनकृशा परिपालयांबभूव।
शशिन इव दिवातनस्य लेखा किरणपरिक्षयधूसरा प्रदोषम्।।

प्रसङ्गः- श्लोकोऽयं महाकविकालिदासविरचितस्य कुमारसम्भवम् इति प्रथितमहाकाव्यस्य चतुर्थसर्गे समुपलभ्यते।

अन्वयः- अथ व्यसनकृशा मदनवधूः उपप्लवान्तं किरणपरिरक्षय धूसरादिवातनस्य शशिनः लेखा प्रदोषम् इव परिपालयाम्बभूव।

व्याख्या - कविकुलपतिकालिदासप्रणीतस्य कुमारसम्भवमहाकाव्यस्य चतुर्थसर्गे रतिविलापः समुपलभ्यते। अस्मिन् भागे कामदेवः कथं भस्मीभूतः अभवत्, तस्य विरहेन रतिदेव्याः किदृशी दशा सञ्जाता इत्यादिकं वर्णनं प्राप्यते। सा पत्युः मृत्युना शोकविह्वला सती मृत्युलोकं प्रति पतिम् अनुःसरणं कर्तुम् इच्छां प्रदर्शयति। परन्तु तदा एव आकाशवाण्या तां तथा कर्तुं वाधां प्रददाति। अदृष्टशक्तिः तां वरं प्रददाति यत् कामदेवरत्योः पुनर्मिलनं भविष्यति। श्लोकेऽस्मिन् शोकाकुला महत्कष्टानुभूता रतिः कथं आकाशवाण्या मदनसख्या वसन्तप्रदत्तेन आश्वासेन शान्ता अभवत् इति वर्णितम् अस्ति। यथोक्तम् ग्रन्थकारेण - आकाशवाण्या तथा वसन्तेन प्रदत्तम् आश्वासनम् आकर्ण्य शोकविह्वला कृशशरीररतिः मदनस्य अभिशापस्य अन्तिमां तिथिं तथैव प्रतीक्षां करोति यथा दिवसे प्रकाशक्षयेन धूसरा मलिनाचन्द्रस्य लेखा प्रकाशप्रदसन्ध्यासमयस्य प्रतीक्षां करोति।

पादटीका-

बभूव - भू + लिट् अ
व्यसनकृशा - व्यसनेन कृशा (तृतीया तत्पुरुषः समासः)
अस्मिन् श्लोके पुष्पिताग्राछन्दो वर्तते। पुष्पिताग्राछन्दसो लक्षणं यथा -
अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा।

२. अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत्प्रजापतिः।
अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्।।

प्रसङ्गः- श्लोकोऽयं महाकविकालिदासविरचितस्य कुमारसम्भवम् इति प्रथितमहाकाव्यस्य चतुर्थसर्गे समुपलभ्यते।

अन्वयः- उदीरितेन्द्रियः प्रजापतिः स्वसुतायाम् अभिलाषम् अकरोत्। अथ तेन विक्रिया निगृह्य अभिशप्तः सन् एतत्फलम् अन्वभूत्।

व्याख्या - कविकुलपतिकालिदासप्रणीतस्य कुमारसम्भवमहाकाव्यस्य चतुर्थसर्गे

रतिविलापः समुपलभ्यते। अस्मिन् भागे कामदेवः कथं भस्मीभूतः अभवत्, तस्य विरहेन रतिदेव्याः किदृशी दशा सञ्जाता इत्यादिकं वर्णनं प्राप्यते। सा पत्युः मृत्युना शोकविह्वला सती मृत्युलोकं प्रति पतिम् अनुःसरणं कर्तुम् इच्छां प्रदर्शयति। परन्तु तदा एव आकाशवाण्या तां तथा कर्तुं वाधां प्रददाति। अदृष्टशक्तिः तां वरं प्रददाति यत् कामदेवरत्योः पुनर्मिलनं भविष्यति। मदनविरहशोकाकुला महत्कष्टानुभूता रतिः अनन्तरम् आकाशवाण्या मदनसख्या वसन्तेन च प्रदत्तेन आश्वासेन शान्ता अभवत्। अस्मिन् श्लोके मदनस्य भस्मीभूतावस्थायाः रहस्यं आकाशवाण्या प्रकाशितम्। कामदेवः पूर्वं कथं ब्रह्मणा अभिशप्तोऽभवत् इति विषयं ग्रन्थकारः इत्थम् उल्लिखति - पूर्वस्मिन् काले सृष्टिसमये ब्रह्मदेवः स्वकन्यां सरस्वतीम् अवलोक्य तस्याः पुरः कामाभिलाषम् अकरोत्। तदा प्रजापति स्वेन्द्रियविकारान् निरुध्य कामदेवं भस्मीभूतः भवितुम् अभिशापं प्रदत्तवान्। तस्मात् कामदेवः इदृशीं गतिं प्राप्तः अभवत्।

पादटीका-

- स्वसुतायामकरोत्प्रजापतिः - स्वसुतायां + अकरोत् + प्रजापतिः
  निगृह्य - नि - √गृह् + ल्यप्
  फलमेतदन्वभूत् - फलम् + एतत् + अनु + अभूत्

भावार्थः-

३. दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने।।

कविकुलपतिकालिदासप्रणीतस्य कुमारसम्भवमहाकाव्यस्य चतुर्थसर्गे रतिविलापः समुपलभ्यते। अस्मिन् भागे कामदेवः कथं भस्मीभूतः अभवत्, तस्य विरहेन रतिदेव्याः किदृशी दशा सञ्जाता इत्यादिकं वर्णनं प्राप्यते।

प्रियवियोगेन स्वाभाविकतया एव जनमनसि महत् दुखं समागच्छति। संसारेऽस्मिन् कोऽपि बन्धोः प्रियजनस्य वा विरहं न वाञ्छति। रतिकामदेवयोः प्रेम संसारेऽस्मिन् सर्वजनविदतमेव। शङ्करनेत्राग्निना कामदेवो यदा भस्मीभूतः अभवत् तथा रतिदेव्या अकल्पनीयम् असहनीयं कष्टं अनुभूतम्। शोकविह्वला सा पतिकामदेवस्य भस्मीभूतं शरीरम् अवलोक्य बहु विलपति। तस्य एव वर्णनं अस्मिन् वाक्यांशेऽस्मिन् समुपलभ्यते। पतिं काम इति सम्बोधयन् सा इत्थं विलपति यत् - हे काम! त्वं? दर्शनं देहि। वसन्तः तव दर्शनार्थं उत्कण्ठितो भवति। पुरुषाणां दयितासु प्रेम अनवस्थितम्। सुहृज्जने प्रेम तु न चपलम् इति। रतिः पत्युः मृत्युना शोकविह्वला सती मृत्युलोकं प्रति पतिम् अनुःसरणं कर्तुम् इच्छां प्रदर्शयति। परन्तु तदा एव आकाशवाण्या तां तथा कर्तुं वाधां प्रददाति। अदृष्टशक्तिः

तां वरं प्रददाति यत् कामदेवरत्योः पुनर्मिलनं भविष्यति। मदनविरहशोकाकुला महत्कष्टानुभूता रतिः अनन्तरम् आकाशवाण्या मदनसख्या वसन्तेन च प्रदत्तेन आश्वासेन शान्ता अभवत्।

११.५ कुमारसम्भवस्य चतुर्थसर्गस्य सारांशः असमीयाभाषायाम्

কুমাৰসম্ভৱ, মহাকবি কালিদাসৰ দ্বাৰা ৰচিত কার্তিকেয়ৰ জন্মৰ সৈতে জড়িত মহাকাব্য, যি মহাকাব্য সংস্কৃতৰ পাঁচখন মহাকাব্যৰ ভিতৰত গণ্য কৰা হয়। এই মহাকাব্যখন ১৭টা সর্গত সম্পূর্ণ হৈছে যদিও জনবিশ্বাস অনুসৰি প্রথম সর্গটোহে কালিদাসে ৰচনা কৰিছে। বাকী নটা সর্গ আন কবিৰ সৃষ্টি। শিৱ আৰু পার্বতীৰ মিলনৰ লগতে কুমাৰৰ জন্মৰ আগজাননীৰে আঠটা সর্গতেই মহাকাব্যখনৰ অন্ত পৰে বুলি একাংশ লোকে বিশ্বাস কৰে।

কুমাৰসম্ভৱ, মহাকাব্যৰ চতুর্থ সর্গত কামদেৱৰ পত্নী ৰতিদেৱীৰ কৰুণ বিলাপৰ বর্ণনা পোৱা যায়। শিৱৰ তৃতীয় নেত্রৰ পৰা ওলোৱা জুইত কামদেৱক ভস্মীভূত হোৱা দেখি পত্নী ৰতিয়ে শোকবিহ্বল হৈ পৰিছিল। তেতিয়া বসন্তই ৰতিদেৱীক সান্ত্বনা প্রদান কৰে। তথাপি তেওঁ নিজক শান্ত কৰিব পৰা নাছিল। তেওঁ স্বামীৰ লগতে নিজকো চিতাত আত্মাহুতি দিবলৈ প্রস্তুত হৈছিল। তেতিয়াই ৰতিক এই কামত বাধা দবলৈ হঠাতে আকাশবাণী হয়। আৰু তেওঁক বৰ দিয়ে যে স্বামী কামদেৱৰ সৈতে পুনর্মিলন হ'ব। ৰতিদেৱীৰ কৰুণ বিলাপযুক্ত কুমাৰসম্ভৱৰ এই সর্গটোৰ শ্লোকসমূহে পাঠকৰ মনতো শোকৰ ছাঁ পেলায়। ভাৰতীয় সমাজত স্ত্রীসকলে সদায় নিজৰ স্বামীক অনুকৰণ কৰা দেখা যায়। ভাৰতীয় স্ত্রীৰ কাৰণে স্বামী দেৱতাতুল্য হয়। তেনেকৈ এই সর্গটোত কামদেৱৰ প্রতি ৰতিদেৱীৰ মনত থকা গভীৰ প্রেম আৰু আস্থাৰ সজীৱ চিত্র চিত্রিত কৰা দেখা পোৱা গৈছে।



११.६ अध्यायात् किमवगतम्

- अस्य पाठस्य अध्ययनेन वयं कामदेवः कथं भस्मीभूतो जातः इति ज्ञातुं शक्नुमः।
- अस्य पाठस्य अध्ययनेन वयं कामदेवविरहातायाः रतिदेव्याः का दशा सञ्जाता इति अवधारणं प्राप्तुं शक्नुमः।
- स्मरविरहेन वसन्तस्य समीपे रतिः कथं विलपति इति अस्य पाठस्य अध्ययनेन वयं ज्ञातुं शक्नुमः।



११.७ ज्ञानाधिक्यम्

१) कुमारसम्भवम् (१-५) सर्गः महाकविकालिदसप्रणीतम्, सम्पादना - श्रीमदुरुनाथविद्यानिधि भट्टाचार्य, संस्कृत पुस्तक भण्डार - ३८, कलिकाता ७००००६।

२) संस्कृत साहित्यसम्भार -(Vol.2), नवपत्र प्रकाशन, कलिकाता १९८९।

३) সংস্কৃত সাহিত্যৰ ইতিবৃত্ত - ড° থানেশ্বৰ শর্মা, চন্দ্রপ্রকাশ, পাণবজাৰ, গুৱাহাটী,



११.८ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : महाकाव्यम्।

प्रश्नः २ उत्तरम् : रतिदेव्याः।

प्रश्नः ३ उत्तरम् : भगवतः शिवस्य।

प्रश्नः ४ उत्तरम् : कामदेवस्य।



११.९ अभ्यासप्रश्नाः

लघुप्रश्नाः

प्रश्नः १: आकाशवाण्या कः सन्देशः प्रदत्तः ?

प्रश्नः २: वसन्तः कः अस्ति ?

प्रश्नः ३: कुसुमायुधपत्निः कस्य सम्बोधनं वर्तते ?

प्रश्नः ४: व्युत्पतिं निरूपयत -

i. जघान

ii. पश्य

iii. स्थितम्

iv. कारितम्

v. निवर्तते

vi. क्रियताम्

vii. याति

viii. रचयिष्यामि

ix. विदितम्

x. दीयताम्

xi. पास्यति

xii. याचितः

प्रश्नः ५: समासं निरूपयत-

i. मदर्पितम्

ii. अनिलाहतः

iv पतिवर्त्मगाः

v. व्यसनकृशा

प्रश्नः ६: प्रसङ्गसङ्गतिपुरस्सरं व्याख्या विधीयताम्।

i. तदिदं परिरक्ष शोभने! भवितव्यप्रियसंगमं वपुः।
रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी।।

ii. तदनु ज्वलनं मदर्पितं त्वरयेर्दक्षिणवातवीजनैः।
विदितं खलु ते यथा स्मरः क्षणमप्युत्पहते न मां विना।।

iii. इत्थं रतेः किमपि भूतमदृश्यरुपं मन्दीचकार मरणाव्यवसायबुद्धिम्।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेनामाश्वासयत्पुचरितार्थपदैर्वचोभिः।।

iv. अयि संप्रति देहि दर्शनं स्मर! पर्युत्पुक एष माधवः।
दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने।।

v. तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान च।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते।।

vi. कुसुमायुधपत्नि! दुर्लभस्तव भर्ता न चिराद्भविष्यति।
शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि।।

प्रश्नः ७: टिप्पणी प्रदेया

i. महाकाव्यम्

ii. कुमारसम्भवस्य चतुर्थसर्गः

प्रश्नः ८: दीर्घप्रश्नाः

i. कामदेवस्य विरहे रतिदेव्याः कीदृशी दशा सञ्जाता? आलोचयत।

ii. आकाशवाण्या वसन्तस्य च आश्वासनं प्राप्य रतिः किम् अकरोत्?

iii. कामदेवः इदृशीं दशां कथं प्राप्तः? विश्लेषयत।

*** ***** ***

अध्यायः १२ : शिशुपालवधम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

१२.१ उद्देश्यम्

१२.२ परिचयः

१२.३ शिशुपालवधस्य कर्ता

१२.४ माघस्य शिशुपालवधकाव्यम्

१२.५ शिशुपालवधमहाकाव्यस्य प्रतिसर्गकथासारः

१२.६ शिशुपालवधमहाकाव्ये रसाभिव्यक्तिः

१२.७ शिशुपालवधे अलङ्कारछन्दांसिः च

१२.८ माघकाव्ये चरित्र-चित्रणम् भाषाशैली च / माघे सन्ति त्रयो गुणाः

१२.९ शिशुपालवधमहाकाव्ये श्रीकृष्णनारदयोः संवादः

१२.१० शिशुपालवधे श्रीकृष्णं प्रति बलरामस्य मन्त्रवर्णनम्

१२.११ शिशुपालवधमहाकाव्ये रैवतकपर्वतस्य वर्णनम्

१२.१२ शिशुपालवधमहाकाव्ये वर्णितराजसूययज्ञे इष्टिवर्णना

१२.१३ शिशुपालवधमहाकाव्ये शिशुपालकृता कृष्णनिन्दा

१२.१४ शिशुपालवधे श्रीकृष्णं प्रति शिशुपालप्रेरितस्य दूतस्य संवादः

१२.१५ श्रीकृष्णस्य सैन्येन सह शिशुपालसैन्यस्य मेलनम्

१२.१६ अध्यायस्य असमीया भाषायां सारांशः

१२.१७ अध्यायात् किमवगतम्

१२.१८ ज्ञानाधिक्यम्

१२.१९ अभ्यासप्रश्नाः

१२.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् -

- अनेन अध्यायेन महाकविमाघस्य जीवनवृत्तान्तं ज्ञातुं शक्यते।
- शिशुपालवधमहाकाव्यस्य संक्षिप्तं वृत्तान्तं ज्ञातुं शक्यते।
- शिशुपालवधे सन्निविष्टानां विभिन्नानां 'रसानां विषये अवबोधनं भवति।
- शिशुपालवधे अलंकारप्रयोगशैल्याः विषये ज्ञातुं शक्यते।
- शिशुपालवधमहाकाव्यस्य काव्यिकसौन्दर्यस्य विषये ज्ञातुं शक्यते।

१२.२ परिचयः

संस्कृतसाहित्यजगति काव्यस्य द्वौ प्रकारौ स्तः दृश्यकाव्यं श्रव्यकाव्यञ्च। दृश्यकाव्येषु अभिनयादिमाध्यमेन काव्यस्य विषयवस्तुं ज्ञातुं शक्यते। श्रव्यकाव्ये श्रवण- पठनादिमाध्यमेन काव्यस्य विषयवस्तुं ज्ञातुं प्रभवति। श्रव्यकाव्यस्य पुनः त्रयो विभागाः सन्ति - महाकाव्यं, खण्डकायं, चम्पूकाव्यञ्चेति। महाकाव्येषु यथा रघुवंशम्, शिशुपालवधम्, कुमारसम्भवम्, किरातार्जुनीयम्, नैषधीयचरितम् च। खण्डकाव्यं यथा मेघदूतम् ऋतुसंहारञ्च। चम्पूकाव्यं यथा नलचम्पूः, पारिजातहरणचम्पूश्च।

एवं संस्कृतसाहित्यजगति पञ्चषु महाकाव्येषु 'शिशुपालवधम्' इति अन्यतमं महाकाव्यं वर्तते। अस्मिन् द्वादश - अध्याये अस्य महाकाव्यस्य सामान्यपरिचयः प्राप्यते। अस्मिन् अध्याये अस्य महाकाव्यस्य सामान्यपरिचयेन सह कवेः माघस्य परिचयम् , अस्य महाकाव्यस्य प्रतिसर्गानां विषयवस्तुनां संक्षिप्तः परिचयः प्राप्यते।

१२.३ शिशुपालवधस्य कर्ता

'शिशुपालवधम्' इति महाकाव्यस्य रचनाकारः माघः। महाकाव्यस्य अस्य समाप्तौ कविवंशवर्णनप्रसङ्गः समुपस्थापितोऽस्ति। अतः माघस्यैतिह्यविषये स्वल्पं आभ्यन्तरप्रमाणं लभ्यते। तदनुसारेण माघो हि सुप्रभदेवाख्यस्य पौत्रो दत्तकाख्यस्य पुत्र आसीत्। यथोक्तं तत्र -सर्वाधिकारी सुकृताधिकारः श्रीचर्मलातस्य बभूव राज्ञः। असक्तदृष्टिर्अस्ति विरजाः सदैव देवोऽपरः सुप्रभदेवनामा तस्याभवद् दत्तक इत्युदात्तः क्षमी मृदुर्धर्मपरस्तनुजः।

तस्यात्मजः सुकविकीर्तिदुराशयादः
काव्य व्यधत्त शिशुपालवधाभिधानम्॥

वर्मलातनामा नृपतिः वर्मनामा 'वर्मनामा वर्मनाभः धर्मनामः धर्मराट्' इति प्रभृतिनामभिरपि परिचितः। वसन्तगढग्रामे तेन स्थापितमेकं शिलाशासनं समुपलब्धमस्ति।

यथोक्तं तत्र -

द्विरेशोत्यधिके 'काले षण्णां वर्षशतोत्तरे।
जगन्मातुरिदं स्थानं स्थापितं गोष्ठिपुङ्ग वैः ॥
जयति जयलक्ष्य लक्षितवक्षः स्थलसंशयोहारः।
नोवर्मलातनृपतिः पतिरखनेरधिकबलवीर्यः॥ इति।

यद्यपि कविवंशवर्णनपराणि पञ्च पद्यान्यपि मल्लिनाथादिभिर्व्याख्यानान्येव तथापि तेषां मौलिकत्वं तु ससंशयमेव यतो हि तद्ग्रंथनशैलो ग्रन्थनिर्वाहितशैल्या भिन्नेव। सम्भवति पश्चाहर्तिना केनाऽपि तानि प्रक्षिप्तान्यपि स्युः। सत्यपि तथा स्वल्पमपि कविपरिचय-प्रकाशं तु तेभ्यः प्राप्यत्येव प्रक्षेपकस्यापि आप्तत्वात्। श्रोवर्मलातो नृपः सम्भवतो वलभो स्वदेश शासति स्म। तस्य च स्थितिकालः स्पष्टतः ६८२ मितवैक्रमाब्दमभितः शिलालेखे लिखितत्वात्। तेन हि

सुप्रभदेवस्याऽप्ययमेव कालः। तस्य हि सुतो दत्तकः सर्वाश्रयः। तस्य च कालस्तदन्तरवर्ती, सम्भवतः ६७०-७३० मितवैक्रमाब्दानभितः। तस्य पुत्रो माघ इति तस्य कालः ७००-७८० मितवैक्रमाब्दानभितोअनुमितः पण्डिताः। केचित्तु शिशुपालवधगतं -

अनुत्पूलपदन्यासा सद्वृत्तिः सन्निबन्धना।
शब्दविक्ष्येव नो भाति राजनीतिर पस्पशाः ॥ (२/११७)

अस्मिन, पद्यमवलम्ब्य वृत्तिशब्देन काशिकावृत्तिं जयादित्यप्रणोतां न्यासशब्देन जितेन्द्रबुद्धेः पश्चाहर्तीत्यपि मन्यते। किन्त्वेष भ्रम एव दृश्यते 'दिङ्नागानां पथि परिहरन' इति कथनेन कालिदासदिङ्नागयोः समकालिकत्वकल्पनमिव। यतो हि बाणस्य समयस्तु सुनिश्चित एव। न कदापि काशिकावृत्तिकारेण बाणपूर्ववर्तिना भाव्यम्। काशिकावृत्युपरि हरदत्तस्य पदमञ्जरो टीका। तस्याः एव व्याख्या जिनेन्द्रबुद्धेर्न्या सापराभिधा। किन्तु बाणभट्टोऽपि न्यासग्रन्थं स्मरति कृतगुरुपदन्यासा लोकः इव व्याकरणे अपि इति कथनेन। तेन हि जिनेद्रबुद्धेः पूर्वमपि आमन्ननेके न्याससंज्ञिता ग्रन्थाः। अष्टाध्यायाः वृत्तिग्रन्य-काशिकापूर्व-मप्यासोदेव यद्रुपरि वार्तिकानि प्रणीतानि कात्यायनादिभिः वस्तुतस्तु अष्टाध्यायी इति ग्रन्थे सूत्राणामादयो वृत्तिकारः पाणिनिरेव तदनु च व्याडिरिति सर्वसम्मतमेव। अतो नेदं प्रमाणं माघकालनिर्णये। अपरश्च जिनेन्द्रबुद्धिः पदमञ्जरीमनुसरति। पदमञ्जरोकारो हरदत्तः स्वयमेव माघं स्मरतीति निरस्तैव जिनेन्द्रबुद्धेर्माघपूर्ववर्तिता।

सामान्यतो बाह्यप्रमाणैरवि माघस्य समयं निर्णेतुं शक्यते। बाणभट्टो माघं न स्मरतोति सामान्यतः इदमेव तस्य स्थितिकालस्य पूर्वसीमा। यद्यपि स भट्टिमपि न स्मरति तथैव भारविमपि तथापि सामान्यरूपेणेदमुच्यते। भारविमनुजीवति माघ इति तथा रेखा कल्पिता। यशस्तिलकचम्पूकारः सोमदेवः (१०१६ वै), ततः पूर्ववर्ती ध्वन्यालोककृदानन्दवर्धनः (९०७ वे.) कविराजमार्गस्य प्रणेता नृपतुङ्गदेव (८७१ वे.) च माघं स्मरन्ति। तुङ्गदेवस्तु तं कालिदाससमकक्षत्वेन स्तौति। अतस्ततोऽपि न्युनतममपि शताब्दीपूर्वमेव माघस्य स्थितिकाल भवितव्यम्। अनेनाऽपि माघस्य स्थितिकालः ७७० वैक्रमाब्दमभितः आपतति सामान्यतः। स च दीर्घजोवी आसीत्। तेन तस्य स्थितिकालः ७००-७८० मितवैक्रमाब्दान्तरालेइनुमितेः साधुरेव।

प्रचलितकिंवदन्त्यनुसारेण, यथा भोजप्रबन्धे प्रबन्धचिन्तामणौ च लिखितं, माघो नाम कश्चिद्विचक्षणो भोजस्य सभायामासीत। कोऽसौ माघः कच्चासौ भोज इति तु नाधुनाऽपि स्पष्टम् । धारानगरीशः परमार-वंशीयो भोजस्तु १०६०-१११० मितवैक्रमाब्दान्तराले स्थितिमानिति सप्रमाणं वक्तुं शक्यते। माघस्य तत्समकालिकत्वे मते सति तस्य हि 'रम्या इति प्राप्तवतोः पताकाः' (५/५३) 'त्रासाकुलः परिपतन्' (५/२६) इति पद्ययमुद्धरतुः आनन्द्रवर्धनस्य कः स्थितिक स्याद् यं हि कुन्तको, राजशेखरः, महिमभट्टश्च, स्वयमेव भोजोऽपि स्मरति अभिनवगुप्तस्तु व्यारव्यायात्यपि। तेन नैव माघो धारानगरीश—भोजसमकालिकः। इदं सम्भवति यत्कश्चिद्भोजाख्यो नृपः यमैतिहासिका द्वितीयभोजमिति परिचिन्वन्ति, चित्तौर नगरे ७०७ मितवैक्रमाब्दात् ७३२ मितवैक्रमाने पर्यन्तं शासनरत आसीत्। तेनास्य माघाश्रयदातृत्वं सिद्धत्यपि। अपरञ्च माघस्य श्रीमालवास्तव्यत्वम् -

'इति श्रोभिन्नमालवास्तव्यदत्तकसूनोर्महावैयाकरणस्य माघस्य कृत्तौ शिशुपालवधे महाकाव्ये-'

इति शिशुपालवधपुष्पिकावाक्यतो ज्ञायते। श्रीमालवास्तव्यश्चित्तोरनगरीमाश्रितवानिति न किमप्याश्चर्यम्।

अस्य महाकवेर्विरचितं शिशुपालवधं नाम महाकाव्यमस्ति यत् माघकाव्यमिति नाम्नाऽपि प्रसिद्धम। संस्कृतसाहित्यस्य प्राचीनकविपरम्परायां माघकवेर्महतो प्रशंसा कृता अस्ति। अस्य सम्बन्धे अनेकाः सुक्तयः सन्ति -

'माघे मेघे गतं वयः'

'काव्येषु माघः कविकालिदासः'

'तावद्भारवेर्भाति यावन्माघस्य नोदयः'

'नवसर्गगते माघे नवशब्दो न विद्यते'।

'उपमा कालिदासस्य भारवेरर्थगौरवम्।

दण्डिणः पदलालित्यं माघे सन्ति त्रयो गुणाः'।।

इत्यादयः॥

१२.४ माघस्य शिशुपालवधकाव्यम्

महाकविमाघस्य शिशुपालवधकाव्ये विंशति सर्गाः सन्ति। ग्रन्थेऽस्मिन् युधिष्ठिरस्य राजसूये यज्ञे श्रीकृष्णकृतः शिशुपालस्य वधो मुख्यतया वर्णितोऽस्ति। माघेन शिशुपालवधमहाकाव्ये महाभारतस्य सभापर्वणः (३३-४२) शिशुपालवधस्य लोकप्रिया कथा सौक्तिवैचित्र्यपूर्णायाम् अलंकृतशैल्यां प्रस्तुता। ग्रन्थोऽयं बृहत्रयं अन्यतमं रत्नं वर्तते। शब्दार्थयोः मनोहरसामंजस्येन, सर्वत्र नवीनशब्दावल्याः अभिनवप्रयोगकौशलेन सह शिशुपालवधमहाकाव्यस्य बृहतत्रय्यां महत्वपूर्णं स्थानं विद्यते।

नारदाद् युधिष्ठिरयज्ञवृत्तान्तं श्रुत्वा कृष्णः ससैन्यस्तत्र गच्छति। तत्र च कृष्णस्याग्रपूजाविरोधिनमुद्धतं शिशुपालं स निहन्ति। एतावतोमेव कथां कविः स्वप्रतिभावलाद् विस्तृतेषु विंशतिसर्गेषु वर्णयति।

शिशुपालवधस्य सर्गानां नामानि क्रमेण यथा--

(१) कृष्णनारदसम्भाषणम्

(२) मन्त्रवर्णनम्

(३) पुरोप्रस्थानम्

(४) रैवतकवर्णनम्

(५) सेनानिवेशः

(६) ऋतुवर्णनम्

(७) वनविहारः
(८) जलविहारः
(९) प्रदोषवर्णनम्
(१०) सुरतवर्णनम्
(११) प्रत्युषवर्णनम्
(१२) प्रषाणवर्णनम्
(१३) श्रीकृष्णसमागमः
(१४) कृष्णार्घदानम्
(१५) अपशकुनाविर्भाव
(१६) दूतसंवादः
(१७) यदुवंशक्षोभः
(१८) सङ्कुलयुद्धवर्णनम्
(१९) युद्धवर्णनम्
(२०) शिशुपालवधम् इति।

१२.५ शिशुपालवधमहाकाव्यस्य प्रतिसर्गकथासारः

शिशुपालवधस्य प्रथमे सर्गे नारदागमनम् श्रीकृष्णेन तदादर, नारदेन शिशुपालवधाय प्रोत्पादनं शक्रसन्देश कथनम्। द्वितीये कृष्णबलरामोद्धवानां गुप्तमन्त्रणा उद्धवपरामर्शानुसारेण युधिष्ठिरस्य यज्ञे गमनाय निर्णयः, तृतीये श्रीकृष्णस्य प्रस्थानं हारका सेनासमुद्रादीनां वर्णनम्, चतुर्थे रैवतकपर्वतवर्णनम्, पञ्चमे तत्र सैन्यशिविरवर्णनम्, षष्ठे षट् ऋतुवर्णनम्, सप्तमे वनविहारवर्णनमू, अष्टमे जलक्रीडावर्णनम्, नवमे सायं चन्द्रोदय-श्रृंगारविधानादिवर्णनम् दशमे दान गोष्ठीरात्रिक्रीडावर्णनम, एकादशे प्रभातवर्णनम् द्वादशे प्रस्थानवर्णनं यमुना वार्णनञ्च, त्रयोदशे कृष्णपाण्डव -समागमः श्रीकृष्णस्य नगरप्रवेशवर्णनम् च, चतुर्दशे राजसूययज्ञक्रमः श्रीकृष्णास्याग्रपूजा, भीष्मेण तस्य स्तवनञ्च, पञ्चदशे शिशुपालक्रोधो युद्धाय सन्नद्धता च राज्ञां, षोडशे दूतसंवादः, सप्तदशे युद्धप्रयाणम्, अष्टादशे युद्धवर्णनम् एकोनविंशे युद्धवर्णनं चित्रालंकारयोजना च, विंशे शिशुपालस्य वधः इति प्रतिसर्गकथासारः।

शिशुपालवधस्य सन्त्यनेकाष्टीका विंशत्यधिकाः, यासु मल्लिनाथस्य सर्वङ्कषा प्रसिद्धाः प्राचीनासु नवासु च शेषराजस्य चन्द्रकला॥

१२.६ शिशुपालवधमहाकाव्ये रसाभिव्यक्तिः

रसेषु शिशुपालवधमहाकाव्यस्य प्रधान रसः वीररसः वर्तते, श्रृंगाररसः तदंगमस्ति। वस्तुतः अस्मिन् वीरश्रृगांरयोरद्भुतं मिश्रणं वर्तते। वीररसेन सह श्रृंगाररसस्य एव योगः तिष्ठति।

प्रथमे सर्गे एव श्रीकृष्णस्य उत्पाहस्य संकेतो प्राप्यते, तदालम्बनस्य शिशुपालस्य वर्णनमपि कृतं कविना पंचदशे सर्गे तु शिशुपालस्य कठोरवचनदोषपूर्णव्यवहारा उद्दीपनविभावाः विद्यन्ते। सप्तदशे सर्गे तदनुभावानां वर्णनं वर्तते। एवमेव माघः स्वमहाकाव्ये वीरस्य पूर्णीमभिव्यक्तिःवीररसस्य पूर्णमभिव्यक्तिः प्रस्फुटितवान्। वीररसस्य कियत् मनोहारिवर्णनं यथा–

रणेषु तस्य प्रहिता प्रचेतसा सरोष हुंकारपराङ्मुखोकृता।
प्रहर्तुरेवोरगराजरज्जवो जवेन कण्ठं समयाः प्रपेदिरे।।

वस्तुतः तस्य युद्धंवर्णनं तु विशुद्धवीरतायाः परिचायकमस्ति। अष्टादशसर्गेऽपि युद्धवर्णनं वीररसस्य उदाहरणं प्रस्तौति –

रोद्रोरन्ध्रं व्यश्नुवानानि लोलैरङ्गस्यान्तर्मादितैः स्थावराणि।
केचिद्गुर्वीमेत्ये संयंन्निषद्यां क्रोणन्ति स्म प्राणमूल्यैर्यशांसि॥
(शिशुपालवधम्,१.१८)

वीर्योत्पाहश्लाधि कृत्वाऽवदानं संग्रामाग्रे मानिना लज्जितानाम्।
अज्ञातानां शत्रुभिर्युक्तमुच्चैः श्रीमन्नाम श्रावयन्ति स्म नग्नाः॥
(शिशुपालवधम. १/२६).

सम्भोगश्रृंगारवर्णनायां महाकवेः अधिकारः प्रतीयते –

निशान्तनारी परिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः।
प्रियेण तस्यानपराधबाधिताः प्रकम्पनेनानुचकम्पिरे सुराः॥
(शिशुपालवधम, १/६१).

उत्तरीयविनयात्तपमाणा रुन्धती किल तदोक्षणमार्गम्।
आचरिष्ट विकटेन विवोदुर्वक्षसैव कुचमण्डलमन्या।।
(शिशुपालवधम्, १०/४२)

विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये।
मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा।।
(शिशुपालवधम्, १३/४०)

विप्रलम्भश्रृंगारविषये महाकवि सफलो न दृश्यते। अन्ये रसा यथा – रौद्ररसवीभत्परसहास्यरसकरूणरसवात् सल्यरसानां चाद्भुतः समन्वयः दृश्यते। भक्तिभावनातः च नारदमुरखात् श्रीकृष्णस्य निराकाररूपं कीर्तयति।

१२.७ शिशुपालवधे अलङ्कारछन्दांसि च

महाकवि माघः छन्दसां वैविध्यं प्रदर्श्य छन्दोचयने स्वपटुतां प्रकटितवान्। क्वचित् रसानुकूलानां छन्दसां प्रयोगं कृतवान्। प्रथमे सर्गे वंशस्थविलं, द्वितीये सगे अनुष्टुपम् , तृतीयसर्गे उपजाति, पञ्चमे सर्गे बसन्ततिलक, षष्ठे सर्गे च द्रुतविलम्बितं प्रयुक्तवान्। महाकविः सर्गस्य अन्ते छन्दोपरिवर्तनं चकार। चतुर्थसर्गे तु द्वाविंशतिछन्दसां प्रयोगः शास्त्रलक्षणकाराणां मान्यतानु—

रुपमस्ति। प्रमुखेभ्यो छन्दोभ्यः व्यतिरिक्तानां औपच्छन्दसिक पृथ्वी- तोटक मत्तमयूरादीनां छन्दसां प्रयोगमपि सः कृतवान्। स्त्रग्विणो इति छन्दसः अत्यानप्रासयुक्तः सुन्दरः प्रयोगः माघस्य शैल्याम् अपि समुचितमुदाहरणं प्रस्तौति।

अलङ्कारप्रयोगेऽपि माघः सिद्धहस्तः आसीत्। शिशुपालवधे शब्दालंकाराणाम् अर्थालङ्काराणां च प्रचुर मात्रायां वर्णनं प्राप्यते। शब्दालंकारेषु अनुप्रासस्य यमकस्य श्लेषस्य च माघः सुप्रयोग क्रियते।

उदाहरणार्थं यथा-

'स काञ्चने यत्र मुनेरनुज्ञया नवाम्बुदशयामवपुर्न्यविक्षत।

जिगाय जम्बूजनितश्रियः श्रियं सुमेरुशृङ्गस्य तदा तदासनम् ॥

(शिशुपालवधम् वधम, १/१९)

शब्दालंकारा इव अर्थालंकारामांमपि सुन्दर योजना माघवर को दृष्टिगता भवति। माघकाव्यस्य उपमा अत्यन्तं रोचकाः। यथा-

'उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।

वहति गिरिरयं विलम्बिघण्टादयपरिवारितता गोन्दलीलाम।।

१२.८ माघकाव्ये चरित्रचित्रणं भाषाशैली च / माघे सन्ति त्रयो गुणाः

शिशुपालवधे पात्राणां संख्या अतीव अल्पोयसि विद्यते। आदितः अन्तं यावत् मुख्यरूपेण पात्रद्वयं विद्यते, श्रीकृष्णः शिशुपालश्च। अन्यानि पात्रानि मध्ये प्रसङ्गवशात् आयान्ति सन्ति च। पात्राणां चरितचित्रणे कविना पुराण-प्रसिद्धानां लोकविश्रुतानाञ्च वैशिष्टानाम् अथ च जातिगत व्यक्तिगत विशेषाच्छः उल्लेखः क्रियन्ते।

अनुपमभाषाशैलीसम्पन्ने महाकविमाघस्य शिशुपालवधे ओजस्य माधुर्यस्य च प्रयोगः सुन्दररूपेण दृश्यते। शब्दार्थोसतकविरिव द्वयं विहानपेक्षते इति कथयता माघेन शब्दार्थयोः उभयोः सौन्दर्यस्य उपरि ध्यानं दत्तमस्ति । काव्येऽस्मिन् तस्य विशालं शब्दकोशमुदवीक्ष्य केनापि निगद्यते-

नवसर्गगते माघे नव शब्दो न विद्यते। अर्थात् शिशुपालवधस्य नवसर्गाणां समाप्तौ माघविषयिनी इयम् उक्तिः सर्वथा सार्थका भवति। यद्यपि कालिदासस्य उपमा, भारवेः अर्थगौरवम्, दण्डिनः पदलालित्यं प्रसिद्धम्। किन्तु, माघकाव्ये उपयुक्तानां त्रयाणाम् अपि सन्निवेशः लभ्यते, यथोच्यते -

उपमा कालिदासस्य भारवेरर्थगौरवम्।

नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः॥

अस्मिन् महाकाव्ये विरलवैशिष्ट्यं वर्तते यत् युद्धवर्णने शृंगाररसस्य प्रयोगः केवलं माघेनैव भवितुमर्हति। युद्धवर्णनम्, वर्षाऋतुवर्णनम्, प्रभातवर्णनम्, प्रभातकालीनस्य निद्रासुखस्य वर्णनम्, नैसर्गिकदृश्यवर्णनम्, सूर्यवर्णनम्, यज्ञं वर्णनम्, द्वारिकायाः समुद्रस्य च वर्णनम्, रैवतकापर्वतवर्णनम्,

आकाशादवतरतः नारदस्य वर्णनम्, ग्राम्यजीवनचित्रणम्, जयनिकाप्रथायाः वर्णनम् , रुपचित्रणम् पदार्थानामायातनिर्यातवर्णनम् च कृतं चारुतया माघेन। प्राचीनकालीनायाः संगोष्ठ्याः वर्णनम् भवन्तः पश्यन्तु साक्षात् कृतं महाकविना –

शुद्धमश्रुतिविरोधि बिभ्रतं शास्त्रमुज्ज्वलमवर्णसंकरैः।
पुस्तकैः सममसौ गणं मुहुर्वाच्यमानमश्रृणोद् द्विजन्मनाम्॥

चतुर्दशे सर्गे शिशुपालस्य दूतस्य उभयार्थिका चतुरा उक्तिः। स्थाने स्थाने सुभाषितानि प्राप्यन्ते यथा, जीवने दैवपुरुषार्थयोः समन्वयस्य समानं काव्यजगति शब्दार्थयोः समानं महत्वं विद्यते। समय एव दृश्यते मनुष्यस्य उत्थानस्य पतनस्य च कारणं विद्यते।

माघस्तु उपमासु सामान्यासु एकः श्लोकः अतीव प्रसिद्ध , येन माघः 'घन्टामाघ' इति विरुदेन अलंकृतो जातः –

'उदयति विततोर्ध्वरश्मिरज्ज्वावहिमरुचौ हिमधाम्निर्याति चास्तम्।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिचारितवागोन्तनोलः।।'

शिशुपालवधम् ४/२०

माघे अन्याः सुरुचिपूर्णा उपमाः रमणीयाः दृश्यन्ते। एवमेव अर्थगौरवम्। वस्तुतः माघस्य भाषायाम् अनवद्योधिकारः आसीत्। अतएव पदे पदे तस्य महाकाव्ये पदलालित्यम्। पदमाधुर्येण सह स्वरमाधुरी अपि प्राप्यते। माघस्य शैली अलंकृता वर्तते। क्वचित् समासबहुलभाषा, क्वचित् गुणसमन्विता, क्वचित् माधुर्यप्रसादाभ्यामुपेता भाषा दृश्यते। भाषायां नूतनाः शब्दाः अपि सर्वत्र प्राप्यन्ते। अतएव समीक्षकैः कथितम् यत् नवसर्गगते माघे नवशब्दोऽपि न विद्यते मेघे माघे गतं वयः इति।

इत्थं शिशुपालवधे वर्णितानां उपर्युक्तानां रस छन्द्रोऽलङ्कार–रीति– गुण –पदलालित्यादीनां वैचित्र्येण अलंकारनिबद्धवर्णनशैल्याः विस्तृतविवेचनेन च एतत् स्पष्टं भवति यत् माघस्य काव्यशास्त्रीयं ज्ञानं समुद्रवद्गाधमासीत्।

१२.९ शिशुपालवधमहाकाव्ये श्रीकृष्णनारदयोः संवादः

एकदा श्रीकृष्णः द्वारकानगरे तस्य पिता वसुदेवस्य गृहे निवासम् अकरोत्।

तस्मिन् समये एकस्मिन् दिने ब्रह्मदेवस्य पुत्रः नारदमुनिः द्वारकानगरम् आगतवान्। श्रीकृष्णः स्वगृहं समागतं नारदं दृष्ट्वा महता हर्षेण आसनात् झटिति उत्थाय स्वागतं कृतवान्। समुचितं सत्कारं च कृत्वा सः स्वाभिमुखे आसने नारदम् उपवेशितम्। अतीव प्रसन्नः नारदः निजकमण्डलुपात्रात् पुण्यजलानि हस्ते स्वीकृत्य श्रीकृष्णस्य शिरसि अभिषिक्तवान्, आशीर्वचनं च दत्तवान्। ततः परं नारदः श्रीकृष्णस्य प्रशंसां कृतवान्। प्रशंसया लज्जितः श्रीहरिः विनम्रः भूत्वा स्वगृहं प्रति आगमनस्य कारणम् नारदं पृष्टवान्।

तदा नारदः श्रीकृष्णम् एवम् उक्तवान्। हे नारायण! यद्यपि भवान् सर्वं जानाति, तथापि इन्द्रस्य मया भवन्तं प्रति सन्देशम् एकम्। सः सन्देशः अयमस्ति यथा– 'पूर्वं दितिपुत्रः असुरेन्द्रः

हिरण्यकशिपुः महता तपोबलेन गर्वितः सन् देवानां मनुष्याणां च घोरं पीडनं कृतवान्। हे केशव! तादृशस्य राक्षस्य संहारं भवानेव नरसिंहरूपं धृत्वा कृतवान्'।

अनन्तरं सः एव हिरण्यकशिपुः रावणरूपेण पुनः जन्मं सम्प्राप्य इन्द्रवरुणादीन् देवान् दासान् कृत्वा त्रलीकानाम् अधिपतिः अहमेव इति गर्वेण मुनीनां साधूनाम् अत्यन्तं अनिष्टं कृतवान्। तदा हे माधव! भवानेव रामं धृत्वा राक्षसस्य संहारं कृतवान्।

स एव रावणः शिशुपालरूपेण पुनः जन्मं लब्ध्वा सम्प्रति सर्वेषां देवानां धर्माणां गवां ब्राह्मणानां उच्छेदकः सन् लोककण्टकः जातः। शिष्टरक्षणं दुष्टशिक्षणम् इति महतः व्रतस्य परिपालक! हे नारायण! पुनः भवानेव अस्य भुवनपीडकस्य धर्मभञ्जकस्य राक्षसस्य शिशुपालस्य संहारं कर्तुं समर्थः वर्तते। अतः यथाशीघ्रम् अस्य संहारं करोति' इति।

ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचं नभ-
स्मस्मिन्नुत्पतिते पुरः सुरमुनाविन्द्रोः श्रियं बिभ्रति।
शत्रुणामनिशं विनाशपिशुनः क्रुद्धस्य चेद्यं प्रति
ठ्याम्नीव भ्रुकुटिच्छलेन वदने केतुश्रकारास्पदम्।। (शि.व, २.३५)

नारदस्य वचनानि श्रुत्वा श्रीकृष्णः तथैव करिष्यति इति नारदम् आश्वासं प्रददाति स्म। श्रीकृष्णस्य वचनात् सन्तुष्टः भूत्वा नारदः पुनः आकाशमार्गेण गतवान्।

१२.१० शिशुपालवधे श्रीकृष्णं प्रति बलरामस्य मन्त्रवर्णनम्

एकदा समान समये श्रीकृष्णस्य समक्षे कार्यद्वयम् उपस्थितम्। एकं मित्रस्य युधिष्ठिरस्य आह्वानेन राजसुयायतो भागं ग्रहीतुं हस्तिनापुरं गन्तव्यम्। अन्यात् देवानां लोकस्य च क्षेमाय लोककण्टकस्य शिशुपालस्य संहारं कर्तुं चेदिराज्यं गन्तव्यम्। अतः सः स्वकार्यं अग्रजं बलरामं , पितृव्यं मन्त्रिनं उद्धवम् आहुय च उपवेश्य स्वयमं उपविष्टः एतयोः कार्यह्यमध्ये किम् आदौ करणीयम् इति प्रश्नः तयोः पुरतः उपस्थाप्यताम्- 'ततः सपत्नापनस्मरणानुशयस्फुरा।

ओष्ठेन रामो रामौष्ठबिम्बचुम्बुनचुञ्चना'।। (शि.व. २.२४)।

हे कृष्ण! राजनीतौ स्वपक्षक्षेमाय शत्रुपक्षस्य विनाशः एव अन्तिमनिष्कर्षः। रुक्मिणीस्वयम्बरसमये भवान् तां राक्षसविवाहेन परिगृहीतवान्। तेन शिशुपालः भवन्तं शत्रुं मन्यते, यतोहि सोऽपि तां परिणेतुम् इष्टवान्। ततः परं भवान् यदा नरकासुरसंहारं कर्तुं अन्यत्र गतवान्, भवन्तं पुरे अविद्यमानं ज्ञात्वा सः द्वारकापुरम् आक्रान्तवान् ।तदा अस्माकं प्रवासियों यादवस्त्रीणां सः अषहरणं कृतवान्। स्त्रीणाम् अपहरणम् अत्यन्तं निन्दनीयं सहित कार्यम्। तादृशैः नीचकायैः बहुवारं सः भवतः विषये शत्रुत्वं स्पष्टं प्रकटितवान्। एवं महापराधं बहुधापि बहुभिर्दोषैः ग्रसितं तं राक्षसं शिशुपालम् अधुनापि सहनेन त्यजामः चेत् तादृशस्य महाशत्रोः त्यागः अस्माकं महान् स्नातकः स्यात्।

यद्वासुदेवेनादोनमनादीनवमीरितम्।
वचसस्तस्य सपदि क्रिया केवलमुत्तरम्।। (२.२२)

यद्यपि पितुर्भगिन्याः श्रुतश्रवसः पुत्रः भुत्वा शिशुपालः अस्माकं बन्धुः, तथापि स्वकीयैः नीचचेष्टितैः सः अस्माकं कृत्रिमशत्रुः जातः। कृत्रिमशत्रोः कदापि क्षमा वा उपेक्षा वा राजधर्मे न करणीया—

'सखा गरीयान् शत्रुश्र कृत्रिमस्तौ हि कार्यतः।
स्याताममित्रौ मित्रे च सहजप्रकृतावपि'।। (२.३६)

युधिष्ठिरं यागं करोतु, तेन अस्माकं वा, अस्माभिः तस्य वा कोऽपि क्लेशः नास्ति। परन्तु महादोहिनः लोकवञ्चकस्य महापापिनः शिशुपालस्य संहारस्तु प्रधानतया भवता करणीय एव। अंतः भवान् शीघ्रं चेदिराज्यं प्रति प्रस्थानं करोतु।

१२.११ शिशुपालवधमहाकाव्ये रैवतकपर्वतस्य वर्णनम्

शिशुपालवधस्य चतुर्थसर्गे रैवतकपर्वतस्य वर्णनं विद्यते। हस्तिनापुरं प्रति प्रस्थितः भगवान् श्रीकृष्णः सैन्येन सह रैवतकनामकं पर्वतं प्राप्तवान्-

'निःश्वासधूमं सह रत्नभाभिर्भित्त्वोत्थितं भूमिमिवोरगाणाम्।
नीलोत्पलस्यूतविचित्रधातुमसौ गिरिं रैवतकं ददर्श'।। (४.२)

पाताललोके स्थितानां महोज्ज्वलैः मणिभिः शिरसि अलंकृतानां सर्पाणां निःश्वासधूमः यदि भूमिं भित्वा उपरि निर्गच्छति चेत्, स एव रैवतकपर्वतः स्यात्। अत्यन्तम उन्नतैः विशालैः शिखरैः मेघान् अपि उपरि उत्थापयन् अयं रैवतकः साक्षात् सूर्यस्य मार्गं विन्ध्यपर्वतः इव अवरोधयति वा इतिवद् भाति। तत्र पर्वततटेषु स्थितेषु जलाशयेषु विकसितकमलगर्भेषु मधुपानार्थं समागतानां भ्रमराणां गीतध्वनिः श्रुयते स्म। तत्रत्याः महोन्नताः विशालाः च वृक्षाः सूर्यस्य आतपम् अपि निवारयन्ति स्म। अस्य पर्वतस्य समीपे निवसन्तः जनाः समतलेषु तटेषु अपरिमितानि मणिरत्नादीनि धनानि बहूनि सन्तीति हेतोः ते सुष्ठु तानि रत्नानि स्वीकुर्वन्ति स्म। निरन्तरं मेघैः वर्षणात् तस्य पर्वतस्य वनेषु सर्पाणां विषस्य अग्निप्रमादस्य च न कोऽपि दुष्प्रभावः आसीत्। तत्र पर्वतवनेषु नित्यं मधुरं कुजतां श्रोतुं यदा श्रीकृष्णः उत्पुकः सन् तदा स्वामिनः उत्पाहं दृष्ट्वा रथसारथिः दारुकः अस्य पर्वतस्य सौन्दर्यं श्रीकृष्णाय एवं श्रोतयामासः -

यथा महेश्वरः दिशारूपम् अम्बरम् धृत्वा अनावरणः सन् तीक्ष्णाभ्याम् उन्नताभ्यां शिखराभ्यां युक्तं वृषभम् अधिरोहति,एवमेव चन्द्ररेखां च शिरसि धारयति, तथैव समस्तं भूमण्डलं दशादिशाचक्रम् अपि समुन्नतैः विशालैश्र शिखरैः समीपस्थैः लघुपर्वतैः च आक्रम्य समुन्नतशिखरेषु चन्द्रमपि दधानः अयं रैवतकः शङ्करसदृशः प्रतिभाति। अस्य पर्वतस्य एकस्मिन् पार्श्वे चातकानां पिपासायाः उपशमकाः प्रस्फुरन्तीभिः, स्वर्णकान्तियुताभिः सौदामनीभिः शोभिताः मेघाः वर्षन्ति स्म।

'व्योमस्पृशः प्रथयता कलधौतभित्ती
रुन्निद्रपुष्पचणचम्पकपिङ्गभासः।
सौमेरवीमधिगतेन नितम्बशोभा-
मेतेन भारतमिलावृतवद्विभाति'।। (४.३२)

अस्य पर्वतस्य एकस्मिन् स्थाने वृष्टिः, अपरेऽस्मिन् स्थाने आतपः एतद् द्वयमपि एकस्मिन्नेव समये द्रष्टुं शक्यते स्म। अस्य रैवतकस्य स्फटिकमणिघटितेषु तटप्रदेशेषु प्रवहमाणाः विशुद्धशुभ्रजलैः शोभिताः जलाशयाः एकस्मिन् पार्श्व, अन्यस्मिन् पार्श्वे इन्द्रनीलमणिखचितेषु तटस्थलेषु प्रवहमाणाः नीलकान्तिः युताः जलाशयाः एकत्र खङ्गच्छन्ते चेत्, ते कृष्णवर्णिते: यमुनाजलैः सङ्गमिताया: विशुद्धधवलजलायाः गङ्गानद्याः शोभां भजन्ति स्म।

आच्छाद्य पुष्पपटमेष महान्तमन्त-
रावर्त्तिभिर्गृहकपोतशिरोधराभैः।
स्वाङ्गानि धुमरूचिमागुरवों दधानै -
र्धूपायतीव पटलैर्नवनोरदानाम्।। (४.५२)

अत्र सुन्दरैः नानावर्णोपशोभितैः रोमभिः शोभितानाम्, इतस्ततः सञ्चरतां प्रियकपक्षिणां कारणाद् अयं पर्वतः इतस्ततः चलद्भिः मणिरत्नकान्तिशोभितैः स्वकीयैः अवयवैः युक्तः सन् स्थावरः अपि जंगमः जातः किम् इति भ्रान्तिं जनयति स्म। कदम्बपुष्पसुवासितैः अस्य पर्वतस्य वनसमूहे सारसपारावतादयः पक्षिगणाः सदा अपि सुमधुरं कूजन्ति स्म। यथा समस्तवेदानां मन्त्रगणं ब्राह्मणः धारितवान् तथैव तं निधिगणमपि अयं पर्वतः धारितवान्। रात्रौ तटगतानां सुवर्णकान्तियुतानां रत्नमणीनां किरणैः मिश्रितेन सहस्त्रगुणतां प्राप्तेन स्वकिरणजलेन युक्तं चन्द्रं दृष्ट्वा तत्रत्याः कमलिन्यः अयमेव सहस्त्रकिरणः सूर्यः, न तु चन्द्रः इति भ्रान्त्याः स्वर्गभ्रस्थानि कमलानि विकासयन्ति स्म। अत्र दोषरहितानां निर्मलानां मणिरत्नानां किरणाः आकाशे परवर्तिताः भूत्वा तत्र आधाररहितम् एव अद्वितीयम् अलौकिकम् आलेख्यरचनं कुर्वन्ति स्म।

अत्र योगिनः मैत्रादिचित्तशोधकवृत्तिभिः अविद्यादिक्लेशात् अपाकृत्य सबीजयोगं संप्राप्य प्रकृतिपुरुषयोः भेदरूपिणीं बुद्धिमपि अतिक्रान्तं निरन्तरं तपस्यां कुर्वन्ति। हिमेन शीतले पर्वतराजे हिमालये स्थिरवासी शङ्करः हिमपातात् स्वकीयं शरीरं रक्षितुं निबिड गजचर्मनिर्मितं वस्त्रम् आच्छादयति-

सायं शशाङ्ककिरणाहतचन्द्रकान्त-
निष्यन्द्रिनीरनिकरेण कृताभिषेकाः।
अकोपलोल्लसितवह्निभिरद्धि तप्ता-
स्त्रीव्रं महाव्रतमिवात्र चरन्ति वप्राः।। (४.५२)

रैवतकपर्वते परस्परदोषनिराकरणार्थं संगतैः सर्वैः त्रुतुभिः शीतोष्णादिदुःखेन रहितः अत्र स्थिरवासी कश्चन् दरिद्रोऽपि सन्तुष्टः दृश्यते।

१२.१२ शिशुपालवधमहाकाव्ये वर्णितराजसूययज्ञे इष्टिवर्णना

शिशुपालवधमहाकाव्ये चतुर्दशसर्गे राजसूययज्ञस्य इष्टि वर्णना अस्ति। सर्गेऽस्मिन् यष्टुमिच्छया युधिष्ठिरेण आमन्त्रिते श्रीकृष्णसमीपे तदीयं साहार्यं प्रतिच्छतासम्भाषणम् आरभ्यते।

अथ साधुवादी नृपः यज्ञकर्मणि मनः निधाय हरिं सुष्ठुतया स्तुत्या हरिमभिमुखीकृत्य

तदीय आज्ञानुग्रहं ययाच। राजा प्राहः- 'हे प्रभो! प्रागपि त्वयि मूलानां चोपगतो सति मया धर्ममयवृक्षता प्राप्ता। अधुनापि निर्मलामिष्टिम् अभिवाञ्छता मया सम्भृतोपकरणेन त्वमेव प्रतिक्षितोऽस्मि। यतः तव सन्निधिरेव एतत् भवितुमर्हति'-

'पूर्वमङ्ग जुहुधि त्वमेव वा स्नातवत्यवभृथे ततस्त्वयि।
सोमपायिनि भविष्यते मया वाञ्छितोत्तमवितानयाजिन'। (१४.१०)

तच्छ्रुत्वा हरिः उवाच-भवति सुराक्षि स्थिते कः यजति राजलक्षणम्? अहं सर्वदैव भवताम् आज्ञानुकारी। अतः मां कर्तव्यार्थेषु यथेच्छः नियुङ्क्ष्वा मच्छक्रमपि कर्तव्यं करिष्यति इति।

अथ हरेः सहायसम्पत्या सन्तुष्यन् सन् क्रतुं कर्तुं राजा उदयोक्तवान्। ततः सः राजा अष्टमूर्तीधरस्य अष्टमीमूर्तिं भूत्वा अर्थात् यजमानः भूत्वा सांख्यपुरुषेणैव वृत्तिभाजि याजकाभिः यज्ञकर्मणि कारयति स्म। दर्भनिर्मितं पवित्रं मेखलासूत्रं कटिदेशे धृतवत्याः युधिष्ठिरस्य धर्मपत्न्याः द्रौपदीदेव्याः 'पत्न्यवेक्षते' इत्यादिमन्त्रविधिना वीक्षितानि यागडंगभूतानि घृतसमिधादीनि आज्यानि परिस्तरणसमिदाधानसम्मार्जनादिभिः संस्कारैः परिपुते आग्नौ ऋत्विजः यजन्ति स्म। मन्त्रपवित्रं हविः भुञ्जितुं देवाऽपि तत्रागता। षड् रसयुक्तं प्राकृतमाप्राकृतमन्त्रेण अतिथिसत्कारमभवत्।

अनेन प्रकारेण यज्ञसम्पन्ने सति राजसूयको दक्षिणापि ब्राह्मणाय याचकाय च उदारशीलाराजा मुक्तहस्तेन दत्तवान्। सः न केवलं स्वकीयधनम् अददत्। परन्तु अन्यभूपतिभिः दत्तानि उपायानान्यपि दक्षिणारूपेण द्वयं चकार।

एक एव वस्तु यद्ददौ नृपस्तत्पमापकमतवर्यत क्रतोः।
त्यागशालिनी तपः सुते ययुः सर्वपार्थिवधनान्यपि क्षयम्।।

एवं प्रकारेण महता विस्तारेण सुसम्पन्नस्य राजसुययागस्य अनन्तरं धर्मशास्त्रस्य वचनम् अनुस्मरन् राजा युधिष्ठिरः प्रथमपूजार्थम् कस्मै अर्घदानं वा महापुरुषाय करणीयम् इति भीष्माचार्यं पृष्टवान्। तदा शान्तनुतनयः सः भीष्मपितामहः सभसम्मतं सर्वजनमनोमोदनं वचनमेव वक्तुम् आरभत। हे राजन्! भवान् कर्तव्यविषयाणामनुपालने सर्वथा निष्णातः विज्ञाता च वर्तते। तथापि समये समये वृद्धजनानां धर्मज्ञानां गुरूणां परामर्शं स्वीकर्तुम् अपि न कदापि शक्यते। अतः मम वचनमिदं भवान् शृणोतु। यागानुष्ठानसमये शास्त्रानुसारं षड् जनाः अर्घदानाय योग्याः इत्युल्लिखिताः ।ते यथा-स्नातकः, गुरुः, इष्टबन्धुः, याजकः, जामाता, राजा इति-

'स्नातकं गुरुमभीष्टमृत्विजं संयुजा च सह मेदिनीपतिम्।
अर्घभाज इति कीर्तयन्ति षट् ते च ते युगपदागताः सदः'।। (१४.५५)

एतन्मतं विहाय अन्यदपि मतान्तरम् अत्र द्रष्टुम् उपलभ्यते यत् पूर्वोक्तानां षण्णाम् अपि गुणान् कर्मणि च स्वगुणैः कर्मभिश्च यः अतिशेते, सः अर्घदानाय योग्यतमः। मम तु मते अस्मिन् समस्ते अपि संसारे ब्राह्मणानां क्षत्रियाणां च समवाये श्रेष्ठतमः, लोककण्टकानां कंसजरासन्धादीनां राक्षसानां निषुदनः, समस्तशिष्टजनानां परमसहायकः, समस्त-कल्याणगुणाकरः एकः एव भगवान् श्रीकृष्णः अर्घदानाय सर्वथा योग्यतमः दृश्यते। प्रसङ्गेऽस्मिन् भीष्मपितामहः भगवतः विष्णोः

विविधानां रूपाणामपि वर्णनं कृत्वा, सर्वान्ते श्रीकृष्णस्यैव प्रशंसया स्वकीयं वचनं परिसमापयति। एवं प्रकारेण भीष्मस्य वचनं श्रुत्वा राजा युधिष्ठिरः विधिवत् महता सम्मानेन भक्तिभावेन च श्रीकृष्णाय अर्घदानं सकलसामन्तराजानां समक्षे कृतवान्।

१२.१३ शिशुपालवधमहाकाव्ये शिशुपालकृता कृष्णनिन्दा

यदा युधिष्ठिरः श्रीकृष्णाय प्रथममेव अग्रदानं समर्पितवान् तदा तत्रैव सभायां वर्तमानः शिशुपालः तेन अग्रपूजनेन असहिष्णुः सन् महता क्रोधेन श्रीकृष्णम्, युधिष्ठिरादिपाण्डवान्, भीष्मं च कटुवचनैः निन्दितिं आरब्धवान्। शिशुपालकृतनिन्दनक्रमः यथा-

'यदपूपुजस्त्वमिह पार्थं मुरजितमपूजितं सताम्।
प्रेम विलसति महत्तदहो दयितं जनः खलु गुणोति मन्यते'।।

हे युधिष्ठिर! वस्तुतः अयं कृष्णः सर्वथापि अयुज्यः। तादृशस्य पूजनं नितान्तम् आश्चर्यजनकम् अस्ति।पुनश्च तव एतत् 'धर्मराज' इति अभिधानम् असत्यम् अस्ति। राजयोग्यम् एतद् अग्रपूजनं राज्याभिषेकादिसंस्कारविहीनाय अराजाय कृष्णाय कृत्वा अधर्मम् आचरितवान्। भवतां सर्वेषामपि कृष्णः यदि परमपूजनीयः एव अभिमतः तर्हि अस्माकं सर्वेषाम् अपि अपमाननं कर्तुम् एवात्र किमर्थम् आहूतवान्तः ? तत्पश्चात् शिशुपालः श्रीकृष्णं निन्दितुम् उपक्रामति-

हे कृष्ण! राजभिः प्राप्तुं योग्यमिदम् अग्रपूजनं त्वया राज्यलक्षणविहीनेन सुतरां प्राप्तुं अयोग्यम्। त्वं स्वयमेव आत्मनिरीक्षणं करोतु यदहं राजा उत न वा इति। पुनश्च अग्रपूजनं इदं प्राप्तुम् अहं योग्यो वा न वा इति-

'प्रतिपत्तुमङ्ग घटते च न तव नृपयोग्यमर्हणम्।
कृष्ण कलय तनु कोऽहमिति स्फुटमापदां पदमतात्मवेदिता'।।

पुनश्च अग्रपूजनम् इदं प्राप्तुम् अहं योग्यो वा न वा इति। मधुजालकं प्रकृत्या लोके वृथा 'मधुसूदन' इति कीर्तिं प्राप्तवान् असि। जरासन्धः बहुधापि तव पराक्रमस्य विनाशं कृतवान्। पुनश्च बलरामेण तव अग्रजेन सह नित्यं भवसीति कारणादेव लोके बलवान् इति कीर्तिमपि वृथा प्राप्तवान्। लोके तव 'सत्यप्रियः' इति नाम बहुधा स्तूयते। वस्तुतः त्वं कदापि सत्यस्य धर्मस्य प्रियः न भवसि एव, अपि तु नित्यं तव जायया सत्यभामया सञ्चरसि इति हेतोः एव लोके सत्यप्रियः इति तादृशम् असत्यं यशः प्राप्तवान्। अयं कृष्णः अन्यतमः अल्पे एव वयसि शकटासुरं संहतवान्, यमलार्जुनयोः गर्वभङ्गं कृतवान् गोवर्धनपर्वतस्य उद्धारं कृतवान् इति बहुविधानि सत्यानाशी लोके केचन मूढाः पापरजनाः प्रचारयन्ति। अस्य सर्वगुणविहीनस्य सर्वपण्डितविर्गहितस्य सकलदोषाकरस्य कृष्णस्य अग्रपूजनं केशविहीनस्य मस्तकस्य कङ्कतसंवाहनम् इव सर्वथा निरर्थकम् एव।

'पृथिवीं बिभर्थ यदि पूर्वमिदमपि गुणाय वर्तते।
भूमिभृदिति परहारितभूस्त्वमुदाह्रियस्व कथमन्यथा जनैः'।।

शिशुपालः पुनः तत्र सभायां उपस्थितान् नरपतीन् उद्दिश्य वक्तुम् आरब्धवान्- अयं

कृष्णः दुर्बद्धिः पूतनायां नाशे इति भावनां न कृतवान्, पुनश्च सा हतं निजस्तन्यम् अपि पायितवती, तेन वा कारणेन अवश्यं मातृसमाना सा अस्य भवति, तादृश्यां मातृसमानायां पूतनायां किञ्चिदपि दयाम् अकृत्वा अयं पापो तां मारितवान् इति।

१२.१४ शिशुपालवधे श्रीकृष्णं प्रति शिशुपालप्रेरितस्य दूतस्य संवादः

यदा राजसूययागे युधिष्ठिरः श्रीकृष्णाय अग्रपूजन् समर्पितवान् तदा शिशुपालः सभास्थलात् बहिः निर्गत्य निजशिविरं गतवान्। तस्य समर्थकाः सर्वेऽपि राजानः तमेव अनुसरन्तः बहिः गतवन्तः। रणार्थं सर्वेऽपि सैनिकाः सकलाश्च नरेशाः कवचखड्गादिसाधनानि स्वीकृत्य सज्जाः भवन्ति स्म। युद्धस्य सन्नाहानन्तरं शिशुपालः स्वपक्षतः दूतमेकं श्रीकृष्णस्य समीपे प्रषितवान्। सः दूतः श्रीकृष्णाय शिशुपालस्य लक्ष्यद्वययुक्तं सन्देशं श्रावयति। एवं प्रकारेण दूतेन श्रीकृष्णाय अर्थद्वयुक्तः सन्देशः श्रावितः- मम स्वामी शिशुपालः भवतः (श्रीकृष्णस्य) प्रथमपूजायाः अवसरे भवन्तम् अप्रियवचनैः यत्किमपि उक्तवान् इति मनसि अत्यन्तं पश्चात्तापम् अनुभवति। (समायां तव प्रथमपूजादर्शनेन नितरां क्रुद्धः मम स्वामी शिशुपालः केवलं त्वया निन्दावचनैः एव किमर्थं त्यक्तवान् इति तत्रैव तव हननं किमर्थं न कृतवानिति मनसि पश्चात्तापम् अनुभवन्ति)

'अभिधाय तदा तदप्रियं शिशुपालोऽनुशयं परं गतः।

भवतोऽभिमनाः समीहते सरुषः कर्तुमुपेत्य माननाम्'।। (१६.२)

शिशुपालः स्वपक्षीयैः नरपतिभिः सह शीर्षम् अवनम्यस्य भवन्तं प्रणमति। पुनः भवदीयम् आदेशं शिरसि धारयितुम् इच्छति। शिशुपालः स्वपक्षीयैः नरेशैः सह सम्भूय भवन्तं शिरच्छेदनपुरस्सरम् अत्यन्तं कठोरतया दण्डयितुं सन्नद्धः अस्ति।

'जनतां भयशून्यधोः परैरभिभूतामवलम्बसे यतः।

तव कृष्णः गुणास्ततो नरैरसमानस्य दधत्यगण्यताम्'।। (१६.६)

भवान् अग्निना सूर्येण सह समानतेजस्वी वर्तते, भवतः आदेशं सर्वेऽपि राजानः पालयन्ति। (अग्नौ पतिपस्य पतङ्गस्य या दुर्दशा भवति, तादृशीं दुर्दशा शिशुपालः स्वमित्रैः सह मिलित्वा त्वां प्रापयितुम् इच्छति)।

दूतस्य वचनं श्रुत्वा सात्यकिः दूतम् उत्तरं ददाति स्म। सात्यकेः वचनानि श्रुत्वा क्रोधेन सः दूतः श्रीकृष्णस्य घोरतरं निन्दनं कुर्वन् युद्धे अवश्यं शिशुपालस्यैव विजयम् उद्घोषयन्, यादवैः सह श्रीकृष्णस्य समूलनाशः युद्धे भविष्यतीति तर्जयन्, यादवस्त्रियः पतीनां मरणेन विधवाः भविष्यन्ति इति भत्पर्यन्, अतः युद्धेन यूयं विनाश्यम् अवश्यं प्राप्स्य मम स्वामी अवश्यं जेष्यते इति भविष्यवाणीं कुर्वन् एतादृशैः वचनैः दूतः अतिनिष्ठुरं स्वसन्देशं कृष्णस्य पुरतः उपस्थापितम्-

'विनिहत्य भवन्तमूर्जितश्वीर्युधि सद्यः शिशुपालतां यथार्थम्।

रुदतां भवदङ्गनागणानां करुणान्तः करणः करिष्यतेऽसौ'।। (१६.८५)

१२.१५ श्रीकृष्णस्य सैन्येन सह शिशुपालसैन्यस्य मेलनम्

शिशुपालवधस्य अष्टादशसर्गे श्रीकृष्णस्य सैन्येन सह शिशुपालसैन्यस्य मेलनम् इत्थं वर्णितमस्ति- श्रीकृष्णस्य शिशुपालस्य च उभयपक्षयोः सेनयोः चतुरङ्गदलेषु स्थिताः पदातिसैनिकाः पदातिसैनिकैः, अश्वारोहकाः अश्वारोहकैः, गजारोहकाः गजारोहकैः, तथा रथारूढाः रथारूढैः, सैनिकैः सह मिलन्ति स्म । रणभेरीणां गम्भीरध्वनिः रथानां चक्रधाराध्वनिः गजानां बृंहणध्वनिः, तथा अश्वानां हेषितध्वनिः, एते सर्वेऽपि ध्वनयः परस्परं मिलित्वा एकम् अव्यक्तं तुमुलं ध्वनिम् उद्भावयन्ति स्म-

'रथ्याघोषैर्बृंहणैर्वारणानामैक्यं गच्छन् वाजिनां ह्रेषया च।
व्योमव्यापी सन्ततं दुन्दुभीनामव्यक्तोऽभूदीशितेव प्रणादः'।। (१८.३)

धनुर्धारिणः सैनिकाः स्वकीयं धनुर्वर्तुलाकारेण नमयित्वा टङ्कारध्वनिं कुर्वन्ति स्म। केचित् परस्परविरोधपक्षयोः सैनिका महता क्रोधेन आवेशेन च वेगेन परस्परम् अभिमुखम् आधावन्तौ सन्तौ स्वकीयानि सर्वाणि शस्त्राणि भूमौ पातयित्वा परस्परं करग्रहणं कृत्वा मल्लौ इव मुष्टिघातान् कुर्वन्तौ युद्धे प्रवृत्तौ आस्ताम्। परस्परं द्वयोः अपि सैन्ययोः अभितः मेलनेन को वा जनः स्वकीयः, को वा परकीयः इति ज्ञातुं तत्र महान् क्लेशः अजायतः। कश्चन गजः शत्रुगजस्य शरीरे लग्नं स्वकीयं कठोरं दण्डं शीर्षस्य बहुवारककम्पनेन सह महता कष्टेन बहिः उन्नयति स्म। रक्तेन प्रसिक्ताः गजानां स्थूलदन्ताः समुद्रे उत्पन्नानां प्रवालमणीनाम् अङ्कुरसदृशाः एव प्रतिभाति स्म। कश्चिद् अन्य गजः कश्चिद् वीरं काष्ठवत् शरीरमध्याद् उच्छिन्नं करोति स्म-

'व्याप्तं लोकेदखलभ्यापसारं संरम्भित्वादेत्य धीरो महीयः।
सेनामध्यं गाहते वारणः स्म ब्रह्मीव प्रागादिदेवोदरान्तः'।। (१८.४०)

रणक्षेत्रे समन्ततः प्रवहतः रुधिरधारासारस्य निरन्तरम् आघ्राणेन अत्यन्तं प्रमत्तः कश्चन गजः परितः परिदृश्यमानान् सर्वानपि जनान् मत्कुणान् इव चरणैः मृदाति स्म। शत्रोः तीक्ष्णबाणेन छिन्नेन स्वकण्ठेन कश्चन सैनिकः राहुः इव दृश्यते स्म। रणाङ्गणे प्रवहत्सु रुधिरह्रदेषु संसिक्ताः नरपतीनां मुक्ताहाराः रूधिरधाराभिः सिक्ताः यमराजस्य हन्ता इव प्रतिभाति स्म। युद्धक्षेत्रे प्रवहन्ती रूधिरधारा यमराजस्य अन्तःपुरकान्तानाम् उत्तरीयवस्त्ररञ्जनार्थं निहितः कुसुम्भकुसुमस्य रक्तरागः इव भाति स्म। रूधिरप्रवाहेषु वीराणां कमलसदृशानि मुखानि अप्लवन्ते स्म। गगने मांसभक्षिणः कङ्कगृध्रादयः पक्षिणः युद्धगतानां सैनिकानां निहतशरीराणां मांसानि भक्षितुं वारं वेदम् उड्डयन्ते स्म-

'नैरन्तर्यच्छिन्नदेहान्तरालं दुर्भक्षस्य ज्वालिना वाशितेन।
योद्धर्बाणप्रोतमादीप्य मांसं पाकापूर्वस्वादमादे शिवाभिः'।। (१८.७६)

इति शम्।।

১২.১৬ অধ্যায়স্য অসমীয়া ভাষায়াং সারাংশ:

টা সর্গযুক্ত মহাকবি মাঘৰ বিৰচিত শিশুপালবধ মহাকাব্যখন সংস্কৃত সাহিত্যৰ বৃহৎত্রয়ীৰ অন্তর্গত। যুধিষ্ঠিৰে অনুষ্ঠিত কৰা ৰাজসূয় যজ্ঞত শ্রীকৃষ্ণৰ দ্বাৰা শিশুপালবধেই হৈছে কাব্যখনৰ মূল প্রতিপাদ্য। মাঘে শিশুপালবধৰ কথাভাগ মহাভাৰতৰ সভাপর্ব্ব ☎পৰা গ্রহণ কৰি স্ব - কাব্যপ্রতিভাৰে অতি সুন্দৰভাৱে বর্ণনা কৰিছে। শিশুপালবধৰ সর্গসমূহৰ নাম এনেধৰণৰ— কৃষ্ণনাৰদসম্ভাষণম্, মন্ত্রবর্ণনম্, পুৰীপ্রস্থানম্, ৰৈৱতকবর্ণনম্, সেনানিৰেশঃ ঋতুবর্ণন, বনবিহৃৰ, জলবিহৃৰ, প্রদোষবর্ণন, সুৰত বর্ণনম, প্রভাতবর্ণনম, প্রযাণবর্ণনম, শ্রীকৃষ্ণসমাগমঃ বৃষ্ণার্ঘদানম, অপশকুনাবির্ভাৱ, দূতসংবাদ, সাদ্যুদ্যোগশংসাভ, সঙ্কুলযুদ্ধবর্ণনম, যুদ্ধবর্ণনম্, শিশুপালবধম্।

মহাকাব্যখনৰ প্রথম সর্গত শিশুপালক বধ কৰিবৰ বাবে ইন্দ্রই শ্রীকৃষ্ণক দিয়া বার্তা নাৰদৰ দ্বাৰা শ্রীকৃষ্ণক কথন, দ্বিতীয় সর্গত কৃষ্ণ, বলৰাম আৰু উদ্ধৱৰ মন্ত্রণা, তৃতীয় সর্গত শ্রীকৃষ্ণৰ ইন্দ্রপ্রস্থগমন, সাগৰৰ বর্ণনা, চতুর্থ সর্গত ৰৈৱতকপর্বতৰ বর্ণনা, পঞ্চম সর্গত সৈন্যশিৰিৰৰ বর্ণনা, ষষ্ঠ সর্গত ঋতুসমূহৰ বর্ণনা, সপ্তম সর্গত বনবিহাৰ বর্ণনা, অষ্টম সর্গত জলক্রীড়াবর্ণনা, নৱম সর্গত চন্দ্রোদয়, শৃঙ্গাৰ আদিৰ বর্ণনা, দশম সর্গত যাদৰ দম্পতীসকলৰ কাম-ক্রীয়া বর্ণনা, একাদশ- সর্গত প্রভাতবর্ণনা, দ্বাদশ সর্গত শ্রীকৃষ্ণৰ অন্তর্ভুক্ত। প্রস্থান আৰু যমুনা নদীৰ বর্ণনা, ত্রয়োদশ সর্গত শ্রীকৃষ্ণ আৰু পাণ্ডৱসকলৰ সমাগমৰ বর্ণনা, চর্তুদশ সর্গত ৰাজসূয় যজ্ঞত কৃষ্ণক প্রথম অর্ঘপ্রদানৰ বর্ণনা ষোড়শ সর্গত দূতসংবাদ, সপ্তদশ সর্গত যুদ্ধযাত্রা, অষ্টাদশ, ঊনবিংশ আৰু দশম সর্গত শ্রীকৃষ্ণ আৰু শিশুপালৰ সৈন্যবাহিনীৰ মাজত হোৱা যুদ্ধৰ বর্ণনা আৰু কৃষ্ণৰ তেওঁৰ সুদর্শন চক্রেৰে শিশুপালক বধ কৰাৰ কথা বর্ণনা কৰা হৈছে।

এই কাব্যখন যদিও বীৰৰস প্রধান কাব্য ওথাপিও কাব্যখনত শৃঙ্গাৰৰসৰ সুন্দৰ প্রয়োগ হোৱা দেখা যায়। বিবিধ অলঙ্কাৰ আৰু ছন্দৰ সুপ্রয়োগ কাব্যখনত কৰা দেখা হৈছে। কাব্যখনৰ প্রথম সর্গত বংশস্থবিল, দ্বিতীয় সর্গত অনুষ্টুপ, তৃতীয় সর্গত উপজাতি, পঞ্চম সর্গত বসন্ততিলক, ষষ্ঠ সর্গত দ্রুতবিলম্বিত ছন্দৰ সুপ্রয়োগ দেখা পোৱা যায়। এই কাব্যখনত উপমা, অর্থগৌৰৱ আৰু পদলালিত্যক সুন্দৰ উপস্থাপন দেখি পণ্ডিতসকলে কবিৰ গুণানুকীর্তন এনেদৰে ব্যক্ত কৰিছে —

উপমা কালিদাসস্য ভাৰবেৰর্থগৌৰৱম্।
দণ্ডিণঃ পদলালিত্যং মাঘে সন্তি ত্রয়ো গুণাঃ।। ইতি



১২.১৭ অধ্যায়াত্ কিমবগতম্

অধ্যায়াত্ বয়ং নিম্নোক্তবিষয়া: জ্ঞাতবন্ত: -

- महाकविमाघस्य जीवनवृत्तान्तं ज्ञातवन्तः।
- शिशुपालवधमहाकाव्यस्य संक्षिप्तं वृत्तान्तं ज्ञातवन्तः।
- शिशुपालवधे सन्निविष्टानां विभिन्नानां रसानां विषये ज्ञातवन्तः।
- शिशुपालवधे अलंकारप्रयोगशैल्याः विषये ज्ञातवन्तः।
- शिशुपालवधमहाकाव्यस्य काव्यिकसौन्दर्यस्य विषये ज्ञातवन्तः।



१२.१८ ज्ञानाधिक्यम्

१) Sarma, Dr. Thaneswar, sanskrit Sahityar itivritta, Chandra Prakash, Panbazar, Guwahati.

२) Dev Goswami, Haramohan (1st published, 1977) Sanskrit Sahityar Burranji, Book Land, Guwahati-1.

३) Sharma, R.S, Advent of the Aryans in Indians in India, Monohar publishers, Delhi- 2003.

४) Winterritz, M., History of Indian Literature. (Eng. Tr. V.S. Sharma), 3 vols, Delhi-1983.

५) De, S.K. and Dasgupta, History of Sanskrit Literature, Vol. 1. Calcutta-1980.

६) Sastri, Gaurinath, A Concise History of classical Sanskrit Literature, Motilal Banarsidass, Delhi, Varanasi.

७) दाहालः, आचार्य लोकमणि (१९९९) संस्कृतसाहित्येतिहासः, कृष्णदास अकादमी, वाराणसी.

८) मिश्र, आचार्य रामचन्द्र (२००३) संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन।

९) तेलङ्ग, श्री कान्तानाथशास्त्री, शिशुपालवधम्, चौखम्बा अमरभारती प्रकाशन, वाराणसी-२.



१२.१९ अभ्यासप्रश्नाः

प्रश्नः १: 'शिशुपालवधम्' कीदृशं काव्यमस्ति ?

प्रश्नः २: 'शिशुपालवधम्' इति काव्यस्य कविः कः ?

प्रश्नः ३: शिशुपालवधे कति सर्गानि सन्ति ?

प्रश्नः ४: शिशुपालवधस्य भाषा-शैली चाधिकृत्य नातिदीर्घः प्रबन्धः विरच्यताम्।

प्रश्नः ५: शिशुपालवधे अलंकारप्रयोगशैल्या : पर्यालोच्यताम्।

प्रश्नः ६: 'माघे सन्ति त्रयो गुणाः' इति वचनस्य तात्पर्यं विशदीक्रियताम्।

प्रश्नः ७: महाकाव्यकाररूपेण माघस्य परिचयं देय।

प्रश्नः ८: अधोलिखितेषु विषयेषु निबन्धः विरच्यताम्-

(क) मेघे माघे गतं वयः

(ख) नवसर्गगते माघे नवशब्दो न विद्यते।

*** ***** ***

अध्यायः १३ : नैषधचरितम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

१३.१ उद्देश्यम्

१३.२ परिचयः

१३.३ नैषधचरिते नलचरितम्

१३.४ नैषधचरितस्य कथावस्तुः

१३.५ नैषधंविद्वदौषधम् / नैषधेपदलालित्यम्

१३.६ नैषधे रसाभिव्यक्तिः

१३.७ नैषधचरितस्य टीका / भाष्यः

१३.८ नैषधचरते नलचरितम

१३.९ नैषधचरितस्य प्रथमसर्गस्य कथावस्तुः

१३.१० नैषधचरिते दमयन्तीं प्रति नलस्य उक्तिम्

१३.११ नैषधर्चारते नलस्य अवदान्यत्वम्

१३.१२ नैषधमहाकाव्ये उपवनवर्णनम्

१३.१३ अध्यायस्य असमीया भाषायां सारांशः

१३.१४ अध्यायात् किमवगतम्

१३.१५ ज्ञानाधिक्यम्

१३.१६ अभ्यासप्रश्नाः

१३.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् –

१. अनेन अध्यायेन महाकवि श्रीहर्षप्रणीतं नैषधचरितम् इति महाकाव्यस्य विषये सम्यग् रूपेण ज्ञातुं शक्यते।

२. 'नैषधचरिते पदलालित्यम्' इति विषयमधिकृत्य श्रीहर्बस्य काव्यशैलीम् अवगन्तुं शक्यते।

३. नैषधचरिते अलंकारप्रयोगशैल्याः विषये अवबोधनं भवति।

४. नैषधचरितस्य विभिन्नानि टीकाभाष्याणि विषये अपि अवबोधनं भवति।

१३.२ परिचयः

संस्कृतसाहित्यजगति काव्यस्य द्वौ प्रकारौ स्तः दृश्यकाव्यं श्रव्यकाव्यञ्च। दृश्यकाव्येषु अभिनयादिमाध्यमेन काव्यस्य विषयवस्तुं ज्ञातुं शक्यते। श्रव्यकाव्ये श्रवण- पठनादिमाध्यमेन काव्यस्य विषयवस्तुं ज्ञातुं प्रभवति। श्रव्यकाव्यस्य पुनः त्रयो विभागाः सन्ति – महाकाव्यं, खण्डकायं, चम्पूकाव्यञ्चेति। महाकाव्येषु यथा रघुवंशम्, शिशुपालवधम्, कुमारसम्भवम्, किरातार्जुनीयम्,

नैषधीयचरितम् च। खण्डकाव्यं यथा मेघदूतम् ऋतुसंहारञ्च। चम्पूकाव्यं यथा नलचम्पूः, पारिजातहरणचम्पूश्च।

अस्मिन् त्रयोदश अध्याये अस्य काव्यस्य सामान्यपरिचयः प्राप्यते। अस्मिन् अध्याये अस्य काव्यस्य सामान्यपरिचयेन सह कवेः श्रीहर्षस्य परिचयम्, अस्य महाकाव्यस्य प्रतिसर्गानां विषयवस्तुनां संक्षिप्तः परिचयः प्राप्यते।

१३.३ नैषधचरते नलचरितम्

नैषधश्चरितस्य प्रणेता आसीत् महाकवि श्रीहर्षः। तस्य पिता श्रोहीरस्तथा माता च मामलदेवी आस्ताम्। तथ्यमिदं नैषधचरिते स्वयमेव महाकविना उक्तम् –

श्रीहर्षः कविराजराजिमुकुटालङ्कारहीरः सुतः।

श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।

श्रीहीरः काशोवासिनो गढवालवंशोद्भवस्य विजयचन्द्रस्य सभापण्डित आसीत्। शब्दार्थे केनापि विदुषा जितः श्रीहीरो मरणसमये स्वजेतारं पण्डितं पराजेतुं स्वसुतं श्रीहर्षं कथितवान्। तदाज्ञावशवर्ती श्रोहर्षो गङ्गातीरे चिन्तामणिमन्त्रजपं कृत्वा विशिष्टां प्रतिभां प्राप।

लब्धवैदुष्यश्चासौ विजयचन्द्रस्य सभां प्रविश्य निम्नलिखितं श्लोकं प्रपाठ –

गोविन्दनन्दनतया च वपुः श्रिया च मास्मिन्, नृपे कुरुत कामधियं तरुण्यः।

अस्त्रोकरोति जगतां विजये स्मरः स्त्रोरस्त्रोजनः पुनरनेन विधीयते स्त्रो॥

एतत्कृतीनां कश्मीरेषु महती प्रतिष्ठाऽऽसोत्, प्रसिद्धिरिमं मम्मटभागिनेयं समर्थयति।

कान्यकुब्जाधीश्वरस्य जयचन्द्रस्य सभाऽनेनालङ्कृता। तदुक्तमनेनैव –

'ताम्बूलहयमासनं च लभते यः कान्यकुब्जेश्वरात्' इति।

जयचन्द्रपितुर्विजयचन्द्रस्य प्रशंसायां विजयप्रशस्तिनामा ग्रन्थोऽनेन लिखितः।

जयचन्द्रो गढवालवंश्यो राजा आसीत्। एकादशे द्वादशे च ईसवीयशतके अस्य वंशस्योत्तरभारते प्रचुरः प्रभाव आसीत्। विजयचन्द्रजयचन्द्रौ मिलित्वा ११५६ ईसवीतः ११९३ ई. पर्यन्तं राज्यं चक्रतुः। अतो हर्षस्य स्थितिकालो द्वादशशतकोत्तरार्धभागो मन्यते।

महाकवि श्रीहर्षः बहुनि ग्रन्थानि विरचितानि अभवत्। तानि यथा–

(१) स्थैर्यविचारणप्रकरणम= दार्शनिकग्रन्योऽयं प्रायः क्षणभङ्गवादखण्डनपरः।

(२) विजयप्रशस्ति–जयचन्द्रपितुर्विजयचन्द्रस्य प्रशंसापरक काव्यम्।

(३) खण्डनखण्डखाद्यम् – स्वनामरख्यातोऽनिर्वचनीयतासर्वस्वभूतो वेद्रान्तग्रन्थः।

(४) गौडीर्वीशकुलप्रशस्तिः – वङ्गीयस्य कस्यचिद्राज्ञः स्तुतिपरं काव्यम्।

(५) अर्णववर्णनम् – स्वनामख्यातम्।

(६) छिन्दप्रशस्तिः – अज्ञातपरिचयस्य कस्यापि राज्ञो वर्णनपरोऽयं ग्रन्थः स्यात्।

(७) शिवशक्तिसिद्धिः – शिवशक्त्योरूपासनाग्रन्योऽयं सम्भाव्यते।

(८) नवसाहसाङ्कचरितचम्पूः - नाम्नैव विषयः स्वरूपञ्च आख्यायेते।

(९) नैषधीयचरितम्।

१३.४ नैषधचरितस्य कथावस्तुः

श्रीहर्षस्य नैषधचरितम् इति नामधेयस्य काव्यः तस्य प्रसिद्धा कृतिः। काव्यकौशलोत्कर्षेण नैषधचरितं बृद्धत्रयीषु सर्वोत्कृष्टं विद्यते। अस्मिन् ग्रन्थे द्वाविंशति सर्गाः च २८३० श्लोकाः सन्ति। निषधदेशीयराज्ञः नलस्य विदर्भदेशीयराजकुमारीदमयन्त्या सह प्रेमकथा एव अस्य महाकाव्यस्य कथावस्तुः। एतावतापि ग्रन्येन नलचरितैकदेश एव वर्ण्यते। अत एव केचित्तु ग्रन्यमिमं अपूर्णलब्धमाहुः। नलश्रोवर्णनादारब्धमिदं महाकाव्यं नलदमयन्तीः सुखसङ्गमं प्राप्य विश्राम्येति। लीलया दमयन्तीस्मृतिदयमानमनोविनोदाय निस्कूटेषु विहारार्यं गतो नलः एवं स्वर्णमयं हंसं पश्यति गृह्णाति च तम्। हंसः स्वामवस्थां विनिवेद्य न मोचनाय प्रार्थयते प्रतिजानीते च दमयन्तीसन्देशश्रावणेन तद्रुपकारमोचनाय। हंसस्यावस्था यथा -

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां करुणा रुणद्धि नो॥

राजा सदयं मोचितो हंसस्तत्प्रत्युपकाराय भोजनगरीं गत्वा दमयन्त्यं तत्प्रेमविवरणं श्रावयति। तेन दमयन्त्यां पूर्वराग उत्पद्यते। काले दमयन्त्याः पिताविदर्भराजः दमयन्त्याः स्वयम्वरसभा आयोज्यते। तत्र दमयन्त्यामासक्तां नलरूपं धृत्वा तत्रागच्छन्ति चत्वारो दिक्पालाः। धृतनलस्वरूपः इन्द्र -यम- वायु- कुबेराः पञ्चमो नलश्चेति। सर्वेषां समरूपतया दृष्ट्वा दमयन्ती विचित्रां दशां प्रपद्यते।

सभावर्णनाय समागता सरस्वती श्लेषवर्णनया दमयन्त्यों व्यामोहयति निर्दिशति वा। अवसाने दमयन्त्याः पातिव्रत्येन दृढानुरागेण च प्रीता देवाः स्वानि विशिष्ट चिह्नानि प्रकटीकुर्वन्ति यैः नलः परिचितो च भवति। जाते पाणिग्रहे कलिप्रवेशो मुखमुद्रणं च तस्य भवति। नलदमयन्योः सुखसङ्गमेन च ग्रन्थः समाप्यते।

१३.५ नैषधं विद्वदौषधम् / नैषधे पदलालित्यम्

नैषधमहाकाव्यमनुपमवैदुष्यवैभवाविभावत् पाण्डित्यपुटपरिपाकप्रतीकाशः प्रतीयते। नैकशास्त्रनिष्णातस्यानुपहता गतिरत्रेति 'नैषधं विद्वदौषधम्' इत्युद्घोष्यते यशोऽस्य सुधिभिः। नैषधे पदानां विन्यासः सर्वेषां सहृदयानां हृदयं विलोभयति। पदलालित्यस्य निदर्शनं दिङ्मात्रं द्रष्टव्यमत्र- 'शृगारभृङ्गारसुधाकरेण यर्णस्त्रज्ञानूपय कर्णकूपौ' 'नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे' 'सकलया कलया किल द्रष्ट्या समवधाय यमाय विनिर्मितः' 'दिने दिने त्वं तनुरेधि रेऽधिकं पुनः पुनर्मूबर्च्छछ तापमृच्छ च' इत्यादयः। एवं च नैषधे महाकाव्ये पदलालित्यस्याधिक्यं दृश्यते।

नैयायिकस्याऽपि कवेरस्य सरला सरसा च वर्णनाचातुरी प्रशंस्या विद्वन्मनोविनोदनक्षमा च दृश्यते। स स्वयमेव कथयति –

साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्नन्थिले तर्के वा मम संविधातरि समं लीलायते भरती।

शय्या वाऽस्तु मृदुत्तरच्छदवती दर्भाङ्कुरैरास्तृता भूमिर्वा हृदयङ्गमो यदि पतिस्तुल्या रतिर्योषिताम्॥

श्रीहर्षः स्वीयस्य शास्त्रज्ञानस्य परिचयं प्रतिसर्गं ददाति,परन्तु सप्तदशसर्गे तु तेन स्वीयं नास्तिकास्तिकसकलदर्शनप्रवीणत्वं व्याकरणनिष्णातत्वं च सडिण्डमनादं घोषितम् –

देवश्चादस्ति सर्वज्ञः करुभागवन्ध्यवाक्।

तत्किं वागव्ययमात्रान्नः कृतार्थयति नार्थिनः॥

न मृतस्य पुनर्जन्म इति चार्वाकमतस्योदाहरणम् –

कः शमः क्रियता प्राज्ञाः प्रियाप्रीतौ परिश्रमः।

भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।

भोगोपभोगार्थं शरीरमिदम् –

सुकृते वः कथं श्रद्धा सुरते च कथं न सा। तत्कर्म पुरुषः कुर्यात् येनान्ते सुखमेधते॥

अत्र वेदान्तसिद्धान्तस्यापि वर्णनं दृश्यते। अनेन अस्प वेदान्तदर्शनस्य ज्ञानं प्रतीयते। अद्वैतवादस्य तात्त्विकत्त्वं यथा–

श्रद्धां दधे निषधराड् विमतौ मतानाम्। अद्वैततत्त्व इव सत्यतरेऽपि लोकः।

ब्रह्मसाक्षात्कारस्य वर्णनं कीदृशं विद्यतेऽत्र –

'प्राप्तुस्तमेकं निरुपाख्यरूपं ब्रह्मेव चेतांसि यतव्रतानीम्'।

सांख्यदर्शने प्रपञ्चितस्य सत्कार्यवादस्य प्रतिपादनं महाकविना कृतमत्र – 'नास्ति जन्यजनकव्यतिभेदः।' देवनामरूपत्वं मन्त्ररूपत्वञ्च मीमांसासिद्धान्तानुसारं प्रतिपादितं कविनाऽत्र–

'विश्वरूपकलनादुपपन्नां तस्य जैमिनिमुनित्वमुदीये'।

श्रुतीनां प्रामाण्यविषये मोमांसकानां मतं व्यवस्थापितं दृश्यते –

'श्रुति श्रद्धस्व विक्षिप्ताः प्रक्षिप्तं ब्रूथ च स्वयम्।

मीमांसामांसलप्रज्ञास्तां यूपद्विपदापिनीम्॥'

जैनाभिमतरत्नत्रस्य प्रतिपादनं जैनसिद्धान्तानुसारं कृतम् –

न्यवेशि रत्नत्रितये जिनेन यः सः धर्म चिन्तामणिरुज्झितो यया॥

कापालिकोपानलभस्मनः कृते तदेव भस्म स्वकुले स्तृतं तया।।

बौद्धाभिमतस्य शून्यवादस्य विज्ञानवादस्य साकारतावादस्य च बौद्धदर्शनानुसारं प्रतिपादनं दृश्यते–

या सोमसिद्धान्तमयानेव शून्यात्मतावादमयोदरेव।

विज्ञानसामस्त्य मयान्तरेव। साकारतासिद्धिमयाखिलेव॥

न्यायसिद्धान्ताभिमतस्य मोक्षस्य परिहासः कृतः महाकविना -

मुक्तये च शिलात्वाय शास्त्रमूचे सचेतसाम्। गोतमं तमवेक्षैव मया वित्थ तथैव सः॥

अत्र अपदं न प्रयुञ्जीत् इत्यस्य वर्णनं व्याकरणस्यैव विषयः।

'अपवर्गे तृतीयेति भणितः पाणिनेरपि' अत्र अपवर्गे तृतीया सूत्रस्य वर्णनं प्रतिपादितम्। 'किं स्थानिवद्भवमधत्त दुष्टं तादृक्कृत व्याकरणः' इत्यत्र 'स्थानिवदादेशो' सूलस्य वर्णनं विद्यते।

यद्यपि प्रकरणविशेषे श्रीहर्षे तत्पूर्ववर्तिनां कवीनां प्रभावस्पष्टमेव दृश्यते यथा इन्दुमतीस्वयंवरस्य दमयन्तीस्वयम्वरे तथापि तस्य मौलिकी पद्धतिस्तु न केनाऽप्यपलपितुं शक्यते। कथ्यते हि कालिदासस्योपमाच्छटा भारवेरर्थगाम्भीर्यवैलक्षण्यं दण्डिनः कोमलकमनीयपदावली च सन्ति माघे किन्तु

'उदिते नैषधे काव्ये क्व माघः क्व च भारविः'

१३.६ नैषधचरिते रसाभिव्यक्तिः

श्रीहर्षस्य कवितायां नारीस्वरूपस्य वर्णनमतीव सजीवम्। तथैव चतुर्थसर्गगतं विप्रलम्भ शृंगारवर्णनमपि सर्वानतिशेते। समालोचकाः आमनन्ति यत् श्रीहर्षो हि संस्कृतसाहित्यस्य वरेण्यकविष्वन्यतमः। तस्य हि पाण्डित्यं, प्रस्तुतियोग्यता, व्युत्पत्तिश्च सर्वानेव कवीनतिशेते। अस्य हि भाषासौन्द्रर्यं भावसौष्ठवक्ष्य सहृदयं न मोहयति सम्भूय। अस्य हि रसविलासः, करुणस्य द्रवीभावः, चिन्तनस्य विशालता, भावनामुदात्तताः कल्पना प्राचुर्यञ्चास्य कवेरनन्यसाधारणत्वं जनयन्ति।

'निपीय यस्य क्षितिरक्षिणः कथा तथाद्रियन्ते न बुधाः सुधामपि।

नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्वलः॥

वस्तुतः काव्यस्यास्याध्ययननान्तरं न कोऽपि काव्यान्तरं तथाद्रियते। एवमेव करुणस्य द्रवीभावो यथा-

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।

गतिस्तयोरेषजनस्तमर्दयन्नदो विधे त्वां करुणा रुणब्दि नो ॥ (नै.च., १/१३५).

अयोगशृङ्गारस्यै च्छटा यथा-

इदमनङ्गशरावलिपन्नगक्षतविसारिवियोगवषवशा।

शशिकलेव खरांशुकरार्दिता करुणनीरनिधौ निदधौ न कम्। (नै.च, २/३३)

सम्भोगशृंगार प्रवाहो यथा -

वल्लभस्य भुजयोः स्मरोत्सवे दित्सतोः प्रसभमङ्गःपालिकाम्।

एककश्चिरमरोधि बालया तत्पयन्त्रणनिरन्तरालया॥' (नै.च., १८/४३)

उत्प्रेक्षार्थी वैलक्षणं यथा-

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा।

कृतमध्यविलं विलोक्यते धृतगम्भीरखनीखनीलिम् ॥(नै.च., २/२५)

व्यङ्ग्योत्कर्षो यथा-

उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मनः।

अपवर्गे तृतीयेति भणतः पाणिनेरपि ॥ (१७/७०).

१३.७ नैषधीयचरितस्य टीका/भाष्यः

नैषधीयचरितमधिकृत्य पञ्चविंशत्यधिकाष्टीकाः सन्ति। तासु विद्याधरस्य साहित्यविद्याधरी, आनन्दस्य टीका,मल्लिनाथस्य जीवातुः, नारायणस्य नारायणी वा नैषधप्रकाशः इति प्राचीनाः, शेषराजशर्मणश्चन्द्रकला नवीनासु प्रसिद्धा।

स्वकाव्यविषये कविः स्वयमेव कथयति -

ग्रन्थग्रन्थिरिह क्वचित्कवचिदपि न्यासो प्रयत्नान्मया

प्राजम्मन्यमना हठेन पठितो माऽस्मिन् खलः खेलतु।

श्रद्धाराद्धगुरुः श्लथीकृतदृढग्रन्थिः समासादय-

स्वेतत्त्कव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः॥ इति॥

१३.८ नैषधचरते नलचरितम

नैषधचरितस्य नायकोऽस्ति नलः। नैषधचरितमहाकाव्ये कविवरेण श्रीहर्षेण नलस्य विषये सर्वथा नैपुण्यमेव प्रख्यापितं भवति। तेन नायकस्य तिषधरुराजनलस्य यत् चरितम् वर्णनं क्रियते, तत् अतीव चित्ताकर्षकं भवति।

ग्रन्थस्य निर्विघ्नपरिसमाप्तिकामेन कविना पुण्यश्लोकस्य नलस्य चरित्र वर्णनेन मङ्गलाचरणं विरच्य स्वकृत्तेः भूमिका अवतार्यते -

निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधास्युधामपि। नलस्सितच्छत्रितकीर्तिमण्डलस्य राशिरासोन्मसा महोज्ज्वलः ॥ (१.१)

लोकोत्तरव्यक्तित्ववान् असौ नलः आदिसवत् तेजसमाकरः तथा च चन्द्रवत् यथासमाहारः आसीत्। अतः अमृतादपि मधुरे तस्य चरिते को बुधजनः रतिं न कुर्यात्। नलस्य मुख्यम् उद्देश्यं राज्यस्य रक्षणम् प्रजायाः कव्याणम् धर्मवृद्धिं च आसीत्। काव्ये वर्णितम् अस्ति यथा नैषोध्या अनेकानि दुःसाध्या-कार्याणि सम्यग् , निवर्तयति, प्रतिद्वन्देषु विजयम् , तथा शत्रूणां दलं संहारयति। अस्मिन् काव्ये नायकस्य नलस्य न्यायसंगतम् एव त्यागपूर्ण जीवनं प्रमुखरूपेण दृष्टिम्। नलस्य वोरता एवं युद्धकला नैषधचरिते अतीव महत्वपूर्णरूपेण वर्णनं क्रियते प्रायशः शत्रुणा सह संघर्षे सः प्रमुखनायकरूपेण प्रकटितः। एकस्मिन् समये युद्धे नलः महान् असुरं प्रतिनायकेन सम्राटं समूलं नाशयितुं प्रयासं कृत्वा, अनेकानि कठिनानि युद्धं निर्णीतानि निखिलमेव भूमण्डले स्वायत्तीकर्तुमिच्छन् असौ नलः निजबाहुवलेन सर्वानेव विपक्षान् नरपतीन् विजित्य बहूनि च

शत्रुनगराणि भस्मीभूतं कृत्वा स्वकीयमसामान्यं वीरत्वं जगति विस्तारयति स्म।

निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः।
न तत्यर्जुर्नूनमनन्यसंश्रयाः प्रतीपभूपालमृगोदृशं दृशः।। (१/११)

न केवलं साम्राज्यविस्तारे एव अपि तु प्रजापालने च नलस्य नैपूण्यं कविना वर्णितं भवति। तेन राज्ञा अतिवृष्टिः प्रभृति इतो निवार्य स्वराज्यं विष्कण्टकीकृतमासीत्। तस्य राज्ये दारिर्द्यस्यैव दरिद्रता, न तु प्रजानामिति कविना चारूतरया प्रतिपादितमस्ति –

अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिर्द्यदरिद्रतां नृपः।।

सः नलः सर्वदा विचारशीलः आसीत्। सर्वस्वदानं विधायोऽपि सः राजा यावत्पर्यन्तं मेरुसमृद्योदानं न करोति तावदसौ सन्तुष्टो न भवति। एवं ययातिभगीरथादीनामन्येषां नृपाणामिव नलस्यापि दयादाक्षिण्यादयो महान्तो गुणाः तमादर्शसम्राटरूपेण प्रतिष्ठयामासः। अतीव विद्यानुरागी सः नलः प्रतिदिनमेव कविभिः विद्वद्भिः सहर्षं शास्त्रानुशीलनमकरोत्। साङ्गवेदेषु तथा आयुर्वेद्रधनुर्वेदादिषु कलाविद्यासु च असौ परं कौशलमवाप। न केवलमसौ शब्दतः एव ता विद्या अधीतवान् अपि तु अर्थतश्च ताषामाचरणं सम्यक् उपलभ्य प्रजापालनकार्ये प्रयुक्तवान् असीत्। सूपकारविद्यानां तु नलस्य नैपूण्यं जगति एव प्रसिद्धः जातम्।

यथा ओजसा यशसा च तथा अनवद्येन निजशरीणापि नलः स्रष्टुः अपूर्वकृतिरिव राजते स्म। न हि प्रारब्धयौवनस्य तस्य नलस्य वदननेत्रादीनि अङ्गानि जगति कामपि अमां लेभिरे। तदुक्तं कविना–

सरोरुहं तस्य दृश्यैव निर्जितं
ज्ञिताः स्मितेनैव विधोरपि श्रियः।
कुतः परं भव्यमहो महीयसी, तदाननस्योपमितौ दरिद्रता ॥ (१/१४)

नलस्य महानुभवताऽपि कविना सम्यग् प्रदर्शिता भवति। तस्य कर्तव्यनिष्ठा, धर्मपरायणता, आत्मसम्मानं च मुख्यं पथेयम्। यद्यपि असौ दमयन्तीं प्रति अतीव अनुरक्तमासीत् तथापि देवानामनुरोधमात्रेणैव तेषां कृते दूतरूपेण तस्य भैमीप्रार्थनम् इन्द्रादीनां श्रेष्ठत्वप्रतिपादनपूर्वकं तेषां वरणे श्रेयस्तप्रदर्शनम्। नीचस्य च हेयत्वप्रतिपादनम् इत्यादिषु तदन्तः करूणस्य औदार्यम् महत्वं तथा निसर्गशारव्यम् अस्माभिः वितशमोपलभ्यते। कर्तव्यपरायणः नलः सर्वानपि सम्भावितताn प्रयासान् अवलम्ब्य भैमीभवः इत्यादिषु देवेषु निवेशयितुं यद् असमर्थी बभूव, तत्र तु तस्य वैफल्यं न विभाव्यम्। यतो हि तेन वारं वारं प्रोत्साहिताऽपि सा सति यदा नक्ष्यबनवरणात् मृत्युम् एव वरं मेवे तदैवं तां ग्रहीतुमसौ मनः चकारः। एवं कर्तव्यप्रेम्नयोः महता संघाते नलस्य चरित्रं सर्वथा रमणीयं मधुरं च संज्ञातम्।

नलः महद्भिः मानवीयैः गुणैरपि सम्पन्नो भवति। उदाहरणरूपेण प्रथमसर्गे सुवर्णमयहंसस्य अतीव करूणं प्रार्थनां श्रुत्वा असौ बलात् गृहीतं पक्षिणमचिरमेव मुमोचा इव लोकोत्तराणाम्। ससम्भ्रमोत्पातिपत्कुलाकुलं सरः प्रपद्योत्कतयाऽनुकम्पिताम्। तमूर्मिलोलैः पतंगग्रहान्नृपं न्यवारयद्वारिरूहैः करैरिवः। (१/१२६) इति।।

१३.९ नैषधचरितस्य प्रथमसर्गस्य कथावस्तुः

महाकविश्रीहर्षविरचितस्य नैषधचरितस्य प्रथमसर्गस्य कथावस्तु एवं रूपेण वर्णितमस्ति - काव्यस्य आदौ निर्विघ्नं परिसमाप्तिकामः कवि पुण्यश्लोकस्य राज्ञः नलस्य उदारचरितम् उपस्थापयति। अनन्तप्रतापशालिनः नलस्य रसमयों कथां निशम्य जना अमृतं न आद्रियन्ते। दयादाक्षिण्यादिभिः गुणैः असौ राजा नलः समग्रे एवजगति सार्वभौमाश्रीत् निर्मलः यशः तनोति स्म। तेन च वेदवेदाङ्गादि चतुर्दशविद्या न केवलं शब्दतः अधीता अपि तु तेषां बोधनमनुष्ठानम्, तथा प्रचारणं च सम्यक् कृतमासीत्। तेन च राज्ये धर्मः सम्यक् प्रतिष्ठितः आसीत्। अतः सर्वे जनाः धर्ममार्गे एव विचरन्ति स्म। नलः आसमुद्रं युद्धयत्रामकरोत।अनेकनृपतीनां निहन्ताऽसौ नलः विजयार्थं भूमण्डलं प्रदक्षिणीकृत्य शत्रुणामनेकानि नगराणि विदग्धे। तस्य सैनिकाश्च अतिनिपुणतया युद्धं कृत्वा तस्य जयं सुकरमकुर्वन्।

नलः अतीव वदान्यः आसीत्। तस्य दानशीलत्वात् राज्ये कोऽपि जनः दरिद्रो न आसीत्। स च नलः कविभिः पण्डितैः सह आनन्देन कालमयापयत्।

अथ जगज्जयादनन्तरं नलः यौवनमवाप। समागते च यौवने तस्य मुखादिषु शरीरावयवेषु सार्वभौमलक्षणानि एवं चक्रुः। तथाहि कमलवत् नयनयुगलं, चन्द्रवत् स्मितम्, चामरवत् केशाः इति एवंविधैः लक्षणैः असौ कामदेवमपि अतिक्रम्य वर्तते स्म। अतः तस्य रूपलावण्यं दृष्ट्वा श्रुत्वा च तं प्राप्तुं मानुषीणां का कथा देवाङ्गनाः, नागरमण्यः मत्स्यस्त्रियश्च कामनां चक्रुः।

नारीषु मध्ये तावत् भीमराजतनया दमयन्ती नले शैशवादेव बद्धनुरागा बभूव। वन्द्रिनां गीतेषु सखिकथोपकथनेषु च नलस्य नामप्रशंसा च श्रुत्वा चित्रादिषु च तमवलोक्य दमयन्ती नलं लब्धुं सातिशयं कामयतेस्म।

अथ नलोऽपि लोकमुखात् दमयन्त्याः सौन्दर्यादिगुणसमूहं निशम्यतां प्रति सानुरागो बभूव। अथ क्रमेण वर्द्धितानरागेनासौ प्रायेण अश्वादिभिः सह नगराद् बहिस्थितिम् उपवनं जगाम। तत्र च उपवने दमयन्तीचिन्ताक्रिष्टोऽसौ नलः वृक्षलतादिषु अपि सर्वथा मैथुनभावमेव पश्यतिस्म। विरहिणः नलस्य शरीरं यद्यपि परिक्षीणं जातं तथापि तत् शरीरं लावण्यं न मुमोच।

विवेश गत्वा स विलासकानन ततः क्षणात् क्षीणिपतिर्धृनोच्छ्या।
प्रवालरागच्छुरितं सुषुप्सयां हरिर्धनच्छायमिवाम्भसां निधिम्।। (१/७१)

एवं श्रीहर्षेण नलस्य उपवनविहारः विस्तारेण वर्णितो भवति। अथ विचरणकाले कोऽपि अतीव रमणीयः तड़ागः नलस्य दृष्टिपथमायातः। तत्र च तडागे नलः एकं सुवर्णमयम् आश्चर्यजनकं हंसमद्राक्षीत्। स च हंसः पार्श्वस्थितया हंस्या सह अनुष्ठितेन रतिश्वेदेन अलसः सन् निद्रित आसीत्। तं च हंसं ग्रहीतुं नलः प्रदासं प्रयासः अभवत् , तदा सरः पारस्थितैः राजहंसैः कोलाहलः कृतः। तदा च नलद्वारा धृतेन तेन सुवर्णमयहंसेन नलः उक्तः यत् राज्ञा तस्य वधः न युज्यते, तेन तस्य धर्महानिः स्यात् तदा हंसहननात् विरतं नलं प्रति हंसः आत्मवृत्तान्तमश्रावयत्। स हंसः उवाच, स (हंसः) तस्य वृद्धाया मातुः एकएव पुत्रः, तस्य च स्त्री (हंसो) अपि नवप्रसवा। अतः अनयोः

उभयोऽवि नार्यो: जीवनं तदायत्तमेव। स च हंस: स्वमारतं स्वबन्धुं च प्रति बहुश: सकरुणं वचनमुवाच।

अथ हंसस्य करुणविलापेन सिक्तहृदये दयालु: नल: तं मुमोच। हंसस्य मोचनेन नल: परमानन्द लेभे॥

१३.१० नैषधचरिते दमयन्तीं प्रति नलस्य उक्तिम्

नैषधचरितमहाकाव्ये नवमसर्गे दमयन्ती: प्रति नलस्य वचनं वर्णितमस्ति -

निषेधवेषो विधिरेष तेऽथवा तवैव युक्ता खलु वाचि वक्रता।

विजृम्भित यस्य किल ध्वनेरिदं विदग्धनारावदन तदाकर:।। ५०

अर्थात् हे विदग्धे ! अथवा तव एव इन्द्रादिनिषेधो निषेधवेषो निषेधाकरो विधिरङ्गीकार एव। तथा हि वाचि वचने वक्रता वक्रोक्तिचातुरो व्यङ्ग्योक्तिचातुरीति यावत्। सा तत्रैव युक्ता खलु। कुत:, इदं वक्रवाक्यं वञ्चनाचातुर्यं यस्य ध्वनेर्व्यञ्जकवृत्तेर्विजृम्भितं विजृम्भणं 'नपुंसकेभावे क्त:'। विदग्धनारीवदनं सूक्ति-चतुरस्त्रीमुखं तदाकरस्तस्य ध्वनेरूत्पत्तिस्थानमित्यर्थान्तरन्यास:। तत: स्थूणानिखननन्यायेन विधिमेव हृदयितुमेतन्निषेधनाटकमिति निषेधेन विधिरेव व्यज्यत इति भाव:।

भीमजाता दमयन्त्या: स्वयम्बरमुद्दिश्यागत: नल: एव इन्द्राग्नियमवरुणास्यैव देवै: दमयन्तीं प्रति दूतरूपेण नियुक्त: सन् तत्सविधे देवानां विवाहप्रस्तावमुपस्थापयामास:। नलाभिलाषुका सा देवानां प्रस्तावं प्रत्याख्यानं कृतवती। तदा तादृशी सौभाग्यमपि दमयन्तीं प्रति आचर्यचकित: नल: निजसन्देहभानं प्रकटितवान् अथवा ते एष निषेधवेष: विधि: एव तव एव वाचि वक्रता युक्ता, यस्य खलु इदं विजृम्भितं किल तदाकर: विदग्धनारी वदनम् इति पदस्य अन्वय:।

अथवा तव इदृश: इन्द्रादि निषेध: अर्थात् देवप्रस्ताव प्रत्याख्यानं वस्तुतस्तु विधि एव अर्थात् अङ्गीकार एव इत्यस्ति नलस्य दमयन्तीं प्रति प्रश्न:। तादृशस्य सन्देहस्य कारणरूपेणोच्यते - यत् दमयन्ती विद्रूषी इति कृत्वा तस्या एव कथने वक्ता अर्थात् चातुर्ययुक्ता भवति। तस्यापि कारणमुच्यते यदिदं केवलं ध्वनेरेव विजृम्भितम् अर्थात् ध्वनेरेव प्रश्न: तस्य विजृम्भणस्य आकार: उत्पत्तिस्थानं खलु विदग्धनारीजनस्यवदनमेव भवतीति।

१३.११ नैषधचिरते नलस्य अवदान्यत्वम्

नैषधचरितस्य प्रथमसर्गे नलस्य अवदान्यत्वं इत्थं वर्णितमस्ति -

अयं दरिद्रो भवितेति वैधसौ लिपि ललाटेऽर्थिजनस्य जाग्रतीम्।

मृषा न चक्रेऽल्पितकल्पपादप: प्रणीय दारिर्द्यदरिद्रतां नृप:॥ (१/१५)

अर्थात्,अल्पित: अल्पीकृत: निर्जित इति यावत् , दानशौण्डत्वादिति भाव:, कल्पपादप: कल्पतरु: वाञ्छितफलप्रदवृक्ष इति यावत्, दरिद्रताम् अभावमिति यावत्, प्रणीय कृत्वा हरिद्रेभ्य: प्रभूतधनदानेन तेषां दारिर्द्यम् अपनीयेति इति भाव:। वयं दरिद्र: अभाववानिति यावत्, भविता इति

अर्थिजनस्य याचकजनस्य ललाटे जाग्रतीं दीप्यमानामिति यावत् वेधसः इयं वैधर्मी तां लिपिं मृषा मिथ्या न चक्रे न कृतवान्। विधातुर्लिपौ सामान्यताः दरिद्रशब्दस्य स्थितौ दरिदशब्दस्य यथायथं धनदरिद्रः, पापदरिद्रः, ज्ञानदरिद्रः इत्यादि प्रयोगदर्शनात् अभावमात्रबोधकत्वमङ्गीकृत्य राजा दरिद्राणां धनाभावरूपं दारिद्र्यमपाचकार इति निष्कर्षः।

अस्यायं निगदितार्थः निषेधनरेन्द्रः नलः आर्थिजनस्य याचकजनस्य ललाटे वैधसी लिपि विधिसम्बन्धीनिं मृषां न चक्रे मित्था वाऽकरोत्। अर्थात् याचकानां ललाटेषु ब्राह्मणा यत् लिखितमासीत् तत् नलेन सत्यमेव कृतम्। अयं याचकजनः दरिद्रः भविष्यति इति वैधसी लिपिः आसीत्। नलः तां लिपिं सार्थकमकरोत्। किं वृत्तान्तां लिपिं सार्थकमकरोत् इत्यत्र उच्यते। दरिर्द्यः दरिद्रतां प्रणीय इति दरिद्रस्य भावः दारिर्द्यम्। तस्य दारिद्रस्य दरिद्रता शून्यत्वं प्रणीय सम्पादयन् नलः यथोचितमपि ददाति। अनेन श्लोकेन नलराज्ये न कोऽपि जनः दरिद्र आसीत् इति। अतः नल अतीव प्रजारञ्जकः राजा आसीत् इति सूचितं भवति॥

१३.१२ नैषधचरितमहाकाव्ये उपवनवर्णनम्

अथ कविकुलललामभूतेन श्रीहर्षेण नैषधचरितमहाकाव्यस्य प्रथमसर्गे प्रदत्ता सुविस्तीर्णा उपवनवर्णना अत्रोपस्थाप्यते।

तथाहि, नगरात् बहिरागत्य राजा नलः वनपालैः निवेद्यमानः कुसुमैः तथा फलैः सुशोभितम् अतीव रमणीय काननं दृष्टवन्। प्रथमतः स भ्रमरं दधानं केतकीपुष्पं ददर्श। कामोद्दीपकं केतकोकुसुमं तु विरहिनः निषधराजस्य हृदयं पीडयमास। तत्पश्चात् सः एवं फलयुक्तं दाडिमवृक्षमैक्षत्। ततः वियोगिनः अध्वजुषां कष्टप्रदायकं श्यामवृन्तयुक्तं पलाशपुष्पम् अपश्यत्। राज्ञा एका लता च दृष्ट्वा कवि तां लतां नायिकारूपेण तथा गन्धवहः नायकरूपेण वर्णयन् आह - यत् नलेन नायकेन वायुना स्पृष्टा चुम्बिता वा मधुविन्दुरूपिभिः स्वेदविन्दुभिः व्यापृताङ्गो तया मुकुलरुपं दन्तसमूहं दधाना वायुना संचालनात् नायकस्पर्शेणि वा वेपथोमती लता दृष्ट्वा इति। तुलनीयः -

नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गो मकरन्दशीकरैः।
दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनो पपे (१/८५)

अर्थात्, गन्धवहेन वायुना चुम्बिता स्पृष्टा अन्यत्रानुलिप्तेन पुंसा वीक्षिता मकरन्दशीकरैः पुष्परसकणैः करम्बिताङ्गी व्यामिश्रितरूपा अन्यत्र स्वित्राङ्गीति च गम्यते। स्मितशोभिनः विकासरम्या कुड्मला मुकुला रदनाश्च यस्यास्तां मन्दहासमधुरदन्तमुकुला च गम्यते। दरकम्पिनी वायुस्पर्शादीषत्कम्पिनी सात्त्विकवेपथुमती च नवा लतावल्ली तत्सदृशी कान्ता च गम्यते। नृपेण कर्ता दृशा करणेन दरादराभ्यां भयतृष्णाभ्यामुपलक्षितेन सता पपे अवेक्षिता गाढं दृष्टा इत्यर्थः।

असौ नलः भ्रमरयुक्तानि चम्पककुसुमानि पश्यति स्म। चम्पकेषु अन्तर्गतं विरहीनां निरतिशय कामोद्रेक दिग्विदिकज्ञानशून्यतासम्पादनं परागं पुरा कामदेवेन महादेवाय निक्षिप्तषु वणेषु संलग्नं पुरारेः अंगलिप्त भस्मरजः इव अकर्तयत्।

तदा उपवने अलिः हुंकृतीवत् गुञ्जनैः पिकात् वक्तुः सकाशात् वियोगिनां दुःखावस्थाम् अशृणोत्। तत् श्रोतुम् अनिच्छ्या प्रसुनरूपकरं वारणार्थं प्रसारणीं स्थलपद्मिनीं दमयन्तीविरहसन्तापेन सन्तप्तो नलः अपश्यत्–

रसालसालः समदृश्यतमुना स्फुरदद्विरेफारवरोषदृङ्कृतिः।
समीररलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्ज्जनाभियम् ॥ (१/८१)

ततः राज्ञा वियोगिनीजनाय तर्ज्जनाभीयं दातुमिच्छन् इव स्थितः आम्रवृक्षः दृष्टः। सः नलः भ्रमरयुक्तः चम्पकपुष्पं दृष्ट्वा तं वियोगिनी विपत्तिकाले उत्थितं धूमकेतुं इति अकर्तयत्। तत्र उपवने राजा नागकेसराक्षं पुष्पमपि अपश्यत्। तत्पश्चात् चन्द्रनसदृशेन सुगन्धेनयुक्तं परिपक्वं विम्बफलम् आलोक्यामासः। पाटलपुष्पस्य स्तवकं दृष्ट्वा राजा तं कामदेवस्य वाणपूर्णं तूणोम् इति अमन्यत्। तत्रैकं शुभ्रकुसुमयुक्तं श्यामवर्णम् अगस्त्यवृक्षमपि राजा अपश्यत्। तत्र उपवने वृक्षाः फलाधिक्याद् नतायेव आसन्। वनानिलः केतकरेणुभिः सितः पुष्परसैः सुधीकृतः तथा हिमित आसीत्। तत्रैकः अतिविशालः तडागो अपि आसीत्।

चक्रवाकयुगलेन शोभितः कमलपरिपूर्णः च सरो विशेषः अतिप्रमाणतया रत्नाकरतुल्य एव आसीत् इति। एवं प्रकारेण अयं कविः श्रीहर्षं उपवनवर्णने अनन्यसामान्यं वर्णननैपूण्यं प्रदर्शयति इति शम्॥

१३.१३ अध्यायस्य असमीया भाषायां सारांशः

নৈষধচৰিতম্ - নৈষধচৰিতম্ গ্ৰন্থৰ ৰচক মহাকবি শ্ৰীহৰ্ষ। এই গ্ৰন্থখন সংস্কৃত কাব্যজগতৰ বৃহত্ত্ৰয়ীৰ অন্তৰ্ভুক্ত। বাইশটা সৰ্গযুক্ত এই মহাকাব্যত সৰ্বমুঠ [illegible]টা শ্লোক আছে। নিষধ দেশৰ ৰজা নল আৰু বিদৰ্ভদেশৰ ৰাজকুমাৰী দময়ন্তীৰ প্ৰেম কাহিনীয়েই এই মহাকাব্যখনৰ মূল বিষয়বস্তু। নলৰ গুনানুকীৰ্তনেৰে আৰম্ভ হৈ কাব্যখন নল-দময়ন্তীৰ সুখ-সঙ্গমেৰে সমাপ্ত হৈছে। কাব্যখনৰ প্ৰথম সৰ্গত নলৰ বনবিহাৰ, মৃগয়া বৰ্ণনা, দ্বিতীয় সৰ্গত হংসৰ দ্বাৰা দময়ন্তীৰ সৌন্দৰ্য বৰ্ণনা, হংসৰ প্ৰতি নলৰ অনুৰোধ, তৃতীয় সৰ্গত দময়ন্তীৰ ওচৰত হংসৰ নলসৌধষ্ঠৰ বৰ্ণনা, চতুৰ্থ সৰ্গত নলৰ দ্বাৰা দময়ন্তীৰ পূৰ্বানুৰাগ তথা বিয়োগাৱস্থাৰ বৰ্ণনা, পঞ্চম সৰ্গত ৰজা ভাসে অনুষ্ঠিত কৰা দময়ন্তীৰ স্বয়ম্বৰ উপলক্ষে যোৱা ইন্দ্ৰ, বৰুণ, অগ্নি আৰু যমে নলক অদৃশ্যভাৱে দূত হিচাপে অন্তঃপুৰলৈ পঠোৱাৰ বিৱৰণ, ষষ্ঠৰ পৰা নৱম সৰ্গলৈ নলৰ দ্বাৰা দময়ন্তীৰ আগত দেৱতাসকলৰ বাণী নিবেদন, দময়ন্তীৰ নলৰ প্ৰতি একান্ত নিষ্ঠা, তেওঁৰ প্ৰতি নিজৰ দুখৰ উদ্ধাৰ, নলৰ স্বৰূপ ধাৰণ, দশম সৰ্গত দময়ন্তীৰ স্বয়ম্বৰ আৰু দময়ন্তীৰ সৌন্দৰ্য বৰ্ণনা, একাদশ আৰু দ্বাদশ সৰ্গত স্বয়ম্বৰত উপস্থিত হোৱা ৰজাসকলৰ শ্ৰীবৰ্ণনা, ত্ৰয়োদশ সৰ্গত নলৰ ৰূপ ধৰি স্বয়ম্বৰত উপস্থিত হোৱা চাৰিজন দেৱতা আৰু নলৰ ক্লিষ্ট বৰ্ণনা, চতুদৰ্শ সৰ্গত দময়ন্তীৰ পতিনিষ্ঠাৰ ওপৰত প্ৰসন্ন হৈ দেৱতাসকলৰ নিজ ৰূপ ধাৰণ, নল-দময়ন্তীৰ বিবাহ বৰ্ণনা, পঞ্চদশ সৰ্গত বৰ- বধুৰ প্ৰসাধন বৰ্ণনা ষষ্টদশ সৰ্গত বৰ-বধুৰ পানিগ্ৰহণ, সপ্তদশ সৰ্গত স্বয়ম্বৰৰ পৰা উভতি যাওঁতে দেৱতাসকলৰ দ্বাৰা কলিৰ নাস্তিকতাবাদ খণ্ডন, অষ্টাদশ সৰ্গত নল-দময়ন্তীৰ সঙ্গঁমৰ বৰ্ণনা আৰু শেষৰ চাৰিটা

সর্গত নল-দময়ন্তীৰ ব্যবহাৰিক জীৱন, দাম্পত্য প্ৰেম, দেৱতা আৰাধনা আদিৰ বৰ্ণনা কৰা হৈছে।

যদিও কাব্যখনৰ মূল কাহিনীত নল-দময়ন্তীৰ প্ৰেম কাহিনীহে বৰ্ণিত হৈছে তথাপিও কবিজনাই সংস্কৃত মহাকাব্যৰ লক্ষণসমূহকো গুৰুত্ব দি কাব্যখনত নদী-পৰ্বত, ঋতু আদিৰ বিৱৰণ সুন্দৰভাৱে উপস্থাপন কৰিছে। ৰস- ধ্বনি অলঙ্কাৰ আদিৰ সুপ্ৰয়োগৰ ফলত মহাকাব্যখনো ভাৰতীয় সাহিত্যত অতি উচ্চ আসন লাভ কৰিছে ।



१३.१४ अध्यायात् किमवगतम्

अध्यायात् वयं निम्नोक्तविषयाः ज्ञातवन्तः-

- महाकवि श्रीहर्षप्रणीतं नैषधचरितम् इति महाकाव्यस्य विषये सम्यग् रूपेण ज्ञातवन्तः।
- 'नैषधचरिते पदलालित्यम्' इति विषयमधिकृत्य श्रीहर्षस्य काव्यशैलीम् ज्ञातवन्तः।
- नैषधचरिते अलंकारप्रयोगशैल्याः विषये ज्ञातवन्तः।
- नैषधचरितस्य विभिन्नानि टीकाभाष्याणिविषये ज्ञातवन्तः।



१३.१५ ज्ञानाधिक्यम्

१) अग्रवालः, आचार्य हंसराजः (१९८६) संस्कृतसाहित्येतिहासः, चौखम्बा सुरभारती प्रकाशन, वाराणसी.

२) Shatoma, Die. Thaneswar (July, 1995), Sanskrit Sahityar Itivetta, Chandra Picakash, Parzbazar. Guwahati-v.

३) दाहालः, आचार्य लोकमणि (१९९९) संस्कृतसाहित्येतिहासः कृष्णदास अकादमी, वाराणसी.

४) मिश्र, आचार्य रामचन्द्र (२००३) संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन, वाराणसी-२२१००१.

५) उपाध्याय, रामजी, संस्कृत निबन्धावलिः, चौखम्वा विद्याभवन, वाराणसी.

६) पाण्डेय, डा. विजय शंकर, पाठकः, डा. जमुना (२०१३) संस्कृत निबन्ध मकरन्द् (प्रथमो/द्वतीयोभागः).

७) Vaidya, C.V. History of Sanskrit Literature, Poona, 1930.

८) De, S.K. and Dasgupta, S. N. History of Sanskrit Literature, Vol. 1, Calcutta, 1980.

९) Deva Goswami, History of Sanskrit Literature. Bookland, Panbazar, Guwahati-1.

१०. भट्टाचार्य, विमानचन्द्र, नैषधीय चरितम्, (Sanskrit Text) विश्वविद्यालय प्रकाशन, वाराणसी, २०१३.



१३.१६ अभ्यासप्रश्नाः

प्रश्नः १: 'नैषधचरितम्' कीदृशं काव्यमस्ति ?

प्रश्नः २: 'नैषधचरितम्' इति काव्यस्य कवि कः ?

प्रश्नः ३: नैषधचरिते कति अध्यायाः सन्ति ?

प्रश्नः ४: महाकाव्यकाररूपे श्रीहर्षस्य परिचयं देय।

प्रश्नः ५: 'नैषधं विद्वदोषधम्' इति वचनस्य तात्पर्यं विशदीक्रियताम्।

प्रश्नः ६: 'नैषधे पदलालित्यम्' इति वचनस्य तात्पर्यं विशदीक्रियताम्।

प्रश्नः ७: पञ्चमहाकाव्येषु नैषधचरितस्य स्थानम् - इति विषयमधिकृत्य निबन्धः विरच्यताम्।

प्रश्नः ८: नैषधचरिते रसप्रयोगशैल्याः पर्यालोच्यताम्।

प्रश्नः ९: श्रीहर्षस्य जन्मस्थानकाल्योर्विषये लिख्यताम्।

*** ***** ***

अध्यायः १४ : मेघदूतम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

१४.१ उद्देश्यम्

१४.२ परिचयः

१४.३ गीतिकाव्यम्

१४.४ मेघदूतम्

१४.५ कालिदासः

१४.६ कालिदासस्य समयः

१४.७ मेघदूतस्य उपजीव्यत्वम्

१४.८ मेघदूतस्य काव्यिकसौन्दर्यम्

१४.९ मेघदूते प्रकृतिचित्रणम्

१४.१० मेघदूते रसयोजना

१४.११ मेघदूते अर्थान्तरन्यासः

१४.१२ माघेमेघेगतंवयः

१४.१३ अध्यायस्य असमीया भाषायां सारांशः

१४.१४ अध्यायात् किमवगतम्

१४.१५ ज्ञानाधिक्यम्

१४.१६ अभ्यासप्रश्नाः

१४.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् –

- अनेन अध्यायेन गीतिकाव्यस्य संक्षिप्तवृत्तान्तं ज्ञातुं शक्यते।
- अनेन अध्यायेन कालिदासकृतः मेघदूतस्य खण्डद्वयस्य (पूर्वमेघ–उत्तरमेघ च) प्रतिपाद्यं ज्ञातुं शक्यते।
- अनेन अध्यायेन महाकवि कालिदासस्य विषये ज्ञातुं शक्यते।
- 'मेघदूतस्य उपजीव्यत्वम्' इति विषये अवबोधनं भवति।
- 'मेघदूतस्य काव्यिक सौन्दर्यस्य' विषये ज्ञातुं शक्यते।
- 'मेघदूते प्रकृति चिन्तनम्' इति विषये अवबोधनं भवति।
- मेघदूते सन्निविष्टानां विभिन्नानां रसानां विषये अवबोधनं भवति।

१४.२ परिचयः

संस्कृतसाहित्यजगति काव्यस्य द्वौ प्रकारौ स्तः दृश्यकाव्यं श्रव्यकाव्यञ्च। दृश्यकाव्येषु अभिनयादिमाध्यमेन काव्यस्य विषयवस्तुं ज्ञातुं शक्यते। श्रव्यकाव्ये श्रवण-पठनादिमाध्यमेन काव्यस्य विषयवस्तुं ज्ञातुं प्रभवति। श्रव्यकाव्यस्य पुनः त्रयो विभागाः सन्ति - महाकाव्यं, खण्डकायं, चम्पूकाव्यञ्चेति। महाकाव्येषु यथा रघुवंशम्, शिशुपालवधम्, कुमारसम्भवम्, किरातार्जुनीयम्, नैषधीयचरितम् च। खण्डकाव्यं यथा मेघदूतम् ऋतुसंहारञ्च। चम्पूकाव्यं यथा नलचम्पूः, पारिजातहरणचम्पूश्च।

अस्मिन् चतुर्दश - अध्याये अस्य काव्यस्य सामान्यपरिचयः प्राप्यते। अस्मिन् अध्याये अस्य काव्यस्य सामान्यपरिचयेन सह कवेः कालिदासस्य परिचयम् , अस्य महाकाव्यस्य प्रतिसर्गानां विषयवस्तुनां संक्षिप्तः परिचयः प्राप्यते।

१४.३ गीतिकाव्यम्

संस्कृतसाहित्ये काव्यं द्विधा विभज्यते। दृश्यकाव्यं श्रव्यकाव्यञ्चेति। तत्र श्रव्यं श्रोतव्यमात्रं, तत् पद्यगद्यमयं द्विधा। पद्यकाव्यं पुनर्द्विविधे विभक्तम् - महाकाव्यं खण्डकाव्यञ्चेति। खण्डकाव्यस्य लक्षणसम्बन्धे, साहित्यदर्पणे उक्तम् - 'खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च' इति। खण्डकाव्यं काव्यस्य एकदेशानुसारि- एकंदेशं किञ्चित् किञ्चित् लक्षणं अनुकरोतीति यावत्। अतः प्रवोक्तम् श्रीमता रामचरणतर्कवागोशेन - एकदेशानुसारि यत् किञ्चित् लक्षणहीनमिति। तथा हि- खण्डकाव्यं सर्गवद्धं न भवति। परं महाकाव्यवत् अत्र शैलनदीनगरवनादि वर्णनं च भवेत्। अत्र काव्यवद् भाषाविभाषा नियमो नास्ति इति तर्कवागीशः। इदमेव खण्डकाव्यम् आधुनिकाः 'गीतिकाव्यम्' (Lyrics) इति नाम्ना व्यपदिशन्ति। गोतस्यार्थो वाद्यसमेत रागवद्धः छन्दात्मक गानम्। किन्तु गोतस्य वा गोत्याः वा अत्रार्थः हृदयस्य रागात्मक भावनायाः वा उपस्थितिः गीतिकाव्यस्य एकान्त काम्या।

खण्डकाव्यस्य इतिहासः कदा लभते इति चिन्तायां ऋग्वेद काल एव खण्डकाव्यस्य वीजमुक्तम् इति सविश्वासं वक्तुं शक्यते। मनोहारिणी उषः सूते वोररसप्रधाने विपाशाशुतुदीसूक्ते सुदासविजयसूक्ते च खण्डकाव्यस्य प्राग्रूपं निहितमिति प्रतीयते।

गीतिकाव्यानां विभागाः विभिन्नाः सन्ति। तत्र द्वौ भागौ मुख्यौ यथा स्तोत्रकाव्यं भक्तिकाव्यं वा श्रृंगार- काव्यं सन्देश काव्यं वा।

स्तोत्रकाव्ये आध्यात्मिक भावाभिभूतः भक्तः तस्य हृदयस्य ऐकान्तिक भक्तिं प्रकारषयति। यस्मिन् गीतिकाव्ये श्रृंगाररसस्यानुभूतिः प्रधाना दृश्यते तत् सन्देशकाव्यम् इति विगन्यते। आत्मनिवेदनस्य तीव्रानुभुतिः श्रृंगारकाव्यस्य वैशिष्ट्यम्। संस्कृतसाहित्ये चमति भिन्नप्रकाराणां श्रृंगारकाव्यानि परिलक्ष्यते। तेषु सन्देशकाव्यम् अथवा दूतकाव्यं मुख्यं भवति, यत्र दूतमाध्यमेन प्रेमिकः प्रेमिका वा वियुक्तं प्रेमिजनं प्रति सप्रणयसन्देश प्रेरयति।

सन्देशकावेषु तथा गीतिकाव्येषु महाकविकालिदासस्य मेघदूतम् अद्वितीय कृतिः।

१४.४ मेघदूतम्

अथ कविकुल-शिरोमणि-कालिदासस्य अपूर्वकृतिः मेघदूतम्। तदीयं मेघदूतं महाकाव्यं जगति सुप्रसिद्धम्। मेघदूतं कालिदासस्य गोतिकाव्यरूपं खण्डकाव्यमस्ति। सन्देशकाव्येषु कालिदासस्य मेघदूतम् अद्वितीय रचना। मन्दाक्रान्ता छन्दसि विरचिते ग्रन्थेऽस्मिन् भागद्वयं वर्तते - पूर्वमेघः, उत्तरमेघश्च। तत्र पूर्वमेघे वाद्यप्रकृतिः, उत्तरमेघे च अन्तःप्रकृति चित्रिता। प्रायः श्लोकशतकमितिः अयं ग्रन्थः किमपि मादकं तत्वं रक्षति येन लोकाः 'माघे मेघे गतं वयः' इति स्वाभिमानं वक्तुमुत्सहते।

कदाचित् स्वभर्तुः कुबेरस्य सेवायामपराद्धः कश्चिद् यक्षः स्वामिना वर्षं स्वदेशाद् निर्वासितः सन् रामगिरिमधिवसति। अथ प्रावृणुरवे मेघं कञ्चनुत्तरां दिशमुच्चलितमुदीक्ष्य स तन्मुखेन स्वप्रेयस्यै सुखसन्देशं प्रेरयति -

कश्चित्कान्ताविरह गुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येन भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

(मेघदूतम् / पू.मे./१)

चाटुपुरस्सरं मेघं सम्बोध्य तत्प्ररोचनार्थं प्रथमं स पथां रमणीयकं वर्णयति येन तद् विवक्षितः पथां क्रमो व्यज्यते। स आह - 'हे सखे! प्रथममाम्रकूटपर्वतं गत्वा तत्रत्यान् दावान् वृष्टिभिः शामयन् विन्ध्यतलवाहिनीं नर्मदावाहिनीमुपेयाः। ततस्तु वेत्रवतीमनु स्थितां विदिशां नाम पुरोमुपर्युपरि उड्डीय, वामेन प्रवर्तमानः सन् श्वोविशालां (उज्जयिनीं) जिद्दीस्व। तदनु कुरुक्षेत्रं प्रपद्य त्वया तत्र स्वारस्वतीकाः पुण्या मधुराश्च आपः पीयन्ताम्।'

हित्वा हालामभिमतरसां रेवतो लाचनाङ्कां वब्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना- मन्तः शुद्धस्तमसि भवता वर्णमात्रेण कृष्णः।।

अथ कनखलं प्राप्य- कैलासं मानसं च प्रतिष्ठस्व, मानसे च सरोवरे तत्सलिलैर्विश्रान्तिं व्यपनोदय अलकामुपढौकस्व इति। अथ मेघस्य परिचयसौकर्यार्थ यक्षः अलकायां तत्प्राणानां या वसतिः तां विविच्य वर्णयति, तदनन्तरं च प्रार्थयति- 'भद्र! मन्द्रीकृततडित्-प्रकाशेन मृदूकृतस्तनित्तनिघोर्षेण च त्वया मद्गृहा उपगन्तव्याः। मा नाम प्रिया-स्वप्ने माम् अनुध्यायन्ती विघ्नितमनोरथा भवेत्। बत विप्रयोगसन्तापविच्छायचन्द्राननया क्षीणाङ्गलतया च तया भवितव्यम्। अथ तस्यां प्रबुद्धायां भवाननुराग सन्देशं मामकमिमं तस्यै उपहर, अचिराद्भाविनं च आवयोः संयोगं संसूच्य तां संसान्त्वय' -

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते शैलादाशु त्रिणयन वृषीत्खात कुटान्निवृत्तः।
साभिज्ञान प्रहित कुशलै स्तद वचोभिर्ममापि प्रातः कुन्द प्रसवशिथिलं जोवितं धारयेथाः॥

१४.५ कालिदासः

भारतवर्षे कवीनां मध्ये कालिदासः सुप्रसिद्धः तथा श्रेष्ठः कविरूपेण विराजमानास्ति। सःमहाकाव्य-गोतिकाव्य-रुपकेतित्रिविधकाव्यस्य कर्ता आसीत्। तानि यथा-

(१) मालविकाग्निमित्रम्
(२) विक्रमोर्वशीयम् (रूपकाणि)
(३) अभिज्ञानशाकुन्तलम्
(४) ऋतुसंहारम्
(५) मेघदूतम् - (गीतिकाव्ये)
(६) कुमारसम्भवम्
- (महाकाव्ये)
(७) रघुवंशम्

स महाराजः विक्रमादित्यस्य सभाकविः आसीत्। स उपमा प्रयोगे सिद्धहस्तः आसीत्। अतः साधुच्यते- 'उपमा कालिदासस्य' इति। प्रकृत्याः मानवीकरणं तस्य वर्णनायाः प्रमुखवैशिष्ट्यं वर्तते। चरित्रचित्रणे अपि कालिदासः अतीव पटुः आसीत्। तस्य जोवनविषये तथा तस्य समयनिधर्धारणमतिकष्टसाध्यं कार्यम्, यतस्तैः स्वविषये किमपि न लिखितम्। तस्य विषये बहवः किंवदन्तयः जनसमाजे वर्तन्ते। कैचित् पण्डिताः कथयन्ति यत, कवि कालिदास प्रथमतः महामुर्खः आसीत्। स एक वृक्षशाखायामोपविश्य तस्याः मूलं कुठारेण छिनति स्म। स न जानाति स्म तेन तस्य प्राणहानि जायते इति।

तस्मिन् काले विद्यावती नाम्ना एका परम विद्वेषी राजकन्या आसीत्। सा समग्र भारतवर्षस्य बहुपण्डितान् शास्त्रविचारे पराभुतान् अकरोत्। ततः अपमानिता पण्डिताः सर्वे मिलित्वा जड़वुद्धिं कालिदासं विद्यावतीं सन्मुखे नीतवन्तः। शास्त्रविचारे विद्यावतीं पराजितान् कालिदासः विजयोऽभुत्। तथा सर्वे मिलित्वा कौशलेन विद्यावतीं कालिदासेन सह विवाहं अदापयत्। विवाहवासरे यथा विद्यावती कालिदास महामुर्खं इति रूपेण ज्ञातवती तदा कालिदासं भर्त्सनं कृतवती विद्यावती। कालिदासः अपि गृहं परित्यज्य सरस्वती देवीमोपासतेस्म। कालिदासस्य उपासनाया सरस्वती प्रसन्ना बभुव। ततः परं कालिदासः सरस्वत्याः वरं प्राप्य महापण्डितो जातः। विद्यावतीं साक्षात्कर्तुं ततः महापण्डितः कालिदासः स्वगृहमाजगाम द्वारदेशं प्राप्य सः अवदत् - 'अस्ति कश्चिद्वाग्विशेषः'। एतत् श्रुत्वा विद्यावती प्राहः- कः कोऽत्र भवान् 'अस्तिकश्चिद्वाग्विशेषः'। अहं कालिदासः - स अवदत्। तदा सा कालिदासं प्रति उवाच - भवान् अधुना महापण्डितो जातः। अतः भवता उक्तं प्रतिशब्दमाद्यक्षारारूपेण नियोज्य काव्यं रचय। तदा महाकविः काव्यं रचयितुमारब्धवान्। स 'अस्ति' शब्देन कुमारसम्भवम्, 'कचित' शब्देन मेघदूतम्, 'वाक्' शब्देन रघुवंशम्, 'विशेष' शब्देन ऋतुसंहारम् च रचितवान्। तस्य श्रोष्ठः नाटकः अभिज्ञानशाकुन्तलम्।

तस्य जन्मस्थानविषयेऽपि मतवैभिन्न्यं दृश्यते। कोऽपि एनं काश्मीरनिवासी, कोऽपि बङ्गवासी, कोऽपि विदिशावासी, कोऽपि उज्जयिन्यामस्य निवासः आसीदिति मन्यते।

१४.६ कालिदासस्य समयः

कालिदासस्य कालनिर्धारणमतीव विवादास्पदः विषयः अस्ति। यतः स स्व विषये कोऽपि संकेतः न कृतवान्, अपरच तस्य विषये अनेकाः परस्परभिन्नाः जनश्रुतयः प्रचलिताः या विषयमधिकतरं जटिलं कुर्वन्ति। कालिदासस्य स्थितिकालः सम्बन्धीनि यानि विभिन्नानि मतानि सन्ति तेषु मतद्वयमेव प्राधान्यं भजते। तयोः एकं गुप्तकालीनमतमस्ति यदनुसारेण गुप्तवंशस्य कस्यचनः राज्ञः मुख्यतः द्वितीयचन्द्रगुप्तस्य काले कालिदासः प्रादुर्भवत्। अपरञ्च ईसापूर्व प्रथमशताब्द्यां परम्परया प्रसिद्धस्य उज्जयिनीनरेशस्य विक्रमादित्यस्य काले तस्य स्थितिं मन्यते।

कालिदासस्य स्थिति विषये सर विलियम् जोन्स महोदयः विक्रमसंवत् प्रवर्तकस्य ईसवीयसंवत् पूर्ववर्त्तिनः कस्यापि विक्रमादित्यस्य राज्ञः कल्पनां कृत्वा तत्सभामण्डनं कालिदासं मत्वा ईत्वा ई.पू. प्रथमशताब्दीसमुद्भवत्वं कालिदासस्य मन्यते। डा. वेबर लौसन, याकोवि, माँनियर विलियम् इत्यादयः महानुभावानामपि ई. द्वितीयशतकयोर्मध्यकालिकत्वं कालिदासस्य समयः स्वीक्रियते।

वत्सभट्टिमहोदयस्यैकः शिलालेखः प्राप्यते, यत्र ५२९ (५२९) मालवसंवदुल्लेखो विद्यते, स च ई. ४७३ तः संवदति। तस्य शिलालेखस्य भाषा कालिदासीयां भाषामनुहरति एतदेवाधारीकृत्य मैक्डोनल महोदयः कालिदासस्य पञ्चमशतकोद्भावतामाहुः।।

१४.७ मेघदूतस्य उपजीव्यत्वम्

कालिदासस्य मेघदूत खण्डकाव्ये खण्डद्वयं वर्तते। एकं पूर्वमेघः, अपरञ्च उत्तरमेघः। पूर्वमेघे कालिदासेन दूतमेघस्य यात्रापथस्य वर्णना दीयते। उत्तरमेघे मेघं प्रतिवार्ता एव प्रधानतया उपस्थाप्यते।

सन्देशप्रेषणस्य प्रवृत्तिस्तदाधारेण काव्यप्रणयने प्रवृत्तिश्चेयं पुराणेषु रामायणे महाभारते चापि प्राप्यते। नलचरिते हंसेन संवादप्रेषणे उपकृतम्, युधिष्ठिरेण कृष्णहारा संवादः प्रेषितः, रामेण हुनुमता संवादः प्रापितः। तदत्र कालिदासेन रामायणमनुसृत्य मेघदूतं प्रणीतमिति कथनं नासत्यम्। कालिदासः स्वयमपि तथ्यमिदं गोपयितुं नैच्छत्। यद्यसौ तथ्यमिदं गोपयितुमैषिष्यत्, तदा स्वकाव्ये – 'इत्याख्याते पवनतनयं मैथिलीवोन्मुखो सा' इति पद्यं कथमपि नायोजयिष्यत्।

यद्यपि काव्यमिदं रामायणाधारेण कृतम्, तथापि सः स्वीयां मौलिकतां न त्यज्यते। अतुलनीया काव्यशैली मेघदूतस्य उपजोव्यम्। विशेषतः तदानीन्तनस्य भारतवर्षस्य भौगलिकवस्थायाः, प्रकृतेः रमणीयं सौन्दर्यं वन- उपवन – गिरि नद्रीनां सम्यक् वर्णनम्, महानगरीनाञ्च विलक्षणवर्णनया महाकवि कालिदासः सर्वान् विमोह्यति। यथा-

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिजम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः।

अन्तः सारं धन! तुलयितुं नानिलः शाक्ष्यति त्वां रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय॥ (पूर्वमेधः/२०)

अप्यन्यस्मिञ्जलधर! महाकालमासाद्य काले स्थातव्यं ते नयनविषयं यावदत्येति भानुः।

कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया मामन्दाणां फलमविकलं लप्स्यसे गर्जितानाम्॥ (पू.मे., ३४).

१४.८ मेघदूतस्य काव्यिकसौन्दर्यम्

मेघदूतं हि काव्यं कवित्वविषये कालिदासायं विश्वसाहित्ये सर्वोत्कृष्टमासनं ददाति। तदीयं मेघदूतं खण्डकाव्यं जगति सुप्रसिद्धम्। कालिदासेन मेघदूते सौन्दर्यसृष्टेः परकाष्ठाः प्रकाशिता-

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी मध्येक्षामा चकितहरिणी- प्रेक्षणा निम्ननाभिः।

श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां या तत्र स्यादुवतिविषये सृष्टिराद्येव धातुः।

(उ.मे. १९)

कालिदासः भाषाप्रयोगे अलङ्कार निबन्धने प्रकृतिवर्णने चरित्रविरचने च निपुणासीत्। संस्कृते खलु एकः प्रवादः वर्तते -

उपमा कालिदासस्य भारवेरर्थगौरवम्।

दृण्डिनः पदलालित्यं माघे सन्ति त्रयो यो गुणाः॥

महाकविः कालिदासः स्वकीये मेघदूते काव्यग्रन्थे सर्वथा काव्यकलां प्रकटयति। तस्य मेघदुतं सुमनोहरं काव्यम्। अस्मिन् काव्ये एकस्य विरहिणः यक्षस्य कामदशा वर्णिता भवति। तस्या विरहावस्थायाः प्रसंगे पूर्वमेघे उल्लेखितमस्ति-

तसिन्नदौ कतिचिदबला - विप्रयुक्तः स कामी नीत्वा मासान् कनकवलय-भ्रंशरिक्त-प्रकोष्ठः। आषाढस्य प्रथम दिवसे मेघमाश्लिष्ट-सानुं वप्रक्रीडा परिणतगजप्रेक्षणीयं ददर्श॥

(पू.मे., २).

इति श्लोके अति सुन्दरतया कविना प्रकटीक्रियते कामविदग्धजनकेन प्रकारेण चेतनाचेतनेषु स्मृतिरहितो भवति, कविना तदपि 'धूमज्योति' इति श्लोके वर्णितमस्ति। तथैव उत्तरमेघे यक्षपत्याः विरहदशा कविना यथायथं वर्ण्यते।

उपमाप्रयोगे अर्थान्तरन्यासे प्रयोगे च कालिदासः विशारदः। अथ पूर्वमेघे मेघस्य सौन्दर्यवर्णने -

येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः॥

(पूर्वमेधः, १५).

इत्यनुपमा उपमा उपलभ्यते। अन्यत्र च 'यक्षपत्नीवर्णने स्थलकमलिनीं न प्रवुद्धां न सुप्ताम्' इति अपरामनोरमा पोरमा उपमा कविना प्रदत्ता। अर्थान्तरन्यासे प्रकाशे च उक्ते 'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु' इत्यादौ कविः स्वकीयां प्रतिभां प्रकटयति।

भारतवर्षस्य प्रकृतिः नानारूपमण्डिता अतिविचित्रतमावहति। कालिदासः भारतभूमेः नैसर्गिक-वर्णनेऽपि पारदर्शितां दर्शयति। तथा हि नदी गिरि जनपदनगरादीनामतिमनोरमां वर्णनं ददाति। तद् अवसरे असौ मेघं प्रेमिकरूपेण नदीसमूहं च प्रेमिकारूपेण अवस्थापयति। पूर्वमेघे 'वेणोभूतप्रतनीसलीला' इति श्लोके निर्विन्ध्या नदी विरहिणी प्रेमिका जाता। तस्याः क्षीणः जलप्रवाहः विरहिणीनायिकायाः वेणी सञ्जाता अन्यत्र मेघम् अपरया नद्या सह सम्भोग शृंगारं करोति।

कालिदासस्य इन्द्रियानुभूतिः अतीव तीव्रा। अस्य मेघदूते काव्ये रूपरसादियुक्तस्य जगतः यथोचित् वर्णना उपलभ्यते। राजमदः अतीव तिक्तः कविना एतत् पूर्वमेघे 'तस्यास्तिक्तैर्वनगजमदैर्वसितम्' इत्यत्र उल्लेखितः अस्ति। अन्यत्र नवकदम्बपुष्पस्य काचिद् वर्णना उपलभ्यते -

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढैराविर्भूत - प्रथम - मुकुलाः कन्दलोश्चानुकच्छाम्। जग्ध्वाऽरण्येष्वधिकसुरिभं गन्धमाघ्रायचोव्याः सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्॥

मेघदूतस्य अङ्गीरस करुणविप्रलम्भशृंगारः।

तस्य वर्णनायां कविः तादृशीं निपुणतां प्रर्दशयति यथा सकलपाठकजनस्य चित्तं आलोडितर्भवति। एतद् 'मामाकाशप्रणिहितभूजं साभ्रेऽहीव स्थलकमलिनीं न प्रवुद्धां न सुप्राम' इत्यादौ सर्वत्र उपलभ्यते एव। समृद्धिमत-वस्तुवर्णने च कालिदासः प्रवीण तथा उज्जयिणीवर्णने 'शेषैः पूज्यैर्हतमिव दिवः कान्तिमत्खण्डमेकम्'। उत्तरमेघे च वापि चास्मिन् मरकतशिलावद्ध सोपानमार्गा इत्यादौ स्पष्टमेव।

कालिदासः सकलपाठकजनचित्तहारि

मेघदूतकाव्यं विरचर्य जगति अमरकीर्तिं लभते इति।

१४.९ मेघदूते प्रकृतिप्रकृतिचित्रणम्

कविकुलललामभूतकालिदासः प्रकृतेः कविः। तस्य लेखन्याः प्रकृतिदेवी आगत्य स्वयमेव नरीनृत्यते इति उच्यते। सुनिपुणलेखन्या कविः प्राकृतिक सौन्दर्यं पाठकानाम् अन्तरस्पर्शीरूपेण चित्रणे पारंगतः। न केवलं मेघदूते हि अपि तु शाकुन्तले, विक्रमोर्वशीये, मालविकाग्निमित्रे च तदेव स्पष्टी भवति। अमरप्रेमकविः कालिदासः प्राकृतिचित्रणेऽपि सुनिपुण आसीत् इति मेघदूतं हि तोवत् सुप्रमाणम्। मन्दाक्रान्ता छन्दसि प्रकृतेः लास्यभङ्गिमाम् अवारिततया प्रकाशितः। विन्ध्यपर्वतमारभ्यः कैलाशपर्वतपर्यन्तं प्रकाण्डभूखण्डस्य नदी-पर्वत-ग्राम-नगरानां वर्णना सर्वेषां हृदयाभिरासा।

अलकां प्रति प्रस्थितस्य मेघस्य शुभ लक्षणमिदृशं स वर्णयति -

मन्द्रं मन्द्रं नुद्रति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्ते सगन्धः। गर्भाधानक्षणपरिचयान्नूनमाबद्ध - मालाः सैविष्यन्ते नयनसुभगं रवे भवन्तं बलाकाः॥

(पू. मे./९).

अत्र प्राकृतिक परिस्थिति मेघस्य किदृशी उपभोग्या भवति सा वर्णना-

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैः स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।

नूनं यास्यत्यमर - मिथुन - प्रेक्षणीयामवस्थां मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ (पू.मे. १८).

अर्थात् यदा हि यक्षेन प्रेरितः मेघः आम्रकूट पर्वत शिखरे अवस्थानं करिष्यति तथा पृथिव्याः स्तन इति स पर्वतः अमरमिथुनस्यापि दृष्टिम् आकर्षयिष्यति। तथैव हि नीचैगिरिः, हिमालयः कैलाश प्रभृतिरपि वर्णनायां मधुरः भवति।

प्रकृत्याः मानवीकरणं कालिदासस्य प्रकृतिचित्रणस्य विशेषत्वं वर्तते। वेत्रवतो, शिप्रा प्रभृति नदीनां वर्णनकाले कविः अधिकः रसिकः भवति। एकैकं तटिनीं स प्रेमातुराबालिकारूपेण कल्पनां कृत्वा जलस्रोतम् चिताकर्षकरूपेण वर्णनं करोति यतो हि सा प्रेमिकं प्रति अपेक्ष्यमाना तिष्ठति। तस्यैव चित्रणं निर्विन्ध्यानदी वर्णने -

वीचिक्षोभस्तनिभविहगश्रेणिकाञ्चीगुणायाः संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।

निर्विन्ध्यायाः पथि भवरसाभ्यन्तरः सन्निपत्य स्त्रीणामद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥

तदी-पर्वतवृक्ष लतिकानां वर्णने कविः स्वनैपुण्यं येन प्रकारेण प्रकाशयति तेन हि प्रकारेण जनपद-नगर तीर्थस्थानानां वर्णनेऽपि स्वकीय कविप्रतिभाम् उद्घोषयति। क्षेत्रे कृषिकर्मणि निरताः अकृत्रिम् ग्रामजनाः, वनिताश्च केन प्रकारेण आकाशे मेघं वीक्ष्य भावं प्रकाशयिष्यन्ति, तेषां चित्रणं च निरूपमम्। कवेः स्वकीय नगरी उज्जयिनीवर्णनायां स द्वादशभिः श्लोकैः पाण्डित्यं प्रकाशयति। अलकापुरी- यक्षगृहप्रभृतिनां वर्णने कवेः नगरवर्णन प्रतिभायाः उत्कर्षता प्रकाशिता।

कुसुम पुष्पोद्यानादि प्राकृतिक वर्णनमतिक्रम्य बालिकाः वर्णनेऽपि कविः कीदृशः निपुणः आसीत् यक्षपत्नी वर्णनं तत्र प्रकृष्टोदाहरणम्। तच्च -

तन्वोश्यामा शिखरिदशना पक्वविम्बाधरोष्ठो मध्येक्षामा चकितहरिणो- प्रेक्षणा निम्ननाभिः।

श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां या तत्र स्याद्यूवतिविषये सृष्टिराद्येव धातुः।। (३ मे, १९).

इत्थं हि कवि कालिदासः प्रकृतिवर्णने आत्मानं मनोग्राहितया प्रकाशयति।

१४.१० मेघदूते रसयोजना

महाकविः कालिदासः यद्यपि प्राकृतिक चित्रणे निपुणासीत् तथापि प्रधानतया प्रेमकविरूपेणैव तस्य ख्यातिः। स्वकीयजीवनस्य प्रचलिताख्यायिकामतेन च स विद्यावती संस्पर्शात् व्यग्रप्रेमिकः आसीदिति सर्वजनविदितम्। अतो हि तस्य लेखन्यां प्रधानरूपेण श्रृंगाररसः एव प्राधान्यं लभ्यते। तस्य कृतिषु कुमारसम्भवम्, अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम् ,मालविकाग्निमित्रम् प्रभृतिषु प्रेमरसस्य आप्लुतत्वं सर्वथाअवज्ञातम्। तदेव हि एकममरकाव्यं मेघदूतं यत्र विप्रलम्भश्रृंगाररसः आत्मप्रकाशं करोति।

वस्तुतः मनोरमापत्नीं प्रति अपार प्रेम एव मेघदूतस्य उपजीव्यः। पत्नीप्रेमनिरतः यक्षः यक्षपतिना निर्वासिताः। तदेव ध्वनितमत्र प्रथमैव श्लोके -

कश्चित् कान्ताविरह गुरुणा स्वाधिकारात्प्रमत्तः शापेनास्तङ्गमितमहिमा वर्षभोज्ञेन भर्तुः।
यक्षश्चक्रे जनक-तनया-स्नान-पुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥
(पू. मे. १)

प्रति मूहुर्तमेव तस्याः स्मृतिः हृदयपटे उद्भासयति भोजनं शयनं प्रभृति नित्यकार्यानि अपि बाधा प्राप्तानि। शरीरं च अवसन्नम्। अतो हि, हस्तालंकारः कनकवलयः कुत्रापि पतितः। तद् यथा -

'नीत्वा मासान् कनकवलय-भंशरिक्त - प्रकोष्ठः'।
मासकतिपयादनन्तरमेव विरहीयक्षस्य ईदृशी अवस्था जाता।

अतो हि कामाकुलः स अचेतनं मेघमेव पत्नीं प्रति दूतरूपेण प्रेषयितुं मनः संनद्धे। तच्च - 'कामाऽर्ता हि प्रकृतिकृपणश्चेतनाचेतनेषु' इति। वास्तविकजनं तस्य लुप्यते प्रायः नदी- पर्वतपुरनारी सर्वत्रैव स कामनास्पदं पश्यति। शृंगाररसावग्राहितम् अस्य मनः आम्रकूटपर्वतः कीदृशं पश्यति तदेव -

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैः
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।
मूनं यास्यत्यमर-मिथुन - प्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः।। (पू.मे., १८).

आम्रकूटपर्वतशिखरे यदा हि मेघः क्षणकालं तिष्ठति तदास्माकं कविः आम्रकूटशृंग एव पृथिवीदेव्याः स्तव इति कामनापूर्ण दृष्ट्या अवलोकयति। विरलं हि एतादृशं प्राकृतिक सौन्द्रर्ये शृंगाररसस्योदाहरणम्।

न केवलं पर्वते एव कविः कालिदासः शृंगारमारोपयति, जलप्रवाहरूपा तटिनी अपि कवेः कामनारसमनेन प्रकारेण आकर्षणं करोति तत् पठित्वा मनसि एवं भावः प्रकाशयति। जलप्रवाहवतीं निर्विग्ध्यां नहीं कवि चञ्चला प्रेमिकारूपेण वर्णयति।

वीचिक्षोभस्तनितविहग श्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।
निर्विन्ध्यायाः पथि भवरसाभ्यन्तरः सन्त्रिपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु।। (पू.मे. २६)

उज्जयिनी अलका प्रभृति स्थानेषु विचरणकारिण्यः नार्यः कवेः लेखन्यां मनोग्रादिरूपमाकलयति। वस्तुतः शृंगाररसोदीपकानां नारीणां वर्णने कविः कलाकुशलतां दर्शयति।

अतो हि कालिदासः प्रेमरसस्य कविरेव आसीत् इति तस्य प्रियतमायाः वर्णने पूर्णतामेति। तद यथा-

तन्वीश्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकित हरिणीप्रेक्षणा निम्ननाभिः।

श्रोणीभारादलस्यगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः।।

१४.११ मेघदूते अर्थान्तरन्यासः

यद्यपि 'उपमा कालिदासस्य' इति वचनं जगति प्रसिद्धं तथापि महाकविः कालिदासः तदीये मेघदूत-खण्डकाव्ये अर्थान्तरन्यासस्य अलङ्कारस्य बहुधा प्रयोगं कृत्वा विद्वान् समाजे समत्कृति आदधाति।

अर्थान्तरन्यास अलंकारस्य लक्षणं साहित्यदर्पणे एवं लक्ष्यते -

सामान्यं वा विशेषेण, विशेषस्तेन वा यदि।
कार्यं च कारणेनेदं कार्येण च समथ्यते॥

अत्र इदं निगदितं भवति - अर्थान्तरन्यासे अलंकारे कश्चित् सामान्येन विशेषं समर्थते क्वचित् विशेषो वा सामान्येन एवं कारणेन वा कार्यं कार्येण वा अत्र समर्थितं भवति। यया तथा अस्तु , कालिदासीये मेघदूते अर्थान्तरन्यासस्य प्रयोगेन कविः स्वकीयां प्रतिभां सानुसरिक ज्ञानञ्च प्रकटयति। तथाहि -

धूम्रज्योतिः सलिलमरुतां सन्निपातः क्व मेघः ?
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ?
इत्यौत्सुक्यादपरिगणयन् गृह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतना-चेतनेषु।। (पू.मे., ५).

इति श्लोके कालिदासः कामार्तस्य यक्षस्य विवेकहीनतां वर्णयन् कथयति-

'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु'

यक्षः धूम्रज्योतिः सलिलमरुतां सम्पाद्यमेव अचेतनं मेघं स्वप्रियायैः दूतरूपेण प्रेरयति अहो अस्य विचारहीनता। तर्हि अचेतनः अचेतनाय वार्तां वाढमर्हति एतद् सर्वथा असम्भवमेव। अत एव कविः कामर्तस्य तस्य निर्बुद्धित्वम् अर्थान्तरन्यासेन प्रतिपादयन्ति।

कामार्ता ये भवन्ति, ते चेतनाचेतनयोर्मध्ये भेदं विस्मरन्ति एव। अत्र विशेषद्वारा साधाराणदेशा समर्थिता अस्ति। अत्र कवेः मानवसम्बन्धि ज्ञानमपि सर्वथा व्यञ्जनमस्ति। स एव हि महाकविः भवति यः न केवलं वस्तुवर्णनमेव करोति, अपि तु लोकाय ज्ञानमपि प्रददाति।

जातं वंशे भुवन-विदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद् दूरंबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा॥

कालिदासः अन्तिमे पादे कथयति -

'याञ्चामोघा वरमधिगुणे नाधमे लब्धकामा' इति।

अत्रापि अर्थान्तरन्यासो विराजते। अत्र यक्षः गुणीजनानां समीपे एव विशेष प्रार्थनां करोति। तेन कथ्यते- अधिगुणो अर्थात् अधिकगुणविशिष्टः एव याञ्चा कर्तव्या न तु अधमसकाशे इति अत्रापि पूर्ववत् सामान्येन विशेषः॥

१४.१२ माघे मेधे गतं वयः

संस्कृत काव्यशास्त्रस्य कस्यचित् समालोचकस्य इयं प्रतिद्धा उक्तिः 'माघे मघे गतं वयः' अर्थात् महाकवि कालिदासस्य मन्दाक्रान्ता छन्दसि विरचितं 'मेघदूतम्' तथा च निपुणकाव्यप्रणेतुः माघस्य 'शिशुपालवधम्' एते काव्यद्वये संस्कृत काव्यजगति अनुपमेकाव्यकुसुमे वर्तते।

मेघदूतस्य चरितनायको यक्षः काव्येऽस्मिन्नातिमहत्वमावहति। स्वभावतः स प्रेमो भावुकश्च। अभिनवपरिणयप्रमत्तोऽसौ कर्तव्याधिकारे प्रमाद्रमाचरत्। स स्वकीयोच्चाधिकारान्निलम्बितो हिमालयस्य मनोभिरामप्रदेशाद् रामगिरिं प्रेषितः। तत्राप्यसौ यथारुचि स्निग्धच्छायातरुषु आश्रमभूमिषु न्यवसत्।

यक्षो हि शृंगाररसनिष्पत्तये प्रयुक्त आलम्बन-विभावः। स कामी वियोगजनितकृशतया कनकवलयभ्रंशरिक्त प्रकोष्ठोमेघदर्शनेनान्तर्वाष्पश्च सञ्जातोऽस्ति। आसन्ने श्रावणे मासि कथं मदीया प्रियतमा जीवनं धारयिष्यतीति महती चिन्ता तस्य चेतो दुनोति।

यक्षिणीयक्षयोः पूर्वकालिकप्रणयक्रीडाया वर्णनमुत्तरमेघे ग्रथितम्। यक्षः कथयति - स्वप्रेयस्या वामपादभिलाषी खल्वहम्। सा एव मे जीवितमिति। कामकेलि विहाय नासीद्यक्षस्य किमपि कार्यम्। प्रणयव्यापारे निमग्न एवासौ दिनमगयत्। नायकस्यातीता दशाधो लिखितश्लोक एकत्र चित्रिता -

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात् कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात्।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्टस्त्वमुत्कण्ठाविरचितपदं मन्मुखेनेदमाह॥

एतादृशा वियोगिनी सर्वत्र वियोगिन एव पश्यन्ति तेषां दुःखं चानुभवन्तीतिः स्वाभाविकमेव। प्रथममसौ मेघः प्रोषितभर्तृकाः पश्यति। सर्वा एव प्रकृतिर्मेधस्य वियोगे प्रोषितभर्तृकास्ति। मेघ उदात्तनायकस्यादर्शमङ्गीकृत्य शृंगारवृत्तिषु मग्नः प्रसन्नश्चास्ति। नासौ स्वदुःखेनापरान् व्यथयितुं वाञ्छति।

नायिका यक्षिणी नागराभिरुचिसम्पन्ना विलासिनी बाला आसीत्। सा वियोगिनी रूपेणात्रोपस्थिता स्वगृहे कल्पवृक्षमारोप्य तं समवर्धयत्। तस्याः गृहस्य समीपं वाप्यास्तटे क्रीडाशैल आसीत्। तत्र यक्षिणी परम पिप्रिये। सा मयूरं तालैरनर्त्तयत्। यक्षस्तस्याः नखशिखचारुतां प्रशंसति-

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
सा तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः॥

कालिदासेन भारतस्य नैसर्गिकसौन्दर्यविधानं चारुतरमुदाहृतम्। प्रकृतौ सौमनस्यं पश्यति कविः। वायुर्मन्दं मन्द्रं नुदति मेघम्। चातकस्तं कलगानेन प्रोत्साहयति। बलका स्वपक्षतिसमीरेण तं सेवन्ते। मानससरोवरं गन्तुकामा हंसाः स्वचञ्चुपुटे विसतन्तुमावहन्तो मेघस्य सहयात्रिणो जायन्ते। यदा कदाचित् तं मेघं प्राप्य तस्य प्रियसुहृद् रामगिरिः प्रेमाश्रुभिर्दवितः सञ्जायते। मेघेनासौ आलिङ्गनीयः प्रस्थानात् प्राक् तस्यानुमतिश्चासादनीया। मेघ आम्रकूटगिरेर्दावाग्निं शमयति। आम्रकूटस्तस्यातिथ्यं समाचरति अहो सौहार्दनिर्भरता मयूराणां व्यवहारस्य –

शुक्लपाङ्गैः सजलनयनैः खगतीकृत्य केकाः।
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्॥

स मेघो दावाग्निं शमयति त्रिपुरविजयगीते मृदङ्गध्वनि योजयति, स्कन्दमर्चयति, गङ्गाजलं पिवति, चमरीणां पुच्छाग्रमग्निदाहाद् रक्षति, शरभान् तुमुलकरकावृष्टिपातावकीर्णान् करोति च। एतैर्निदर्शनैः कविः विश्वव्यापिनी बन्धुतां प्रकाशयति।

प्रकृतेः सौन्दर्यराशे रमणीयकं सातिशयमेवास्ति मेघदूते –

पाण्डुच्छायोपवनवृत्तयः केतकैः सूचिभिन्नै
र्नीडारम्भैर्गृहवलिभुजामाकुलग्राम – चैत्याः।
त्वयासन्ने परिणतफलश्यामजम्बू वनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः॥

हिमालयस्य परिसरोऽतीव रमणीयश्चित्रितः। नास्त्ययं कुमारसम्भववर्णितो हिमालयो यत्रद्यामशृङ्गारप्रवृत्तय उल्लसन्ति। अत्र तु स्वर्गसोपानभूता भागीरथी प्रवहति।

कैलासोऽप्यत्र विद्यते –

शृङ्गच्छ्रायैः कुमदविशदैर्यो वितत्य स्थितः स्वं।
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः॥

मेघदूते कविरस्मान् नागरकसंस्कृत्या सह

अवदापयति। तस्य नागरस्य जीवनव्यापारो दाक्षिण्येन श्रृङ्गारेण च समुन्नीतः। मेघस्तु कश्चिन्नागर एव। यत्र कुत्रचिदेव स प्रणयोचितनायिकाः संगच्छते तत्रैव कवेः शृंगारितप्रवृतयः स्फुरन्ति। इत्थं मेघदूतं रसराजाक्रोडी वत्तते॥

१४.१३ अध्यायस्य असमीया भाषायां सारांशः

মহাকবি কালিদাসৰ অপূর্বকীর্তি মেঘদূত। এই মেঘদূত এখন গীতিকাব্য। মন্দাক্রান্তা ছন্দত বিৰচিত এই কাব্যখনত দুটা ভাগ আছে - পূর্বমেঘ, আৰু উত্তৰমেঘ। ইয়াৰে পূর্বমেঘত কালিদাসে দূত মেঘৰ যাত্রাপথৰ বর্ণনা কৰিছে আৰু উত্তৰমেঘত মুখ্যতঃ মেঘৰ প্রতি বার্তাসমূহ বর্ণনা কৰা হৈছে। কাব্যখনৰ বিষয়বস্তু এনেধৰণৰ—

কোনো এজন যক্ষই তেওঁৰ অধিপতি কুবেৰৰ আদেশ পালনত ব্যর্থ হোৱাৰ ফলত ৰামগিৰি নামেৰে এডোখৰ নির্জন ঠাইত নির্বাসন খাটিবলগীয়া হৈছিল। নিজৰ বাসস্থান অলকা

আৰু নববিবাহিতা প্ৰিয়তমা পত্নীৰ পৰা বিযুক্ত হৈ তেওঁ আতুৰ হৈ পৰে আৰু তেওঁৰ মন চেতন অচেতনৰ প্ৰতি বোধশূণ্য হৈ পৰে। তেনে সময়তে আহাৰ মাহত আকাশত ভাঁহি ফুৰা এডোখৰ মেঘ দেখি তেওঁৰ পত্নীলৈ আশাভৰা বতৰা প্ৰেৰণ কৰিবৰ বাবে ইচ্ছা কৰে আৰু প্ৰথমেই তেওঁ মেঘক শুভকথাৰে প্ৰশংসা কৰে। মেঘক পঠাই ৰামগিৰিৰ পৰা অলকালৈ যাত্ৰাপথৰ বৰ্ণনা কৰে। এই যাত্ৰাপথ বৰ্ণনাৰ প্ৰসঙ্গতে অলকাপুৰী, নিজৰ প্ৰসাদ, মহাকাল মন্দিৰ বিভিন্ন পৰ্বত-পাহাৰ, ঋতু আদিৰ পৰিবৰ্তন, আদিৰো বৰ্ণনা দিয়ে। উত্তৰ মেঘত পত্নীলৈ প্ৰেৰণ কৰা বাৰ্তাসমূহ সুন্দৰভাৰে যক্ষই বৰ্ণনা কৰে।

যদিও এই কাব্যখন ৰামায়ণৰ অনুকৰণত ৰচিত হৈছিল বুলি কোৱা হয়, তথাপিও কিন্তু কাব্যখনত কবিজনাৰ নিজস্ব প্ৰতিভা জিলিকি উঠা পৰিলক্ষিত হয়। যক্ষ আৰু তেওঁৰ প্ৰেয়সীৰ বিৰহ অৱস্থা বৰ্ণনা কৰি কবিয়ে তীব্ৰ প্ৰেমে মানৱ হৃদয়ত সৃষ্টি কৰা অসহায় অবস্থাৰ এক চিত্ৰ দাঙি ধৰিছে। গ্ৰন্থখনৰ প্ৰতিটো পদ্যতেই প্ৰেমৰ আকুল অনুভৱ প্ৰকাশ পাইছে।



१४.१४ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- गीतिकाव्यस्य संक्षिप्त वृत्तान्तं ज्ञातवन्त:।
- कालिदासकृत: मेघदूतस्य खण्डद्वयस्य (पूर्वमेघ उत्तरमेघ च) प्रतिपाद्यं ज्ञातवन्त:।
- महाकवि कालिदासस्य विषये ज्ञातवन्त:।
- 'मेघदूतस्य उपजीव्यत्वम्' इति विषये ज्ञातवन्त:।
- मेघदूतस्य काव्यिकसौन्दर्यस्य विषये ज्ञातवन्त:।
- 'मेघदूते प्रकृति चिन्तनम्' इति विषये ज्ञातवन्त:।
- मेघदूते सन्निविष्टानां विभिन्नानां रसानां विषये ज्ञातवन्त:।



१४.१५ ज्ञानाधिक्यम्

१) শৰ্মা, ড° থানেশ্বৰ (জুলাই, ২০১৩) সংস্কৃত সাহিত্যৰ ইতিবৃত্ত, চন্দ্ৰ প্ৰকাশ, পাণবজাৰ, গুৱাহাটী-১

২) अग्रवाल:, आचार्यहंसराज: (१९८६) संस्कृतसाहित्येतिहास:, चौखम्बासुरभारतीप्रकाशन, वाराणसी

३) दाहाल:, आचार्यलोकमणि (१९९९) संस्कृतसाहित्येतिहास:, कृष्णदास: अकादमी, वाराणसी

४) मिश्र, आचार्यरामचन्द्र (२००३) संस्कृतसाहित्येतिहास:, चौखम्बाविद्याभवन, वाराणसी-२२१००१

५) पाण्डेय, डा. विजयशंकरपाठकः, डा. जमुना (२०१३) संस्कृतनिबन्धमकरन्दः (प्रथमो / द्वितीयोभागः),चौखम्बासंस्कृतसीरीजआफिस, वाराणसी

६) उपाध्याय, रामजी, संस्कृतनिबन्धावलिः, चौखम्बाविद्यभवन, वाराणसी.

७) शर्मा, थानेश्वर, मेघदुतम्, चन्द्रप्रकाशः, पाणवजार, गुवाहाटी-१

८) Vaidya, C.V. History of Sanskrit Literature, Poona, 1930.

९) De, S.K. and Dasgupta, S.N. History of Sanskrit Literature, Vol., Calcutta, 1980

१०) Deva Goswami,H istory of Sanskrit Literature. Bookland, Panbazar, Guwahati-1.

११) Sarma, Dr. Thaneswar, Meghadrutam of Kalidasa Translated into Assamese, Chandra Prakash, Guwahati-1.



१४.१६ अभ्यासप्रश्नाः

प्रश्नः १: 'मेघदूतम्' कीदृशम् काव्यमस्ति ?

प्रश्नः २: 'मेघदूतम्' इति काव्यस्य कविःकः ?

प्रश्नः ३: मेघदूते कति खण्डानि सन्ति ?

प्रश्नः ४: दूतकाव्यस्य गीतिकाव्यस्य वा संक्षिप्तं विवरणं देयम्।

प्रश्नः ५: गीतिकाव्यस्य लक्षणं प्रतिपाद्यताम्। गीतिकाव्यकाररूपेण कालिदासस्य सम्यग्परिचयः देय।

प्रश्नः ६: 'संस्कृतसाहित्येमेघदूतस्यस्थानम्'- इति विषयमधिकृत्य निबन्धः विरच्यताम्।

प्रश्नः ७: संस्कृतभाषायां सप्रसदङ्गं व्याख्याकार्या =

(क) माघे मेघे गतं वयः

(ख) उपमाकालिदासस्य

प्रश्नः ८: कालिदासस्य जन्मस्थान-कालयोः विषये लिख्यताम्।

प्रश्नः ९: मेघदूतस्य भाषाशैलीं चाधिकृत्य नातिदीर्घः प्रबन्धिव रच्यताम्।

प्रश्नः १०: मेघदूते अलंकारप्रयोगशैल्याः पर्यालोच्यताम्।

प्रश्नः ११: अधोलिखितेषु विषयमवलम्ब्य टीकाकार्या -

(क) मेघदूतस्य काव्यिकसौन्दर्यम्।

(ख) मेघदूतस्य प्राकृतिकसौन्दर्यम्।

(ग) मेघादुते शृंगाररसः।

*** ***** ***